अथ खलु राजा शुद्धोदनो सार्धं सर्वेणान्तःपुरेण यशोधराप्रमुखेन सार्धं कुमारामात्येहि च सार्धं शाक्येहि सपरिवारेहि सार्धं चतुरङ्गबलकायेहि सार्धं वणिक्सार्थवाहेहि सार्धं श्रेष्ठिप्रमुखेहि निगमेहि महता राजानुभावेन महता राजर्द्धिये कपिलवस्तुतो नगरातो निर्यासि भगवन्तं दर्शनाय ॥ राजा शुद्धोदनो कपिलवस्तुतो चतुर्घोटेन अश्वरथेन निर्धावति शाक्यगणपरिवृतो न्यग्रोधारामं भगवन्तं दर्शनाय । भिक्षुसंघो च कपिलवस्तुनगरं पिण्डाय प्रविशति । राज्ञा शुद्धोदनेन भिक्षुसंघो दृष्टो ॥ सो दानि अमात्यानां पृच्छति ॥ भो भणे अमात्या किं इमानीदृशा परिव्राजका ॥ अमात्या आहन्सुः ॥ देव कुमारस्य एषो परिवारो ॥ सो दानि तां कृशशरीरां भिक्षू आर्षिप्रव्रजितां उरुबिल्वाकाश्यपनदीकाश्यपगयाकाश्यपशारिपुत्रमौद्गल्यायना च सपरिवारा तपतपितशरीरां मुण्डा पात्रपाणी दृष्ट्वा परिदीनमुखवर्णो संवृत्तो ॥ मम पुत्रो यदि न प्रव्रजिष्यति राजा भविष्यति चक्रवर्ती चातुर्द्वीपो विजितावी धार्मिको धर्मराजा सप्तरत्नसमन्वागतो राजसहस्रपरिवृतो मेदिनीमध्यावसिष्यत् । इममीदृशं परिवारं निर्वर्तेथ अहं न तं इच्छामि द्रष्टुं ॥ ते दानि भिक्षू अमात्येहि वुच्यन्ति ॥ राजा वो न द्रष्टुकामो निवर्तेथ ॥ ते दानि निवर्तित्वा न्यग्रोधारामं गताः ॥ न सो भगवन् राजा शुद्धोदनो इच्छति द्रष्टुं । अस्माकं च दृष्ट्वा प्रतिनिवर्तितो ॥ भगवानाह ॥ इमाहिं [२९९b] एव सर्वस्य भिक्षुसंघस्य आहारं भविष्यति ॥ उरुबिल्वाकाश्यपो भगवन्त-

1. M °pitāḥ na°. — 2. B °cin pratha°. — 4. B °rvakenāntapureṇa° M °ṇa yaçādharā-pramukhena sārdhaṃ kumā° °yehi ca sārdha çākyehi ca saparivārehi sārdhaṃ dhanu° BM °grahārathā° B °rahehi sārdhaṃ çre° M °sārdha çre° B °çreṣṭipramu° M °khehi naigama° B °mehi mahato rājānubhāvena mahatā rājārddhiyena | kapi° M °jarddhiye° bhagavantaṃ da°.

7. BM °stuto rāta° M °rddhāvanti | çā°. — 9¹. B °saṃgha ca° M °saṃgho ca ° piṇḍāya°. — 10². M °imām adṛ° BM °çā pravrajyā |.

11¹. M °āhatsuḥ. — 12. B °kṛçaçarīrāṃ bhi° M °bhikṣhuṃ çi° B °tāṃ | uru° M °tāṃ | nādīkāçyapagayā° BM °maudgalyā° B °rivārāḥ ta° M °vārā tapatappitaça° B °tapatapyitaça° M °dīnamukhyāvarṇnaṃ° B °varṇā saṃvṛtto na°. — 15. BM °jātpati | rājā° M °nvāgataḥ rājana° B °to rājāna° M °pitaḥ me° BM °dhyāvasiṣyan |.

16. M °dṛçyaṃ parivāraṃ nivartetha rathaṃ ta naṃ I° B °rtetha | rathaṃ na°. — 17¹. BM °bhikṣhu a° M °vuccati | B °vuccanti |. — 18¹. M °nivartitvā° B °rāmagatāḥ |. — 18². M °icchāmi dra°. — 19¹. M °dṛṣhtavā pra° BM °rtito |. — 19². M imehi e°. — 20. BM āyuṣmān uru°.

मामन्त्रयति ॥ गच्छामि भगवन् राजानं शुद्धोदनं निवर्तेमि ॥ भगवान्नाधिवासेति ॥ नदीकाश्यपो पि गयाकाश्यपो पि उपसेनो पि सर्वे ते महर्द्धिका भिक्षू भगवन्तं याचेन्ति ॥ गच्छाम भगवन् राजानं शुद्धोदनं प्रसादेमः यथा भगवन्तमुपसंक्रमेय ॥ भगवांस्तेषां पि नाधिवासेति ॥

अथ खल्वायुष्मतो महामौद्गल्यायनस्य एतदभूषि ॥ कं भगवानाकांक्षति भिक्षुं यो राजानं शुद्धोदनमभिप्रसादेया ॥ अद्राक्षीत् महामौद्गल्यायनो दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेन भगवतो चित्तं कालोदायिस्मिं भिक्षुस्मिं प्रतिष्ठितं । कालोदायी भिक्षु राजानं शुद्धोदनमभिप्रसादयिष्यति ॥ दृष्ट्वा च पुनः येनायुष्मां कालोदायी तेनोपसंक्रमित्वा आयुष्मतो कालोदायिस्य एतदुवाच ॥ लाभा ते आयुष्मं उदायि सुलब्धा लाभा यस्य ते शास्ता आकांक्षति उदायी भिक्षु राजानं शुद्धोदनं अभिप्रसादयिष्यति । सन्ति अन्ये स्थविरस्थविरा भिक्षू याचन्तो न लभन्ति । त्वं गच्छ आयुष्मन् उदायि राजानं शुद्धोदनं अभिप्रसादेहि ॥ एवमुक्ते आयुष्मां कालोदायी आयुष्मन्तं महामौद्गल्यायनमेतदुवाच ॥ दुरासदा आयुष्मं महामौद्गल्यायन राजानः क्षत्रिया मूर्धाभिषिक्ता जनपदस्थामवीर्यप्राप्ता ॥ सय्यथापि नामायुष्मं महामौद्गल्यायन समिद्धो महाग्निस्कन्धो पुरुषस्य दुरासदो भवति उपसंक्रमणाय एवमेवायुष्मं महामौद्गल्यायन राजानो क्षत्रिया मूर्धाभिषिक्ता जनपदस्थामवीर्यप्राप्ताः दुरासदा उपसंक्रमणाय ॥ सय्यथापि नामायुष्मं महामौद्गल्यायन कुञ्जरो षष्टिहायनो दुरासदो भवति उपसंक्रमितुं एवमेवायुष्मं महामौद्गल्यायन क्षत्रिया मूर्धाभिषिक्ता जनपदस्थामवीर्यप्राप्ताः दुरासदा उपसंक्रमणाय ॥ सय्यथापि नामायुष्मं महामौद्गल्यायन सिंहो मृगराजो दाढी बली केसरी मृगाधि-

1[1]. M °gava rājā° B °ritemi bha°. — 1[2]. BM °gavā nādhi°. — 2. BM nadīkāçyapo āha || ga° M °rddhiko bhikṣhur bhagavaṃ° BM °canti gaccha°. — 3. B °demaḥ | ya° M °meyaḥ. — 4. M °teṣhām api nādhi°. — 5[1]. BM °maudgalyā° M °nasyeda°. — 5[2]. B kaṃ bha° M kittaṃ ya° B °ti | bhikṣhuṃ ya° M °bhikṣhur yo° B °deyā a°.

6. B °kṣhuṣā || ca° M °kṣhuṣa mola° BM °maudgalyā° B °kena | bhagavato ci° M °gavato cintaṃ kā°. — 8[1]. M °dāyī bhikṣhuḥ rājānaṃ abhi°. — 8[2]. M °puna yenāyuṣhmāṃ kālodāyī te° B °dāyin teno°. — 9. B lābhā te yuṣhmaṃ° M °āyuṣhmato udāyi sulabdha-lābhā ya°; B °kaṃkṣati | udāyī bhi° M °ti udāyi bhi°.

11. M °bhikṣhur yācanti na labhante B °nti tvaṃ°. — 12[1]. BM °yuṣhmāṃ a° M °dāyī eḥ°. — 12[2]. M °yuṣhmā ka° BM °maudgalyā°. — 13. M °yuṣhmantaṃ ma° BM °maudgalyā° M °jāno kṣhatri° B °naḥ kṣhatri° M °prāptāḥ ||. — 14. B °nāyuṣhmantaṃ ma° BM °yana imasya ma° M °mahān agniskandho° BM °rāsadā bha° M °kramaṇāya° BM °sam evāmi ma° M °yanaḥ rājāna kṣhatri° [illegible] ja°.

17. Omis par M. B °nāmāyuṣhmaṃ mahāmaudgalyāyana kuñjaro ṣhaṣṭhi° [illegible] | e° maudgalyāyanaḥ kṣha° kramaṇāya ||. — 20. BM °nāmāyuṣhmaṃ mahāmaudgalyāyana siṃho mahārāja(M °jā) dāḍhi ba° M °dhipati durāsadā bhavati puruṣhasya° B °ti | pu°

पतिर्दुरासदो भवति पुरुषस्योपसंक्रमणाय एवमेवायुष्मं महामौद्गल्यायन राजानः क्षत्रिया मूर्धाभिषिक्ता जनपदस्थामवीर्यप्राप्ताः पुरुषसिंहा दुरास[१०३]दा भवन्ति उपसंक्रमणाय ॥ तद्यथापि नामायुष्मं महामौद्गल्यायन शार्दूलो चोलीनकायो गुरुदर्शनो दुरासदो भवति पुरुषस्य उपसंक्रमणाय एवमेवायुष्मन्महामौद्गल्यायन क्षत्रिया राजानो मूर्धाभिषिक्ता जनपदस्थामवीर्यप्राप्ताः पुरुषशार्दूला दुरासदा भवन्ति उपसंक्रमणाय ॥ अथ खलु भगवानायुष्मन्तं कालोदायिं गाथाय अध्यभाषे ॥

शृणु मम उदायिभद्रा परमकुशलप्रसादानां समयो ।
शाक्यकुलनन्दिजननं राजवरं साधु प्रसादेहि ॥
न हि अन्यो कोचि भिक्षु समर्थो राज्ञो प्रसादयितुं चित्तं ।
नान्यत्र त्वया उदायि समाचरितेन भगवतो ॥
भूतपूर्वं उदायि अतीतमध्वानमभू भूमिपती ।
नामेन सत्यवर्धनो विघुष्टशब्दो धरणिपालो ॥
धार्मिको धर्मराजा संपूजितः प्राणकोटिनयुतेहि ।
धर्मेण इमां वसुमतिं समुद्रपर्यन्तां अनुशासे ॥
तस्य च अभूषि राज्ञो पुत्रो दर्शनीयो पूर्वबुद्धानां ।
नामेन मतिमारो गुणनयपरिचारितमती च ॥
कामेषु दोषदर्शी अनर्थिको सर्वकामभोगेषु ।
श्रोत्रप्रकुशलमूलो गृहे न रमति विवेकरतो ॥

payā | 2. M °ṇāya | ayyathāpi nāmāyuṣmaṃ mahāmaudgalyāyana kuñjaro shashṭihāyano durāsadā bhavati upasaṃkramitum | evam eva° BM °maudgalyā° M °jāno kaha° prāptā puru° durāsadā upasaṃkramaṇāya | evam evāyuṣmanta mahāmaudgalyāyanaḥ kshatriyā mūrdhnābhishiktā janapadasthāmavīryaprāptā purushasiṃha durāsadā bhavanti |.

3. B °nāmāyushmaṃ mahāmaudgalyāyana çārdūlā criṇakāyo° M °nāmāyushman mahāmaudgalyāyano çārdūlo criṇakāyo gurudarçanā durāsado° B °rçanā durāsada° syu bhavati upasaṃkramaṇāya | evam ayu cāyu° M °ṇāya | evam eva° BM °maudgalyā° M °tri-ya mū° abhika ja°.

6. M °gāthā adhya°. — 7. B °dāyiṃ bha° BM °dakānāṃ samayo cā°. — 8. B çā-kulanandija° BM °lajānaṃ prasādehi na°. — 9. M °anyo kvacid bhikshu° B °nyo kvacid bhikshu° M °rājñā pra° tuṃ cittaṃ B °tuṃ | cittaṃ nā°. — 10. B anyayatā u° M °tra u° BM °carito bha(M °bhaga)vati |.

11. M °dāyī atī° abhādu bhūmi° B °naṃ abhūsi bhūmipatir nāma°. — 12. B °dharaṇipālo dhā° M °dharaṇipālo. — 13. M °rāja saṃpūjito prā° B °jā | saṃ° koṭīna° BM °hi dha°. — 14. BM °ṃsaha i°. — 15. BM °pūrva(B °rva) buddhānāṃ nā°.

16. B °mena mati° M °timāro gu° B °cāritamati ca kā° M °tha kā°. — 17. BM °rvī | a° M °narthako° BM °sku o°. — 18. M avrūpiakuçala gṛ°.

तं अवच मज्जयंतो पुत्त भुञ्जाहि पणीतकामगुणं ।
वेस्सवणभवनसदृशे अमरभवनसन्निभे वेश्मे ॥
तं अवच मतिसारो दशांगुलिं अंजलिं प्रणामयित्वा ।
नैतानि धरणिपाल धनानि परिभुक्तस्य भाग्यानि ॥
अनुधमभसर्पितानि जरामयग्रस्तानि हि तानि विद्यन्ति ।
. . . .
किं कारणं अनन्धो अन्धस्य वशेन उत्पथं गृह्णे ।
सुप्तान्तस्य वेजागतो कथं स्पृहेया अपायस्य ॥
बद्धस्य कथं मुक्तो वचनेन कारागृहमभिक्रमेय ।
विषमस्य समागमं कथं स्पृहेया नरो विज्ञो ॥
प्रतिभासि मे नरपति अन्धो सुह्यन्तो चिरनष्टो च ।
गुह्यसि कामोघेन अहं च कामां जुगुप्सामि ॥
तस्य च वचनान्त पितुनो आज्ञाये स मतिसारो ।
प्रव्रजे अहित्व राज्यं कुमारो कामां च अनपेक्षो ॥
उरगो वा जीर्णत्वचं पङ्कपिण्डमिव त्यक्त्वा राज्यं ।
सागरान्तमहिं सर्वां सो कामेषु दोषदर्शावी ॥
अतिक्रम्य कामधातुं मतिसारो ब्रह्मविहारमाचरे ।
. . . . कुमारो ब्रह्मत्वगमनाये ॥
प्रव्रजितस्मिं कुमारे अनुव्रतो सो पुरोहितकुमारो ।
नामेन सोमदत्तो अनुप्रव्रजेसि मतिसारं ॥

1. BM tam ava° B °putram bhuñjati pra° M °putram bhuñje praṇītakāmā guṇa B °kāmā guṇam vai°. — 2. B °nabhavana sadṛśe ca a° M °guna a°. — 3. M °gulim pra°. — 4. B naitā° M naiṁ tā° BM °dharaṇipā° B °sya bhavanti | M °sya bhavati | . — 5. BM °jamanamantā(M °nttā) sarāgavaga(M °vasa) hi tāni vijño(M °jñapeyati || kāṁ°.

7. M °ṇam anandho agnasya vasena u° BM °gṛhṇe va°. — 8. B °yā | sttāgasya ba° M °yā | sudhanasya. — 9. BM bandhasya° M °vaśanasya kāraṁbhavaṁ | a° B °kāraṁbhavaṁ | a° ya vi°. — 10. M viṣamasya ° tham nāro spṛhe sa vijño B °spṛhe nare vijña pra°.

11. M °si me na ° yuhya cira° B °suhyantī(sa guṇā) cira°. — 12. B °maghe ca a° M °megha ca kāmāni cugupsyami | . — 13. M tasya ca pakhanasya pi° BM °tasya rājñasya matisāra pra°. — 14. M °vrajahitvaṁ rā° B °hitvaṁ rā ° kāma a°. — 15. B uragā ca jīrṇa tva° M °ga ca ji° BM °tyaja jahitva(M °tvaṁ) rājyaṁ sā°.

16. B °mahiṁ sarva sau kā° M sāgarāntā mahi sarvāṁ °sau kā ° darśī B °darśī | . — 17. BM °krama kā° M °dhātu mati° B °ro brahmaṁ vihāra ācaye | ku° M °m ācaye | ku°. — 18. B °ro brahma° M °ro brahmatvaṁ ga° BM °naye pra°. — 19. B °vrajita smiṁ° M °jitatasmiṁ kumāra anuvratasya purohitasya ku° BM °ro nā°. — 20. BM °mena somada° B °je sya matisāra pra° M °je | sa [illegible] matisāra.

प्रव्रजितस्मिं कु[२९३ᵇ]मारे पिता अकासि स तस्मिं अप्रसादं ।
गत्वान सोमदत्तो प्रसादयेसि धरणीपालं ॥
तत्किं मन्यसि उदायि मतिसारो अन्यः तेन कालेन ।
तेन समयेनाहमेव अनर्थिको कामभोगेहि ॥
तत्किं मन्यसे उदायि अन्यो सो सत्यधर्मो आसि ।
अयमेव सो नरपतिः शुद्धोदनो स तदा आसि ॥
तत्किं मन्यसे उदायि अन्यो सो अनुभ्रातो सोमदत्तो ।
त्वमेव सो अभूषि प्रसादये तत्समयं भाव ॥
तस्मादिदानीं उदायि राजं शुद्धोदनं प्रसादेहि ।
भेष्यति महासमुदयो प्रसन्ने तस्मिं महीपाले ॥
भेष्यति अनन्तफलस्य उपचयः मनुष्याणां कुलपुत्र ।
राजवरप्रसादेन नरवरं त्वरितं प्रसादेहि ॥
संप्रति ग्रामाधिपती अतिमानहतो वितर्कमथितो च ।
तिष्ठति सविषमन्ती गिरितटपतितो यथ नागो ॥
क्रोधहतेन भवन्तो पुत्रो यथ राजसेन परिक्षिप्तो ।
नैवात्मानं न प्रजा जानति यथैव भूमिपतिः ॥
ऐश्वर्यहानिमनुस्मरन्तो ऐश्वर्यं च विचिन्तेन्तो ।
मम आसि अप्रसादं गत्वा त्वं ताव प्रसादेहि ॥

अथ खलु राज्ञा शुद्धोदनो कपिलवस्तुस्य नगरद्वारातो प्रतिनिवर्तित्वा सर्वेण

1. M prajitasmiṁ kumāre pi° BM °aṣāsi | sa° B °apramādaṁ ga°. — 2. M °dayasi ° pāraṁ B °pālaṁ ki°. — 3. BM kim anyasi | udāyi(M °yi) ma° M °anyo sa te° BM °lena te°. — 4. BM °samayena aha° B °m eva abhdaki a° M °m evābhāsiki | a° — 5. B °anyā so ° āsi a°.

7. B kiṁ ma° M kim anya udāsi anyo so °ar° B °dāyi ano° BM °tto tva°. — 8. B tvam eva° M tvam evaṁ so abhūṣi | pra° BM °ādaye ta°. — 9. B tasmāt kāṁ idāniṁ u° M tasmāt khu idāni rājaṁ° BM °dehi bha°. — 10. M °samudayo prasāde ta° B °prasāde tasmiṁ samudayo tasmiṁ ma° BM °le bha°.

11. BM °ti | a° B °ntapālam upacayaḥ ma° M °ntapāram upacayo manuṣyāṇāṁ° BM °putraṁ rā°. — 12. BM rājā vara° B °ādena° BM °hi saṁ°. — 13. B °kyddhiti | a° M °dhipatehi a° BM °mānahato vi° sa ti°. — 14. BM °ṣṭhati(B °ti |) vishamanti gi° gp e°. — 15. M °havato pu° B °yathā rā° M °yathā rājabena ° kṣiptāḥ B °kṣiptā nai°.

16. BM °naṁ prajānāti param evaṁ bhū° M °pati B °patiḥ. — 17. BM aiçvaryahā-yam anusmaro ai° M °ryaṁ ca dayaḥ vicintyanto B °ntanto ma°. — 18. BM °kāṣi apra-sā(M °pramu)daṁ gatvā khalu(M °gharaṁ) prasādehi ||. — 19. M °çākyamuniṇḍalena śāddha sakiyaṁ darça°.

शाकियमण्डलेन सार्धं स्वकायां दृष्टिमात्रायां मन्त्रयामि । तत्र राजा शुद्धोदनो शाक्या शाक्यायित्वाय आमन्त्रेसि ॥ महन्तातो पि ऐश्वर्याधिपत्या भ्रंशित्वा कुमारो प्रव्रजितो । यदि न कुमारो प्रव्रजितो अभविष्य सो राजा भवे चक्रवर्ती चातुर्द्वीपो विजितावी धार्मिको धर्मराजा सप्तरत्नसमन्वागतो तस्य इमानि सप्त रत्नानि भवेन्सुः । तद्यथा । चक्ररत्नं हस्तिरत्नं अश्वरत्नं मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नं एवं सप्तरत्नं । पूर्णं चास्य पुत्रसहस्रं भवेत् शूराणां वीराणां वरांगरूपिणां परसैन्यप्रमर्दकानां । सो इमानि चत्वारि महाद्वीपा सागरगिरिपर्यन्ता अखिलामकण्टकां अदण्डेनाशस्त्रेण समुत्पीडेन धर्मेण शान्तिनिर्जित्वा अध्यावसिष्य राजान सहस्रेषु च परिवृतो भवेय तेषामवकाके इमोत्रं चक्रवर्तिराज्यं समभिवयन्ते वयं कुमारेण प्रव्रजितेन महन्तातो ऐश्वर्याधिपत्यातो भ्रंशिताः ॥

अथ खल्वायुष्मानुदायी न्यग्रोधा[294a]रामातो वैहायसमभ्युद्गम्य राज्ञो शुद्धोदनस्य शाकियमण्डलपरिवृतस्य पुरतो तालमात्रं वैहायसमन्तरीक्षे अस्थासि ॥ अद्राक्षीद्राजा शुद्धोदनः आयुष्मन्तं उदायिं तालमात्रं वैहायसमन्तरीक्षे तिष्ठन्तं दृष्ट्वा च पुनः हृष्टो तुष्टो शीघ्रशीघ्रातो उत्थायासनातो एकांसमुत्तरासङ्गं कृत्वा येनायुष्मां उदायि तेनाञ्जलिं प्रणामेत्वा आयुष्मन्तमुदायिं गाथाये अध्यभाषे ॥

कुतस्त्वमागच्छसि रत्नचीवर
केन त्वमर्थेन इहानुप्राप्तो ।
किं वाच आकांक्षसि त्वं उदायि
सुदुर्लभं सिद्धव्रतान दर्शनं ॥

1. BM °no śākya śā° M °pitayasya â° BM °mantresi ma°. — 2. B mahântâto pi° M mahânto pi ° tyâ pâtayitvâ° B °tyâ pâtravitvâ ku° M °jitaḥ B °to pa°. — 3. B °vijayaṁ | so° M °vishyaṁ so° B °kravartti câ° M °imâni sapta ratanâni bhaveyuḥ B °imâni bhaventuḥ |. — 5°. M °saptamaṁ ratnaṁ B °pûratnam pa°.

6. B puri elaya° B °bhavet | çûrâṇâṁ varâṇâṁ° M °bhavet | çû ° rûpiṇâṁ pa ° pramardaka° BM °kânâṁ so°. — 7. B imâṁ catvâ° M °dvîpânâṁ sâgaraṁgiriparyantânâṁ akhilâṁ akaṇṭhakâṁ ada° BM °tpîḍadha° M °reṇa vâ abhijinitvâ° B °dhyâvasitvyaṁ râjâ° M °sishyaṁ | râjâ ° reyo tamakâmi asmâ° B °saptaṁ cakra° BM °sishyam te sayaṁ kumâ(B °mâra)ṇa pra° M °mahatâto ai ° dhipatiâto bhraṁçâ°.

11. M °danasya çâkyamaṇḍalasya pari°. — 13. B °kshid râtâ çu° M °dam âyushmantam udâyiṁ tâdâla° B °udâyi tâla° M °rikshaṁ tishṭhantaṁ dṛ° B °shṭhantaṁ dṛ ° naḥ dṛishṭo° M °syapîâ utthâ ° ekâṅçam u° BM °ttarâsaṅgaṁ° M °yi ushâṁja ° tvâ âyushmam udâyiṁ gâ°.

16. M kuto tvam â ° cîvarantvam tvam a ° prâptaḥ B °pto kim°. — 18. B kim vâ tvam âkâṅkshasi tvaṁ° M kiṁsvaprâptaḥ âkâṅkshasi tvaṁ udâyi su° B °durlabhâ siddha ° M °durlabhâ siddhadevatâu darçanaṁ |.

लाभास्ते राष्ट्राधिपते शिरीमतो
यस्य तव पुत्र नराणमुत्तमः ।
तेजेन ओभासति सर्वलोकं
सहस्ररश्मीव उदेन्त मेदिनीं ॥

एवं दानि स्थविरेण उदायिना तावन्मात्रं वैहायसमन्तरीक्षे स्थितेन बहूनि बुद्धमाहात्म्यानि परिकीर्तितानि तानि च राजा शुद्धोदनो श्रुत्वा प्रीतो संवृत्तो ॥ सो दानि शाक्या शाक्यायिन्यश्च आमन्त्रयति ॥ सर्वथापि नाम भणि शाक्यो सूर्यस्य अभ्युदेन्तस्य एतं पूर्वंगममेतन्निमित्तं यदिदं अरुणो उदायी भो सर्वसंशयच्छेत्ता सुगतस्य श्रावको ॥

बुद्धस्य पुत्रो परमार्थदर्शी
उपागतो शाक्यकुलं तदन्तः ।
प्रसादये शाक्यगणं इहैव

. . . .

आशाय कृष्यते क्षेत्रं बीजमाशाय वप्यते ।
आशाय वाणिजा यान्ति समुद्रं धनहारका ।
यो यस्य आशाय तिष्ठामि सा मे आशा समृध्यतु ॥
पुनर्पुनः चिय वपन्ति बीजं
पुनर्पुनः वर्षति देवराजः ।
पुनर्पुनः वर्धति बीजयानं
पुनर्पुनर्लाभं लभन्ति कर्षिका ॥

1. M lābhāstu rā° B lābhanu rāṣṭrādhi° BM °to | ya° M °narāṇāṃ uttamaṃ ja° B °mah te°. — 3. M jeta na to lok° B °jena to lok° M °loko saha° B °kaṃ saraśra° M °raçmi iva udayati me° B °udeti me° BM °dinī | . — 5. M °ntarikṣe ° hātmāni pari° BM °tto sa°.

7¹. B °ni çākya çā° M °ni çākyo çākyayi°. — 7². B °nāma sarvāṅgiṇā ° bhyuddanta° M °bhyuddanāttasya etaṃ pū ° m etaṃ pūrvanimittaṃ yam idaṃ° B °u nirmittaṃ yad idaṃ aryudāyī° M °daṃ aryya udāyino ° çayakchettāraṃ su ° vako bo° B °vako bo°. — 10. BM °rthadarçino upā(B °pa)gamo çākyakula tadanta(M °taratta)ra pra°.

12. B praçādaye çākyamahāntaṃ evaṃ | ā° M °ye çākyamamahāntaṃ ā°. — 14. BM °traṃ vīja(B °jaṃ)m āçāya vāpyate | . — 15. M āçāya vāṇijā yānti sa° B °dhanahārakā | M °nahārakā.

16. M yo yasya āçāya tiṣṭhāmi | sā me āçā sa° M transpose ici les lignes 1–5, p. 109, avant la ligne 17, puis répète la ligne 1, p. 109. — 17. M °rpunar kahiyra° BM °vayanti vījaṃ(M °jaṃ |) puna° M °rājaṃ | . — 19. M °naṃ | pu ° nah lābhaṃ labhaṃni ka°.

पुनःपुनर्याचनका उपेन्ति
पुनर्पुनः सत्पुरुषा ददन्ति ।
पुनर्पुनः सत्पुरुषा पि दत्वा
पुनःपुनस्स्वर्गमुपेन्ति स्थानं ॥
दुर्लभो पुरुषाजन्यो न सो सर्वत्र जायते ।
यत्र सो जायते वीरः तं कुलं सुखमेधति ॥
वीरो हि वै सप्त युगां पुनाति
यस्मिं कुले जायति भूरिप्रज्ञो ।
पितेव शाक्या नयति देवदेवो
तथापि जातो भुवि सत्यनामः ॥
शुद्धोदनो नाम पिता विभक्त
बुद्धस्य माया इति नाम माता ।
या बोधिसत्वं परिहार्य कुक्षिणा
कायस्य भेदात्स्वर्गेषु मोदति ॥
सा मोदति कामगुणेहि पञ्चहि
इष्टेहि कान्तेहि बुद्धस्य माता ।
चतिरिव ...... पुण्यकामा
परिवारिता अप्सरसां गणेहि ॥
पुत्रस्य बुद्धस्य असङ्गतायिनो
गंभीरसत्वामतिमस्य तायिनो ।
प्रीतः पिता हर्षित एष शाक्य
[१९४b] धर्मेण त्वं गौतम आर्षको सि ॥

राजा आह ॥

यस्मान्निमित्ते प्रव्रजितो सि भिक्षु
अर्थाय सो चरति ब्रह्मचर्यं ।

1. B °r yācakā u° M punarpu°. Dans la répétition de ce vers M lit : punarpunaḥ yā° upeti. — 3. BM °ruṣakāi datvā(M °tvā ‖) punaḥ° M °naṃ | pu°. — 5. M durllabho°.
6. M °vīro taṃ° BM °ṃ evaṃ ‖. — 7. M °punāti yasmiṃ° B °jāyate bhūriprajña pi° M °prajñāḥ pi°. — 9. M pito śākya na° [illegible] trayā hi yāta° nāma |.
13. BM °rihārya(M °hārya) sāpi sa kukṣi°. — 15. M sa mo°.
17. BM °riva pu° puranaṃ pu°. — 19. BM putrasmiṃ ba° M °nāgāra° BM °rasaya pra°.
21. BM prītaḥ pitā(B °to) [illegible] (M [illegible] ° [illegible] gautama° M °kaṃ ‖. — 25. M °vrajito u° BM °sa brahmacaryaṃ ca°.

न सो भीतो नापि भयं उपेति
एको पि सो रमति वृक्षमूले ॥

उदायी आह ॥

यस्यार्थिके प्रव्रजितो सि राज
तस्यार्थ सो चरति ब्रह्मचर्यं ।
न सो भीतो नापि भयं उपेति
एको पि सो रमति वृक्षमूले ॥
एवं चरन्तं मुनिमप्रमत्तं
निन्दाप्रशंसासु अवेधमानं ।
सिंहो व शब्देषु असंत्रसन्तं
वातं व जालस्मिं असज्जमानं ।
नेतारं अन्येषु अनन्यनेयं
धीरं जिनं श्रावक वयं वदेमि ॥
यं वेदयसि अनोपमप्रज्ञं
मह्यं पुत्रं तस्य पिता ति ब्रूमि ।
पुत्रस्य तस्य मह्य पुत्रो भोसि
भुक्तान भिक्षु इह पिण्डपातं ॥
एष्याम वयं अपि दर्शनाय
बुद्धं अनन्तिवरं वितीर्णकांक्षं ।
लोके उद्पासि न सत्वसारो
पुत्रं मह्यं यथा वदेसि भिक्षु ॥
भुक्तान भोजनं दायद्यं
शुचिं प्रणीतं रसस्वादुपेतं ।

1. BM so bhī° pati | u°. — 4. BM °rājā pra°.

6. M na pabhīto° B °bhayam u°. — 8. BM ekam varantaṁ muni° M °ttaṁ | nindāpraçaṁçāsu avepamānaṁ B °çāsu avepamāna anih°. — 10. BM °ho va ça° B °asantasantaṁ° M °asantasantaṁ | vātaṁ ca jālasmiṁ asajjamānaṁ B °jālasmiṁ°.

12. BM °yaṁ (M °yāṁ | yaṁ) bhīrodinaṁ ° demi | . — 14. M °prajña mahyaṁ | pitā ti me bravmi B °hyaṁ pitā ni bravmi | .

16. BM °tahiṁ ma° B °bhuktvā bhi° BM °bhuttikā hi bhi° M °kalu bana pi°. — 18. M yasyāma° B esyāma° BM °vayaṁ pi° M °vaṁ viçaraṁ vitīrṇapakāṅkahā | B °vaṁ vitīrṇakāṅkahāṁ lo°. — 20. B °si satvasāro | pu° M °si satvasāra putra ma° BM °bhikṣuḥ.

22. M gupitā ca so bho° B bhuptkā ca bho °rihaṁ | çu° M °çucipra° B °nasaṁ svādupetaṁ so° M °svādrupetaṁ | .

सो प्रक्रमे पिण्डपात्रं गृहीत्वा
उपसंक्रमे येन जिनो अग्रेयो ॥
सो तं प्रदेशं उपसंक्रमित्वा
उपनामये पिण्डपात्रं जिनस्य ।
वन्दित्व पादां अवचि तथागतं
याचन्ति ते ज्ञातयो दर्शनाय ॥
एदृशां गुणां श्रुणित्व भूमिपालो
विपुलमुदानयति सुलब्धा लाभा ।
मह्यं अनन्ता यं त्रिसाहस्राय
लोकधातूये जिने जीवमाने
भविष्यति संभ्रमो नायकेन ॥
संपुष्पिता द्रुमलता कुसुमावलीयो
आसेविता च द्विजसंघनिनादितेन ।
एवं पि मह्यं हृदयं प्रीतिसंकुसुमितं
श्रुत्वान पुत्रं मम सर्वगुणोपपेतं ॥

अथ खलु राजा शुद्धोदनः अभ्यन्तरं राजामात्यमामन्त्रयति ॥ भो भणे अमात्य सर्वार्थसिद्धो कुमारो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धित्वा प्रवृत्तवरधर्मचक्रो कपिलवस्तूपवनेषु अनुप्राप्तो । ततः पुत्रस्य सर्वार्थसिद्धस्य कुमारस्याभ्युद्गमनं करिष्यामि ॥ ततो कपिलवस्तुनगरे घोषणां कारापेहि । सर्वेहि शाक्येहि ब्राह्मणगृहपतिकेहि सर्वेहि च गान्धर्विकेहि सर्वेहि च श्रेणीहि सर्वेहि च शिल्पायतनेहि मया सार्धं सर्वार्थसिद्धस्य प्रत्युद्गमनं कर्तव्यं ॥ साधु महाराजेति ॥ सो राजामात्यो शुद्धोदनस्य प्रतिश्रुत्वा क्षिप्रमेव कपिलवस्तुनगरे चत्वरशृंगाटकचत्वरापण-

1. M so pakra° B °upanāmaye yena jāna a° M °upanāmaye pimḍa° (l. 4). — 3. M °ya piṁḍapā° B °traṁ | ji° BM° aya va°. — 5. B °nditvā pā° BM °taṁ | yācyaṁti ° mhya īmedṛ°.

7. BM imedṛ ° nitvā bhūmipālā | trikhuttaṁ (M °la trishkṛityaṁ) u ° ti lābhā sulabdhā- (M °labha) ma°. — 9. BM mahyam anantāya tri ° ya loke dhātūye jīva° B °shyati | saṁ ° kena saṁ°.

12. BM °kusumitā (B °tāya) kirṇṇa āsevanti dvi ° ditāni ||. — 14. BM edṛçaṁ pi° B °mitaṁ | çru° BM °tvā putraṁ sarvaguṇopetaṁ ||.

16a. M °dana a°. — 16b. B ho bha° M ho bhaṇe amatya ° kumāro [illegible] °paramaṁ anuprāptaḥ ta°. — 18. M tasa pa ° naṁ kartavyaṁ | . — 19a. M sādhu [illegible] kārayati B °nāṁ kārayati | . — 19b. M °gṛihapatehi sa rājā° (21b) B °na gandharvi ° vyaṁ sa°.

21a. B sādhu ma°. — 21b. B °leva[illegible] nagaraṁ catva° M °levastuṁ [illegible]nagaraṁ catvaraṁ çriṁghāṭakaṁ antarāpaṇa ma° B °nāmāyapaṇa°.

मुखेषु घोषणां कारयति ॥ भगवन्तो सर्वार्थसिद्धकुमारो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धित्वा कपिलवस्तूपवनेषु अनुप्राप्तो । [११५ᵃ] ततो सर्वभवन्तेहि राजा शुद्धोदनेन सार्धं भगवतो प्रत्युद्गमनाय गन्तव्यं ॥

शाक्यानां वंशगतो भेष्यति यो ह्य चार्यं
सिद्धाभिप्रायो तृष्णाविरक्तचित्तो ।
क्षीणास्रवो विगतरागो अनंतचक्षुः
दुःखामथ द्वादशवर्षं अनन्तप्रभो ॥
आर्यदर्भेरिरयं श्रुत्वा शाक्यराष्ट्रे
संगीतिं दैवगणवादितं लुम्बिनीये ।
येन प्रतिज्ञा कृता बुद्धो भविष्यं लोके
सो एष्यति भूतयशो विगतान्धकारो ॥
प्रक्रान्तो सप्तपदं यो इह लुंबिनीये
बोध्यङ्गसप्तरत्नानि अनुबुध्ये येन ।
यो सिंहनादं नदते अहं लोके ज्येष्ठो
सो एष्यति परवादप्रभञ्जनागो ॥
येनेदं अपकृतं गर्भगृहं अशेषं
उच्छोषितो च मे पुनः भवोहः सर्वं ।
उच्छोषिता तृष्णलता च दुःखस्य मूलं
सो एष्यति बंधमोक्षं करोन्तो लोके ॥

ते दानि कपिलवस्तुतो शाक्या शाक्याधिपस्य तं घोषं श्रुत्वा क्षिप्रमेव राजकुलद्वारे

1. M bhavanto sarvā° B °ūtayā saṁmya° M °lavastupava° prāptaḥ. — 2. M tato sarve bhavanta° BM °hi | rājā ça° M °na sārdha bha°. — 5. BM çākyānāṁ (M °nāṁ) çakale gate bhaviṣyati | jagasya trāṇaṁ (M °sya çrāṇāṁ) aï ° yo tribhavāna vi(M °vāu vijña ° tta kaḥ)°.
6. B °kaluṣ dukshāṁ atha° M °kaluṣ ukshām atha° BM °rabuhi anantaprajñāna ananda°. — 8. BM °bhaṇitena çrutvā çākyarāṣṭraṁ saṁgītā devatayana (M °yacajhatam la° B °niye ya°. — 10 M °kṛta bhaviṣyaṁ | lokeṣu bhaviṣyati bhū° B °viṣyaṁ lo° BM °kāro yo pra°.
12. B °nīe | sapta padāni yaḥ i° M °padāni | yo i° BM °ratnāni anubuddhya (B °dhye) tena yo°. — 14. BM °siṁhanadita aham° B °jyeṣṭo so° BM °nako ya°.
16. BM °daṁ prakṛtā garbhagajanaṁ asesaṁ (M °ṣaṁ) ucchoṣitaṁ | (B °ucchoṣito) me punaḥ bha (M °nar bhaṇ)va° B °sarvaṁ u° M °sarvaṁ ucche°. — 18. B ucchoṣitā tṛṣṇālatā jālinī duḥ° M °ṣitā tṛṣṇālatā jālinī duḥ° BM °ti bandhanamoca ° karoti lo°. — 20. M °stuto mahānagarāto çākyaçākyaṁ° BM °dvāre saṁnipatito sa (M °te | sa) ka° B °hitapramukhāyā brāhma° BM °çreṣṭhipramukhā sarvi° M °gṛhaka sarve° B °kapilasā° M °vāstavyā ça°.

संनिपतिता सकुमारामात्या भटबलाग्रा पुरोहितप्रमुखा ब्राह्मणाः श्रेष्ठिप्रमुखो वणिग्ग्रामो सर्वे च ये कपिलवास्तव्या गन्धर्विका । तद्यथा चक्रिकवेतालिकनटनर्तकऋल्लमल्लपाणिस्वरिका शोभिका लंघका कुम्भतूणिका वेलम्बका द्विस्वलकायका पंचवटुका गायनका भाण्डविका हास्यकारका भेरीशंखमृदंगपटहिका तूणवपणववेणुवल्लकीएकादशीवीणावाद्या च वाद्यवाचका च सर्वे राजकुलद्वारे संनिपतेन्सुः । सर्वे च कपिलवास्तव्या श्रेणियो । तद्यथा सौवर्णिका हैरण्यिका प्रावारिका शंखिका दन्तकारका मणिकारका प्रस्तारिका गन्धिका कोशाविका तैलिका घृतकुण्डिका गौलिका वारिका कर्पासिका दधिका पूपिका खण्डकारका मोदककारका कण्डुका समितकारका सक्तुकारका फलवाणिजा मूलवाणिजा चूर्णकुट्टगन्धतैलिका आजीवनीया याविदका गुडपाचकाः खज्जपाचकाः शुण्डिकाः सीधुकारकाः शर्करवाणिजा । एते चान्ये च नगरव्यवहारिका सर्वे राजकुले संनिपतेन्सुः । सर्वे च कपिलवास्तव्या शिल्पायतना । तद्यथा लोहकारका ताम्रकुट्टा सुवर्णकारका त्रपुकारका प्रभोपका रौपिणो वपुकारका शीशपिण्डकारा जतुकारका मालाकारा पुरिमकारका कुम्भकारा चर्मकारा ऊर्ण[295b]वायका वल्कलतन्त्रवायका देवतान्तवाया चैलधोवका रजका शुचिका तन्तवाया चित्रकारका वर्धकिरूपकारकाः कालपात्रिकाः पेलकाः पुस्तकारकाः पुस्तकर्मकारका नापिता कल्पिका छेदका लेपका स्थपतिसूत्रधारका उच्छोडकारका कूपखनका मृत्तिकावाहका काष्ठवाणिजा तृणवाणिजा शंखवाणिजा वंशवाणिजा नाविका चोलुम्बिका सुवर्णधोवका सौण्डिका । एते चान्ये च उच्चावचा जनता हीनोत्कृष्ट-

4. B °thā ca krīra te tah° M °ca krīḍāte tarikamaṭa ° pāṇisvaritvariṇakhi° BM °ubhatuṇikā velañba(M °velaṃ)kāḥ dvistri(M °dvitri)kā ° ṭukā gāya° BM °daṃgapaṭa(B °ṭa-hi)kā tūṇapaṇavavīṇa(M °vakīnā)vallakīekādaçivīnā ete vādya ca ka ° dyakānāṃ sarve rā° B °ṃnipatitetsuḥ | sa° M °nnipatetsuḥ sa°.

6[b]. M °lavāstavā çreṇiyo || B °lavastavyā çreṣṭhiyā || . — 6[c]. M °suvarṇikā hai ° prastārakā gandhikā nāvi° B °nlikā koṃvikā tai° M °gaurikā vā° BM °rpāsika dadhyi° B °modakāna° M °modakārakā kaṇḍrakā samitakārakā çaktu° B °guḍapācakāḥ kha° M °ḍapācakāḥ çuṇḍhipācakāḥ sīṃdhurakārakā ça° B °ṣīdhukārakāḥ ça° M °rkkaravāṇijāḥ.

11. B °patetsuḥ || . — 12[b]. M °yatanāḥ || . — 12[c]. M °lohakārakā tāmra° BM °ddhu(M °ddhura)kārakā prabhopa(M °prabhropra)kā rohiṇa tra(M °ḍa)kārakā çītapiṭṭitā jantu(M °ttikā jaṃtu)kārakā mālākārā(M °lākārakā) purimakārakā kumbha(M °rakāṃ kumbha)kārā(M °rakā) carmakārā turaṃ(M °rāṃ tuḍa)vāyakā varūṭantra vā° M °cairadhavakā raja° B °cailadhavakā raja ° kārapatrī° M °citrakārakā vaddhakirūpakārakāḥ kālapatrī ° rasakārakā nāvikā kalpikā chedakārakā sthapatisūtrakārakā ujjā gaṇḍapārakā° B °sthapatimukārakā ucchragaṇḍapārakā° B °tikāvāhakā kāshṭavāṇijā tṛ° M °tṛṇavāṇijā vaṃçavāṇijā staṃbavāṇijā nāvikā [illegible] ca° B °vikā [illegible] ca° M °[illegible] saṃmbikāḥ. — 19. BM °uccavacā° M °kulaḍā° BM °patetsuḥ || .

मध्यमा सर्वे राजकुलद्वारे संनिपतेन्सुः ॥ एवं दानि राजा शुद्धोदनो रथेन च जनकायेन अन्तःपुरेण सार्धं कुमारामात्येहि परिवृतो धनुकरपिटकहस्त्यारोहेहि सार्धं चतुर्घोटरथमभिरुहित्वा श्रेष्ठिप्रमुखो निगमो सार्थवाहप्रमुखो वाणिजग्रामो पुरोहितप्रमुखा ब्राह्मणा अष्टादश श्रेणीयो पुरस्कृतो परिवृतो महता राजर्द्धीये महता राजानुभावेन महतो जनकायस्य हक्कारहिक्कारभेरीमृदंगपटहशंखसंनिनादेन कपिलवस्तुतो नगरातो निर्यात्वा येन न्यग्रोधारामस्तेन प्रस्थितो भगवतो दर्शनाय ॥ भगवतो दानि एवं भवति । अभिमानिनो शाक्याः यदि साथ स्वके आसने निषण्णो प्रतिसंमोदयिष्यामि अत्र मानं नविष्यति चित्तस्यान्यथात्वं कथं हि नाम यो कुमारो चक्रवर्तिराज्यमपहाय प्रव्रजितो अनुत्तरां सम्यक्संबोधिमभिसंबुधित्वा धर्ममधिगतो धर्मस्वामी आत्मानं प्रतिजानाति सो पितरं च वृद्धतरां च गुरुस्थानीयां च न प्रत्युत्थिहति । नास्ति च सो सत्वो वा सत्वकायो वा यस्य तथागते प्रत्युपस्थितस्ये न सप्तधा मूर्धा स्फलेया । यन्नूनाहं पौरुषमात्रं वैहायसमन्तरीक्षे दीर्घं चंक्रमं चंक्रमेयं ॥

अथ खलु भगवां पितु राज्ञो शुद्धोदनस्य शाक्यमण्डलस्य च नामालिमात्रं ज्ञात्वा आगमनं विदित्वा पौरुषमात्रं वैहायसमन्तरीक्षे दीर्घं चंक्रमं चंक्रमति अस्पृशन्तो पादतलेहि भूमिं ॥ अथ खलु राजा शुद्धोदनो दूरतो एव न्यग्रोधारामे भगवन्तं पश्यति पौरुषमात्रं वैहायसमन्तरीक्षे दीर्घं चंक्रमं चंक्रमन्तं अस्पृशन्तं पादतलेहि भूमिं दृष्ट्वा च पुनः आश्चर्याद्भुतसंहृष्टरोमकूपजातो आश्चर्यं यादृशं कुमारेण ध[296ᵃ]र्मो अभिगमितो यथा सर्वलोके द्विपदानमुत्तमो ॥ अथ खलु राजा शुद्धोदनो शाक्यो शाक्यानामामन्त्रयति ॥ पश्यथ भवन्तो येन कुमारेण संक्रमो

2. M °kumârâmâtya ° dhanukârapiṭhakârohe° B °dhanukârathikâthikârohe° M °ghoṭaṃra abhi° B °ghoṭakena abhi ° śreṣṭhipramukho ni° M °ṣṭhipmukho ni ° hapramukho vaṇi° BM °hitapramukho brâ° B °râjariddhi° M °riddhiye° BM °rena mahatâ janakâyasya hakkâ; B °krâ; opikkâ; B °krâ; rabhe° B °pradhvâ; bana to°.

7. B Abhimâ° M °ṇâkyâ yadi° B °na | atha° M °atha mânaṃ bhaviṣya cî ° rtitâṃyaṃ apahâ° B °bhisaṃbodhitvâ dharmam adhiga° M °saṃbuddhitvâ dharma adhi ° guruṇâṃ gurusthânîyaṃ ca na° BM °pratyutthihati ||.

11. B °taka ya sa° M °tyastâ ° mûrddhâ sphâlayâ | B °rddhaṃ sphâlayâ ||. — 12. B °riṣâkaṃ di° M °ryânaṃ caṃkramâmeti°. — 14. B °laṣya ca nâmadhânanaṃ jñâ° M °dirgha cikramati | aspṛśaṃto pâdatalehi° B °ti | aspṛ°.

16. M °dhoravâna bha° B °ryati | pauru° M °dirgha caṃkramaṃ caṃkramantaṃ | aspṛ° B °maṃ caṃkramaṃ | aspṛśaṃto pâ° M °yanto pâdatalehi bhûmîṃ paśya ° punar âçcarya° BM °hṛṣṭaromakû; M °kujaya° M °to âçcaryaṃ yâdṛ ° rena mama abhigamito || ya°. — 19. BM °na çâkyâ çâkî° B °ti ya°. — 20. B °bhagava° M °ḍaṃ vicintya yaḥ° BM °athagata dra° M °akuṃ sarvajño sarvajño sarvadha° B °bhijñâta anekakalpaṃ° BM °abhisthâna° B °samâmiddhapâtraṃ ahṛ° M °siddhanaṃ°.

शिक्षितो मार्गयता द्रष्टुं सर्वज्ञं सर्वधर्मेष्वनिश्रितसंकथ्यं सर्वसिद्धं नरेन्द्र सो पश्यतु सिद्धार्थं सर्वसिद्धिसंप्राप्तं ॥

दृष्टान पूर्वं परिपूर्णकायं
सुलक्षितं लक्षणचित्रितांगं ।
पञ्चदशे यथ एव चन्द्रो
परिवृतो नक्षत्रतारकेहि ॥
दृष्ट्वा सुरूपं चलमानकायं
तमायताक्षं शिरिये ज्वलन्तं ।

. . . .

अथ खलु राजा शुद्धोदनो यावतकं यानस्य भूमि तावतकं यानेन यात्वा यानातो प्रत्योरुह्य सान्तःपुरेण सार्धं शाकियगणेन च पदसा येव न्यग्रोधारामं प्रविष्टो येन भगवांस्तेनोपसंक्रमित्वा मूर्ध्ना भगवतः पादौ वन्दित्वा गाथामध्यभाषि ॥

इदं तृतीयं तव भूरिमेध
पादानि वन्दामि समन्तचक्षुः ।
यं च ते नैमित्तिका व्याकरेन्सुः
यं जम्बुच्छाया न जहे इमं च ॥

अथ खलु भगवां न्यग्रोधारामे तालमात्रं वैहायसमन्तरीक्षे स्थित्वा विविधविचित्राणि यमकप्रातिहार्याणि करोति । हेष्टिमं कायं प्रज्वलति उपरिमातो कायातो शीतलस्य वारिस्य पंच धाराशतानि स्यन्दन्ति । उपरिमे काये प्रज्वलिते हेष्टिमातो कायातो शीतलस्य वारिस्य पंच धाराशतानि स्यन्दन्ति ॥ अथ खलु भगवाञ्ज्वलन-

3. BM °kāyaṃ | su° M °kāyaṃ | sulakṣaṇapuṇyalakṣitaṃ ci° B °taṃ lakṣaṇaṃ ci° BM °tāṃ-gā pa°. — 5. BM pañcamāsi(M °tra) yathaiva candro° BM °vṛtālakṣaṇa°.

7. BM °paṃ pravamānakāyaṃ ta° M °śiriyaṃ jvalamānaṃ || B °mānaṃ || atha°. — 10. M °na yāvatakaṃ yānasya bhūmiṃ tāvantakaṃ yāna° B °yānā yānāto pratyora° M °pratyoru° BM °hya sa antaḥ° B °siddhaṃ sākiyagaṇeṇa° M °padasyāyena ca nya° B °sā yena nya° M °ndhitvā bhagavato pādau śirasā vandi ° thām adhyabhāṣati || .

14. BM °bhūmiprajña vadāṃ te(B °u te |) vandi ° kṣuḥ yaṃ°.

16. BM yaṃ ca naimittikā vyākaresu(B °tuḥ |) yaś ca jambucchāyā na jahatur i-(M °tuḥ) imaṃ ca tṛtīyaṃ(M °yāṃ) || . — 18. M °dhārāmaṃ tā ° ryāṇi karo° B °roti ka°. — 19. B °heṣṭimaṃ° M °jvarati uparimātre kāyā°. — 20. BM uparimaṃ kāyaṃ pra° B °heṣṭimā° M °śatāmyatāni gra°

21. M °jvalana śikhāyāṃ varṣaparidāhya s ° tā varṣakacchakarṣyo° B °kaldara°

यथानुचियेन अभिनिर्मिणित्वा अन्तरीक्षे पर्यङ्कसमुपेतो पुरस्तिमायां दिशायां अन्तरहितो पश्चिमायां दिशायां प्रादुर्भवति । पश्चिमायां दिशायां अन्तरहितः पुरस्तिमायां दिशायां प्रादुर्भवति । उत्तरस्यां दिशायां अन्तरहितो दक्षिणायां दिशायां प्रादुर्भवति । दक्षिणायां दिशायामन्तर्हितो उत्तरायां दिशायां प्रादुर्भवति ॥ एवं दानि महाप्रातिहार्यं विस्तरेण कर्तव्यं ॥ तत्र दानि बहूनि प्राणिकोटीशतसहस्राणि भगवतो एतूर्श ऋद्धिप्रातिहार्यं दृष्ट्वा प्रमुदिता प्रीतिसौमनस्यजाता संवृत्ता आश्चर्याद्भुतप्राप्ता हक्कारसहस्राणि प्रवर्तेन्ति ॥ महाप्रजापतीय दानि गौतमीय यदा भगवानभिनिष्क्रान्तो तस्या रुदन्तीय शोकेन च अक्षीणि पटलेहि च संछन्ना अन्धा संजाता । तहिं च यशोधरामे भगवतो विविधानि विचित्राणि यमकप्रातिहार्याणि करेन्तस्य हक्कारसहस्राणि वर्तन्ति महाप्रजापती गौतमी यशोधराये पृच्छति । किं एते हक्कारसहस्राणि कुर्वन्ति ॥ यशोधरा आह ॥ एषो भगवां वै[296b]हायसमन्तरीक्षे विविधानि विचित्राणि यमकप्रातिहार्याणि करोति नापि त्वं पश्यसि ॥ यशोधरा आह ॥ आगमेहि अहन्तव करिष्यामि यथा त्वं पश्यसि ॥ ताये दानि यशोधराये यत्र भगवतो प्रातिहार्याणि करोन्तस्य कायातो पंच धाराशतानि स्रवन्ति ततः उदकाञ्जलिं पूरेत्वा महाप्रजापतीये गौतमीय अक्षीणि आसाञ्चितानि तानि च पटलानि बुद्धानुभावेन भिन्नानि । तस्या दानि यथापौराणा शुद्धा विमला दृष्टि संजाता ॥

अथ खलु भगवां वैहायसमन्तरीक्षे विविधानि विचित्राणि यमकप्रातिहार्याणि कृत्वा बहूनि प्राणिसहस्राणि ऋद्धिप्रातिहार्याणि दर्शयित्वा आर्यधर्मेषु प्रतिष्ठापयित्वा प्रज्ञप्त एव आसने निषीदे ॥ अथ खलु राजा शुद्धोदनो शाक्या च भग-

M °purastimāyāṃ diçāyāṃ prādurbhavati | paccimāyāṃ diçāyāṃ antarhito purastimāyāṃ diçāyāṃ prādurbhavati | u°.

3. B uttarasyāyaṃ diçāyam antarahito uttarā° (lacune sans.) M °syāyāṃ diçām antarhito dakshiṇāyāṃ diçaṃ prā°. — 4. M dakshiṇāyāṃ diçāyām anta° B °ttarāyaṃ diçāyaṃ prā°. — 5¹. M °hārya vi°. — 5². BM °bahuni prā° M °kojīsahasrāṇi bhu° B °vṛttāḥ ā° M °vṛttāḥ B °ptā hakvāra ° vartanti | M °vartanti.

7. B °jāpati | ya dāni° M °gautamīyaṃ yadā bhu° B °aya rudanta ço° M °syā ...naiva ço° B °akshīṇi paṭalehi ca saṃcchu° M °talena ca saṃcchannā andhā saṃjātāḥ. — 9. B °trāṇi yama ° sya hakvāra° M °sya hakāra ° B gautamī ; yaço°.

11¹. BM °hakvāra° M °kurvati. — 12. B °trāṇi yama°. — 13². BM māgame°. — 14. M tāyaṃ dā ° dharāye yatraṃ bha° B °dharāye yatraṃ bha ° hāryā ka M °to prātihā ° nti | tato u° B °nti | tataḥ° BM °lih pūra ° gautamīye akshiṇi ārvīdhitāni°.

17. BM tasya dā ° rājñaṃ çuddhā (B °ddho) vi°. — 18. BM °yamakaprātihāryāṇi kṛtāni ba° B °aṇi riddhiprātihāryāṇi da° M °çayitvā aryyadha ° pta eva ° BM °ne nishide |. — 20. M °çākyāç ca bhagavato pādau ° sahitaṃ ca pra ° detaḥ B °detaḥ |.

वतः पादौ शिरसा वन्दित्वा भगवन्तं साधु च सुष्ठु च प्रतिसंमोदित्वा एकमन्तं निषीदिंसु । महाप्रजापती गौतमी च यशोधरा च सार्धं च अंतःपुरेण भगवतः पादौ शिरसा वन्दित्वा भगवन्तं प्रतिसम्मोदित्वा एकमन्ते निषीदिंसु । अथ खलु राजा शुद्धोदनो वेगजातो भगवतो हिताहितं अपृच्छे ॥

तं देववर्णं सुकुमाररूपं
उद्यानभूमिं अनुचंक्रमन्तं ।
पिता पुत्रं प्रांजलिको उपागमे
इन्द्रं व देवा त्रिदशा व शक्रं ॥
इदं तृतीयं तव भूरिप्रज्ञ
पादान्ति वन्दामि समन्तचक्षुः ।
यं च ते नैमित्तिका व्याकरेंसु
जंबुच्छाया न विजहे इमं च ॥
ते देववर्णा उभये समागता
बुद्धो च बुद्धस्य पिता च राजा ।
उपशोभति लावणे नियन्तो
चन्द्रो यथा नक्षत्रगणा प्रमुखो ॥
अथाप्रमेयस्य पितुरभूषि
चिरस्य दृष्टान प्रियं समापे ।
पुत्रं स्वकं मानसमं नियन्तं
हिताहितं पृच्छति वेगजातो ॥
पुरा तव कम्बलपादुका च
शुचिका सूक्ष्मान्तरसंस्थितासु ।

1. M °pati gau° B °gauttami° M °rddhaṁ cāntaḥpureṇa bhagavato pā° BM °ṣhidetsuḥ | . — 3. BM °taṁ ca priccha | (M °cchet). — 5. BM °ntaṁ pi°.

7. B °indro ca deva triçā ca çakro° M °indro caṁ da ° çā ca çakraḥ. — 9. BM °yaṁ ca ta° M °bhūmiprajño pā° BM °n to vandited sa°.

11. BM pañcakuyā nai° M °mitikā vyākaretsuḥ jaṁ° B °retsuḥ | jaṁ° BM °jahe | i° B °māṁ ca de°. — 13. M °tā buddhaçca buddha° BM °jā u°. — 15. BM °lavaṇe ni° M °sharyo candro° B °atraga° M °mukta.

17. M atha pra° BM °dṛiṣhṭvānapi°. — 19. M °nisharṇṇaṁ hitāhitāhitaṁ pṛicchanti ca ve° B °cchanti vegajāto pu°.

21. M puraṁ tavaṁ kaṁbalapādukā ca ca° B puro tavaṁ ka° dukā ca sucikā sa-kshmāntaraṁ saṁ° M °citā sukshmottamasaṁ°.

अभिरुह्य तां चंक्रमसे च वीर
चेतेषु हर्म्येषु धरीयमाणे ॥
सो दानि तामनुचाविनीहि
समन्तनेमीहि सहस्ररेहि ।
कुशकण्टकशर्कराक्रमन्तो
कथन्ते पादौ न रुजन्ति वीर ॥

भगवानाह ॥

सर्वाभिभू सर्वविदू अहमस्मि
सर्वेषु धर्मेषु अनोपलिप्तः ।
सर्वं जहे तृष्णक्षया विमुक्तो
न मादृशो संजनेति वेदना ॥

राजा आह ॥

पुरा तव लोहितचन्दनेन
अंशिका रक्तोपनिभेन काये ।
समोद्गमन्धेन सुशीतलेन
स्नपका विलिम्पिन्सु ते स्नापयित्वा ॥
सो दानि ग्रीष्मासु खरासु रात्रिषु
वनाश्रमं ईर्यसि चंक्रमन्तो ।
ओदातशीतेन सु[297a]खेन वारिणा
को दानि ते स्नापयते किलन्तं ॥

भगवानाह ॥

शुद्धा नदी गौतम शीतलीया
धर्मात्मिका सद्भिः सदा प्रशस्ता ।

1. BM 'hya taṃ caṃ ' ca vara ' cchatra dhariyamāna | (M 'nā). — 3. BM 'thanehi mṛṣida (B 'dūhājā' B 'hantrehi ka'. — 5. BM kuçakaṃṭhakaçakara akra' M 'nto kracica c pā' B 'cche pā ' virā |.
8. BM 'bhū sarvavidu tam asmiṃ sarve ' ptaḥ sa'. — 10. B sarve ja' M 'kto ne mādṛçaṃ upajānati yevā | B 'na mānasaṃ upajānati ve'.
12. B puro tava rohitacandanena saçiabya rakto' M 'va rohita ' na çaçiaya raktopanibhedakāre B 'le ma'. — 15. B 'snayi s' M 'snapakā vilimpensu te' B 'paṇa te'.
17. B 'vanāddhana irya' M 'vanāndhana irya'. — 19. BM tato tena çī' M 'kilataṃ |.
22. BM 'gauttama çī' M 'lā sadbhis sadā praçastāḥ.

यस्मिं ह्रदे देवगणेहि स्नातो
ओगाढगात्रो प्रतरामि पारं ॥
धर्मो ह्रदो गौतम शीलतीर्थो
अनाविलो सद्भिः सदा प्रशस्तो ।
यस्मिं ह्रदे देवगणेहि स्नातो
पृथिवीं प्रवाहेति सपुष्पगन्धां ॥

राजा आह ॥

यदा तुवं काशिकवस्त्रधारी
पट्टुमुत्पलचम्पकवासितानि ।
शुक्लानि वस्त्राणि निवासयित्वा
सो शोभसि शाकियमण्डलस्मिं
शक्रो व साहस्रनेत्राण मध्ये ।
सो दानि शाणानि च पट्टकानि च
रक्तानि वस्त्राणि कुसुम्भकानि ।
धारेसि तं च अनुगुप्यमानो
इदं पि ते आश्चरियं महन्तं ॥

भगवानाह ॥

न चीवरे शयने भोजने वा
अनुध्यापिता भोन्ति जिना नरेन्द्र ।
लब्धा मनापं अथवापि अप्रियं
उपेक्षका भोन्ति जिना प्रजानका ॥

राजा आह ॥

पुरा तव अश्वरथा विचित्रा
सुवर्णवंशरुचिरा महार्हा ।

1. BM °smiṃ M °snāyate nadīmugā°. — 3. BM °gauttama śī° M °lo sadbhi sadā pra-snato |. — 5. B °thivī pra° M °pṛthivī pravāhanti sapu° B °ti sapu°.

8. BM yadā tvaṃ kā° B °dhārī pa° M °ri paṭṭamutpalaṃ campa° B °tpalaṃ ca°. — 10. M °ṇḍalasmiṃ | śakro va sahasranetrā madhye B °smiṃ | śakro va sahasranetrāṇa madhye |.

13. M °dāni śāṇāni ca paṭṭakāni ca° B °ṇāni ca paṭṭakāni ca ca° BM °tvacena dhā°. 15. BM °taṃ ca | anu° M °abhīkṣṇa ° idaṃ te āścarya bha°.

17. B °ha cīva°. — 18. B cīva° M cīvare śayana bho ° anudhyā ° nti tanā narendrā |. — 20. BM labdhā ma°.

23. M °tava aśvaratha° B °rucakāṃcana° M °rucakāṃcana° BM °rhā pra°.

श्वेतं च छत्रं मणिखड्गचामरं
ध्रुवं ग्रहेसु ते दिशां प्रयातः ॥
पुरा तव वातजवो उदग्रो
हयोत्तमो कण्ठको भीमवेगो ।
आजानेयो काञ्चनजालछन्नो
अभीक्ष्णं सो वहति येन कामं ॥
यो युग्ययानेहि तुवं उपेतो
रथेहि अश्वेहि च कुञ्जरेहि च ।
राष्ट्रेण राष्ट्रं अनुचंक्रमन्तो
कच्चिन्न श्रान्तो सि तदद्य ब्रूहि ॥

भगवानाह ॥

रथो मे ऋद्धिपादो स्मृतिसप्रयाहतो
धृती च प्रज्ञा च स्मृती च सारथी ।
सम्यक्प्रधाना चतुरो मे अश्वा
समं प्रयातो हं पदं सुसंस्कृतं ॥

राजा आह ॥

पुरा तुवं रूपियभाजनेषु
सुवर्णपात्रेषु च भुंजियासि ।
शुचिं प्रणीतरसव्यं च भोजनं
राजानुभावेन उपस्थिहेसु ॥
सो दानि लोलं च अलोलकं च
रूक्षं अरूक्षं अरसं सरसं च ।

1. BM °echatraṁ ma° M °khadgacāmaraṁ | dhruvaṁ sugṛhua di° B °grahesu di° M °yata | . — 3. M °haryotta° B °vego h°. — 5. M °bhikshana so°.
7. M °nehi yata kāmaṁ | yo yugyayānehi bhishaṁ upa ° rehi | . — 9. BM °kaçcin na çānto si° M °tahida bruhi ‖ B °tad iha bruhi ‖ .
12. B °me riddhi° M °ciptarā° B °dhritī pra° M °sārathi ‖ . — 14. M °myakaṁpradhā ° çad pravaṁ pra° B °çrā panaṁ ° haṁ pradamasaṁ° M °padamasaṁ°.
17. B puru tu° M °rā tava rūpiyabhāṇija° BM °rṇapatre° M °jiyāsāh | . — 19. BM °pītaṁ rasa° B °naṁ | rā° M °hetuṁ ‖ B °hetu sa°.
21. M °ni lolaṁ ca alolakaṁ ca lukhaṁ ca alukhaṁ ca asaraṁ ca saraṁaṁ | B °kaṁ ca lūkhaṁ ca alūkhaṁ ca arasaṁ ca sarasaṁ pari°.

परिभुंजसि तं च जुगुप्समानो
इदं पि ते आश्चरियं भद्रक ॥

भगवानाह ॥

ये चापि बुद्धा पुरिमा अतीता
अनागता यो पि अहं अनेयो ।
लूखं अलूखं अरसं सरसं च
इमार्थिको लोकहिताय भुंजति ॥

राजा आह ॥

पुरा तुवं गोणिकतूलिकासु
अजिनावृते क्षौमसुखोपधाने ।
सुवर्णपादे शयने महान्ते
त्वं मोदसे मुक्तपुष्पावकीर्णे ॥
सो दानि दुर्गाय खराय भूमिये
तृणानि पत्राणि च संस्तरित्वा ।
त्वं मोदसे . . . . . सत्वसारो
कथिसे गाथाणि वदन्ति धीर ॥

भगवानाह ॥

नाख्विधा शाक्य दुःखं स्पर्शन्ति
सर्वे च मे शोक[297b]ज्वरा प्रहीणा ।
सो हं सदा निर्ज्वरो विशोको
शयाम्यहं सर्वभूतानुकम्पी ॥

1. B °bhuñjasi tvaṃ atra ju° M °bhuñjasi tvaṃ atra sujugupsamāna idaṁ pi te âryya bha°. — 4. BM °gatā ye(M °tā ca)pi ye cahaṁ° B °neyo lū°.

6. M lukhaṁ alukhaṁ asaraṁ sa° B °ca | idam arthi° M °ca imartha°. — 9. M puro bhuvaṁ° B °goṇika ° ca ajinastri° M °ca âjinastri°.

11. M °ca mahaṁ tvaṁ°. — 13. M °bhûmiya tṛ ° saṁstaritvā B °tvā tvaṁ°. — 15. M saṁmodaye satva° B °ca satva° M °ro kvacinta gā ° vadaṁti dhīraḥ ‖.

18. M °duḥkha svapati sarve° BM °me so jva° M °prahiṇā ‖. — 20. BM so haṁ aśoko nirjvaratha viśoko(M °vikoṣo) ja ° kampi ‖.

राजा आह ॥

पुरा तुवं गौतम स्वके अगारे
अन्तःपुरे देवविमानकल्पे ।
प्रदीपप्रद्योतगवाक्षिकाये
कूटागारे पिधितवातपाने ॥
विचित्रमाल्याभरणाश्च नारियो
अलंकृता अप्सरसन्निकाशा ।
उपस्थिता किंकरणीया उत्सुका
मुखं उदीक्षन्ति किमार्यं आह ॥

भगवानाह ॥

यथापि मे शाक्य स्वके विहारे
देवा च ब्रह्मा च प्रभास्वरा च ।
चित्तं येषां मह्य वशेन वर्तति
यहिं च इच्छामि तहिं व्रजेन्ति ॥

राजा आह ॥

भेरीमृदंगतूरियाभिगीतो
पाणिस्वराख्यानविदूहि तत्वं ।
स शोभसि शाक्यसमञ्जकेहि
शक्रो व साहस्रगतान मध्ये ॥

भगवानाह ॥

सूत्रान्तैर्वैयाकरणाभिगीतो
विद्याविमुक्तिप्रतिबोधनो हं ।

2. M puro tu° BM °gautama°. — 4. M °ça kuṭâgâre vithitavâ° B °vâtapâno vini°.
6. M nâriyo° B °pârthu nâriyo | a° BM °kâçâ u°. — 8. M °yâ ânmutsukâ mukhaṃ° uti kiṃ âryya âha ||.
11. BM °svakâ vihârâ deyâ ca bra°. — 13. BM °ttaṃ ye mera ma° M °hya vaçena vartati° B °yahiṃ icchâ° M °tahpatha ||.
16. BM °gatâryâbhigito pâ° M °khyânavidhayaiatvaṃ | B °vidho sta tvaṃ | . — 18. BM so çobhati çâ° M °yamañcula° BM °kre ca sâhasragatâ°.
21. M sutrânta vai âka° B sûtrânta vai âka° M °dhanotha | B °haṃ so°.

सोभाम्यहं भिक्षुसंघमध्ये
ब्रह्मा व ब्राह्मसंगतान मध्ये ॥

राजा आह ॥

पुरा तुवं भीम रुचे अगारे
अन्तःपुरे देवविमानकल्पे ।
रक्षन्ति ते वर्मधरा मनुष्या
सुसंस्थिताः खड्गहस्ता प्रहारिणो ॥
सो दानि एको विहरे अरण्ये
अनूकमेरण्डकसंनिभाद्रे ।
अनेकव्यालावचरितासु रात्रिषु
क्वचित् न भीतो सि तदद्य ब्रूहि ॥

(भगवानाह ॥)

सर्वे पि ये यक्षगणा समागता
चण्डा पि हस्ती गिरिदुर्गचारी ।
न मादृशे रोमहर्षं जनेयु
सर्वं महाभयमस्मि प्राप्तः ॥
एको चरामि मुनि अप्रमत्तो
निन्दाप्रशंसासु अवेपमानो ।
सिंहो व शब्देषु असन्त्रसन्तो
वातं व जालेषु असज्जमानं ।
नेतारमन्येषु अनन्यनेयं
भीरुं जिनं शाक्य कथं वदेसि ॥

1. B °bmā sāha° M °bmā saha°. — 5. BM °lpa ca°.

6. BM °te dharma° M °susthyaḥ sarvānitāḥ khadgadṛi° B °sthyā sarvamitāḥ kha° ra-ṇā | . — 8. B °bhelaṇḍa° nāde a°. — 10. BM °vyālāmucari° M °kvacin na bhi° tad iyya bruhi | sarve° B °tad idya bruhi || sarve°.

13. BM °pi ca ya° M °samāvṛtāḥ caṇḍā pi hasti gi° B °yā pi ha hasti gi° BM °rga-dhāri | . — 15. BM na mā(M na tā)dṛçaṁ romaharṣaṁ(M °rsha) mṛjāneyā bhayaṁ prabhya abhaya(M °ya)smiṁ prāptaḥ(M °pto) | .

17. BM eko carāmi(M °nte a)ramati° M °pañiçān° BM °pamānam | . — 19. B siṁho va çabde° M siṁho va ça° BM °strasamantaṁ vātaṁ va jā° sajamānaṁ | .

21. M netāram anya° BM °bhīruhi(M °ruha)ti saṁjñāya va°.

राजा आह ॥

पृथिवी च ते विजिता सर्वकल्पा
पुत्राश ते पूरसहस्रमस्ति ।
रत्नानि च सप्त परित्यजित्वा
श्रामण्यमेवाभिरतो सि वीरा ॥

भगवानाह ॥

पृथिवी च मे विजिता सर्वकल्पा
पुत्राश मे पूरसहस्रमस्ति ।
रत्नानि च सप्त इमानि सन्ति
एतादृशं रत्नमन्यं न अस्ति ॥
तं वीतरागं सुसमाहितेन्द्रियं
सम्यक्प्रमुक्तं अखिलं अनास्रवं ।
पुत्रं पिता प्रांजलिको उपागमे
देशेहि मे मार्गं मनुष्यहिताये ॥
तमेनं ज्ञानेन फरित्व शास्ता
शुद्धोदनं पितरं एतदब्रवीत् ।
अभीक्ष्णं सो रोचय भिक्षुदर्शनं
मा प्रमादि भेष्यति तुभ्य धर्मो ॥
अथाप्रमेयस्य पितु अभूषि
संवर्णितं तायिनो भिक्षुदर्शनं ।
समनन्तरं सत्पुरुषो भजन्तो
अथोत्तरीधर्मपथु विशो[298a]धये ॥
एतादृशो आसि तदा समागमो

1. BM °viditā° B °rvakalyā putrāṇa te purasaha° M °trāna te purahsaha° BM °sya ca°. — 5. M °vīrāḥ ‖.

7. B °vī te ca vi° M °vī ca te vi° BM °viditā° B °rvakalyā putrā° M °trāna me purasa° B °me purasa°. — 9. M ratanāni ca° BM °santo e° M °tnaṁ anya nāsti | B °anyan nāsti |.

11. M °ndriya sa° B °yaṁ samyaṁ° M °khila a°. — 13. M °jalimko u° BM °sehi mamdryaṁ ma° B °nuṣyāhitā°. — 15. BM °phalitvā śā° B °danapī°.

17. M abhikṣṇaṁ sāmti | bhi° B °abhikṣṇa so rocayati bhi° M °pramadyiṣyati tuva dharma | B °dharmā ‖. — 19. M °pitur abhūṣi saṁvahitaṁ° B °ahi saṁvarṇṇataṁ tā°.

21. M samanta° BM °ruṣā bha° B °nto | a°. — 23. M °dṛśaṁ āsi sadā° B °āsi sadā sa° M °īraṁ ca ha°.

पितुश्च पुत्रस्य च हर्षणीयो ।
तन्तादृशं सुगतमुपक्रमन्तो
चिराभिषं को न लभेय प्रीतिं ॥

पितापुत्रसमागमो समाप्तो ॥

भिक्षू भगवन्तमाहंसु: ॥ पश्य भगवं कथं आयुष्मता उदायिना अयं राजा शुद्धोदनो अभिप्रसादितो ॥ भगवानाह ॥ न हि भिक्षवो एतरहिमेव एतेन उदायिना एषो राजा शुद्धोदनो अभिप्रसादितो अन्यदापि एष एतेन उदायिना राजा शुद्धोदनो अभिप्रसादितो ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवः ॥

भूतपूर्वं भिक्षवो अतीतमध्वानं नगरे वाराणसीये काशिजनपदे राजा ब्रह्मदत्तो नाम राज्यं कारयति कृतपुण्यो महेशाख्यो सुसंगृहीतपरिजनो दानसंविभागशीलो महाधनो महाकोशो महाबलवाहनो । तस्य तं नगरं वाराणसी काशिजनपदं ऋद्धं च स्फीतं च क्षेमं च सुभिक्षं च आकीर्णजनमनुष्यं च बहुजनमनुष्यं च सुखितमनुष्यं च प्रशान्तदण्डडमरं सुनिगृहीततस्करं व्यवहारसंपन्नं ॥ तत्र सुपात्रो नाम काकराजा प्रतिवसति अशीतिसहस्रपरिवारो । तस्य दानि काकराज्ञो सुपार्श्वा नाम काकभार्या । तस्या काकीये राजभोजनेन दोहलको । सा तस्य सुपात्रस्य काकराज्ञो तं दोहलं आचिक्षति ॥ सो आह ॥ अहं आनापयिष्यं राजभोजनं भुञ्जाहीति ॥ सो दानि काकराजा अमात्यमाह ॥ सुपार्श्वाये राजभोजनेन अभिप्रायो आनापेहि काकानां ये राज्ञो ब्रह्मदत्तस्य महानसातो राजभोजनमाहरिष्यन्ति ॥ सो अमात्यो आह ॥ स्वामि आनयिष्यामि राजभोजनं पि ॥ सो दानि अमात्यो तेषां काकानामानापेति । गच्छथ राज्ञो ब्रह्मदत्तस्य

1. BM °smaranti ni° B °ahaṃ ko ta°. — 4. M iti śrīmahāvastunavadāne pitā° samāptaṃ ‖. — 5¹. BM bhikṣu bha° M °m āhaṃsuḥ ‖. — 5². B °bhagavāṃ ka° M °bhagava ka° bhiprasād°.
6¹. M na hi° tarahiṃm ehaṃ etena udāyinā ‖ eṣo° BM °pi eṣa etinā u°. — 8¹. BM bhikṣuḥ ā° B °hatuḥ ‖. — 8². M °gavan ‖. — 9. M °kṣavo B °vaḥ bhū°. — 10. M °hmadatto nā°.
12. BM °vāsīṃ kāśi° M °sphītaṃ ca kṣemaṃ cākīrṇṇa° dīrvajana° bhūtaṭaskaraṃ-pannaṃ ‖. — 14. BM °vasati ‖ aśītikā(B °kāka)jala° vāro ta°. — 15. M °dāni kāka supārśvo nāma bhāryyo B °bhāryā ta°.
16¹. BM tasya kākī° M °doharako B °lako sā°. — 16². B °doharaṃ ā°. — 17². M ajaṃ nānāpayi°. — 18¹. B °amātyāṃ āhamuḥ ‖ M °amātyā āhamuḥ ‖. — 18². M supārśva-yaṃ rājabhojane ° yo ānāpehi ° kānaṃ rājabhojanena āhariṣyati ‖ B °ṣyati ‖. — 20¹. M °mātyā ā°.
21¹. BM °mātu ānapeti ga°. — 21². BM °tha ‖ rājño bra°.

महानसातो राजभोजनमानेथ सुपात्रस्य काकराज्ञो भार्या परिभुंजिष्यति ॥ ते काका आहंसु: ॥ राजकुलं इष्वस्त्रशिक्षितैः रक्षीयति । परिसमन्तेन राजकुलस्य पक्षी न शक्नोति अतिक्रमितुं ततो न शक्याम वयं राज्ञो ब्रह्मदत्तस्य महानसातो राजभोजनमानयितुं ॥ अपरे पि आयाचन्ति न च उत्सहन्ति । अशीतिहि काकसहस्रेहि न च कोचिदुत्सहति राज्ञो ब्रह्मदत्तस्य महानसातो राजभोजनमानेतुं मा तत्र यता कांडेन वा गुडिकाये वा हन्येम ॥ तस्य दानि काकराज्ञो अमात्य[198b]स्य एतदभूषि ॥ अहं सुपात्रस्य काकराज्ञो अशीतिनां काकसहस्राणां अमात्यो यदि च अहं न शक्नोमि एतं सुपात्रस्य काकराज्ञो आयाचितं कर्तुं न पुरुषकारकं भवति अयार्थं गच्छामि स्वयं राज्ञो सुपात्रस्य निवेदितुं ॥ महाराज अथ स्वयं महानसातो राजभोजनं आनेमि यदि हन्यामि अहं भवतु एकशरीरेण न पुनः सुपात्रस्य काकराज्ञो भार्यायै भोजनं आनेमि ॥ सो दानि तेषां राजपुरुषाणां इष्वस्त्रशिक्षितानां अप्रमत्तानां मध्यातो । ततः राज्ञो ब्रह्मदत्तस्य महानसातो नानाप्रकारं राजभोजनं भक्ष्यं सर्वरसोपेतं तुण्डेनादायापगच्छति । दिवसे दिवसे पुनर्पुनः हरति ॥

तेहि तेहि सूपेहि राज्ञो ब्रह्मदत्तस्य निवेदितं ॥ अत्र महानसे काको अपराध्यति राजभोजनमुच्छिष्टीकरोति विक्षिपेति विध्वंसेति अयं कर्मे प्रसृता तेहि कर्मेहि उत्क्षिप्ता स्य निवारयितुं ॥ राज्ञा अमात्या आज्ञप्ता ॥ एवं महानसं जालेन पिधापेथ यथ सो काको न महानसे शक्येय अपराधितुं ॥

मनसा देवानां वचसा पार्थिवानां
नचिरेणाढ्यानां कर्मणा दरिद्राणामिति ॥

1. M °bhuñcuh |. — 2¹. B °çikshita ra° M °çikshitu rakshayati. — 3². B °kranti | a° M °kramti abhikra°. — 4¹. B °âyachyanti | na° M °âyamiyamti na° B °hanti a°. — 4². BM °hi na ca kvacid u° B °janam ânitum | mâ° M °janam ânayitum | ya tatra° B °tâ kaṇḍena vâ guḍikâye vâ hanyema | M °tâ kaṇḍena vâ guḍikâye va hanyema |.

6. M °tyasyaita°. — 7. B °kromi | e° M °kromi | etaṁ râjño sa° âyantikaṁ ka° BM °vati | svaṁ° M °svakaṁ râjño supâtrasya kâke nivedituṁ B °sya kâkanivedituṁ |. — 9. BM °tra sakâ mahâna° B °di haṇiṣyâ° M °di haṇiṣyâmi ishṭaṁ° BM °vatu | e° M °bhâryâye nâneyaṁ || B °nuṁ nânemi ||.

11. B °kshitânâṁ vyâkiptaci° BM °nâṁ vijñâtvâ ta°. — 12. M °praṁ varkaraso° ndenâdâya ga°. — 14. M °nah harati |. — 15¹. M °tehi supe° veditâṁ |. — 15². BM °ko aparadhya° M °cchishṭrikaroti nipṭhoti viśvaṁ° prasṛtâ tehi karmehi utkshiptâni ativâra° B °prasṛtâ te° utkshiptâmanivâra°.

17¹. M râjâ a° ptatâ ||. — 17². B °pethe so kâko na mahâ° M °petha || yathâ° paridhyitaṁ | B °paradhyituṁ |. — 19. M °ryaṇâdyânâṁ°.

राज्ञो ब्रह्मदत्तस्य वचनमात्रेण सर्वन्तं महानसं जालेन ओपिहितं । सो काको तत्र महानसे न शक्नोति ओपतितुं नापि शक्नोति अपराधितुं । सो पि तर्केति कथं अहं अतो राजभोजनं हरिष्यामि । तस्य काकस्य एतदभूषि । यन्नूनाहं एतं पन्थं रचेयं येन पथेन महानसातो राज्ञो भक्तं अभिनीयति । अतः पन्थातो तं पश्यति राज्ञो अभिनीयन्तं ओदनं वा व्यञ्जनं वा मांसप्रकाराणि वा खज्जकं वा तिलकुतं वा अन्यं वा किंचिद्भक्ष्यं ततः तुण्डेनादाय गच्छति । राज्ञा आणत्तं सर्वेषामेतेषां परिवेषकानां अर्धवराणां च भोजनभाजनानां पिधानानि देथ । ते दानि परिवेषका तं भोजनं पिधानेहि ओपिहित्वा महानसातो राज्ञो अभिनीयन्ति । ततो सो काको न भूयो शक्नोति हर्तुं । तस्य दानि काकस्य एतदभूषि । कथमहं शक्येयं काकराजो भार्याये भूयो राजभोजनं हर्तुं । सो दानि यं राजा ब्रह्मदत्तो चेटीनां हस्ते अर्धयन्तो देवीनां कवलानि प्रेषति ततः चेटीनां हस्तातो हरति । राज्ञा ब्रह्मदत्तेन श्रुतं । अतः [299b] देवीनां कवलेहि प्रवेशीयन्तेहि सो काको चेटीनां हस्तातो भोजनं हरति । राज्ञा आणत्तं । सर्वासां चेटीनां कवलानि प्रवेशयन्तानां अपिधानानि देथ । तत्र च राज्ञो ब्रह्मदत्तस्य सुचकं अमर्षं संजातं । अहो यादृशो एषो काकः धृष्टो मुखरो प्रगल्भो च साहसिको च धनुहस्तेहि न शक्यति रक्षितुं अनन्तरहा ओपतति । राज्ञा आणत्तं । यो मे एतं काकं जीवन्तं गृह्णीत्वा अर्पेय तस्य विपुलं अभिच्छादनं ददेयं । सर्वस्य परिवारस्य आणत्तं एवं राजा ब्रह्मदत्तो जल्पति ।

1b. M °sarve taṁ ma° jena āpihili | . — 2a. B °opayituṁ nā° apiriddhrituṁ | M °apa-raddhyituṁ. — 3. B °takeli° M °takehi kathaṁ ° rishyaṁ ti. — 3b. M °bhūmi | B °sti ya°. — 4a. M yaṁ nūnāhaṁ evaṁ pathā rakeheya ye° B °haṁ | etaṁ panthā rakaheya ye° M °ktaṁ abhipayati | . — 5. BM yatah panthā(M yato yathā)to taṁ paçyati rājño abhipīyata tatah panthā(M °bhipīyati | tato panthā)to taṁ paçya° B °rāṇaṁ | o° M °ghyantaṁ odanaṁ vyañjanaṁ vā mānsaprakāça vā khajakaṁ ° nyaṁ vā kaṁcid bhakshyaṁ | ta° B °nyaṁ vā keeid bhajyaṁ vā | ta°.

6. M °āpanitaṁ etehāṁ sarvehāṁ pa° B °bhojanaṁ sāhā° M °bhojanabhājanānāṁ vidhā°. — 7. BM °bhojanaṁ (B °janaṁ) parivesakehi āpihitvā°. — 9a. B °to sah kā° M °kākena bhūyo na ça°. — 9b. BM °ahi ka°. — 9c. B °bhāryāye bhū° M °ye bhūtā rā°. — 10. B °nī yam rājā° BM °sto apakrānto de° M °valāhi pre° BM °shati | tato(M °toh) sa ° rati rā°.

12b. M ato de ° kavarehi pra° B °saalya°. — 13b. M °āpanidhā. — 13c. M °saçyantānāṁ api° B °saçyantānāṁ apyidhā ° dethah | . — 15. BM °jño kāko hra° B °guruchaṁ s° M °marsho saṁ°. — 16. M °aho kāko dhūrto ma° B °sāhasiko° M °sāhi paruchehi na ça° B °çakyeti ra° M °taṁ | anantaraṁ dpa°.

17a. BM °tiaṁ yo°. — 17b. B °lhyeyan tasya° M °lhyeyah tasya vipulena abhicchādanaṁ tasya dadeyaṁ° B °achādayaṁ tasya dadayeyaṁ sa°.

अपरा दानि चेटी राज्ञो ब्रह्मदत्तस्य अर्पयतो स्वकाये देवीये अशनं आदाय गच्छेति अपिहिता गच्छति । सा दानि तेन काकेन दृष्टा । तस्य एतदभूषि । कथं अतो चेटीय हस्तातो भोजनं हरेयं । यन्नूनाहं अस्या चेटीये नासाये लपेयं ततः सा चेटी भीता इमं भोजनं उज्झिष्यति ततो अहं यं तं भोजनं गृह्य गमिष्यामि ॥ सो दानि येनाभूद्द्वासी ओपतित्वा ताये चेटीये नासे लग्नो । तत्र नासे व्रणो जातो । चेटीये भीताये भोजनमुज्झित्वा सो काको उभयेहि हस्तेहि गृहीतो ॥ सा दानि चेटी काकमादाय नासाय रुधिरेण धरन्तेन राज्ञो ब्रह्मदत्तस्य उपसंक्रान्ता । अयं सो दुष्टकाकः गृहीतो ॥ सो दानि राजा ब्रह्मदत्तो तस्या चेटीये प्रीतो संवृत्तो । शोभनं ते कृतं यं त्वया एषो काको गृहीतो ॥ तेन दानि राज्ञा ब्रह्मदत्तेन ताये चेटीये विपुलो आच्छादो दिन्नो ॥ सो च काको परिनायियति । न शोभनं यं त्वं राजकुलं पि धर्षयसि ॥ सो दानि काको राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ॥

वाराणस्यां महाराज काकराजा निवासितो ।
अशीतिकाकसहस्रेहि सुपार्श्वो परिवारितो ॥
तस्य दोहलिनी भार्या सुपार्श्वा मांसमिच्छति ।
राज्ञो महानसे पक्वं प्रणीतं राजभोजनं ॥
तस्याहं वचनं श्रुत्वा करन्तो अनुशासनीं ।
भर्तुरपचितिं कृत्वा नासाये अकरि व्रणं ॥

अथ खलु भिक्षवः राजा ब्रह्मदत्तो तस्य काकराजामात्यस्य प्रीतो संवृत्तो । इमस्य काकराजामात्यस्य तस्य काकराजस्य सकाशातो नैव यामो न भोगो नापि

1. M apara dâ ° sya aparakâto sva° B °sya apakâte sva°. — 2¹. BM °kâlena drishtvâ ta°. — 2². M tasyaita°. — 3¹. B °reyaṁ ya°. — 3². BM yanuné(M yaṁ nûnâhaṁ asya ca ye nâsâ ° gneyaṁ | tatah° B °ujhishya° M °ujhishyati tatah a° BM °haṁ yato bhojanaṁ gri°. — 5¹. B °ni yenâbhudhhasyo o° M °ni yenâbhudhasya o ° nâse la° BM °gna ta°. — 5². M °vraṇo kahâṇo B °kahaṇo ca°.

तेन दानि नलिनीये मूलातो यमजाता द्वात्रिंशत्पुत्रा जाता । अपराणां पि देवीनां मूलातो सातिरेकं पुत्रशतं जातं ॥ धर्मेण राज्यमनुशासयित्वा चिरं दीर्घरात्रं ज्येष्ठपुत्रं राज्ये अभिषिंचित्वा पुनः ऋषिप्रव्रज्यां प्रव्रजितो ॥ तेन दानि पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन युञ्जन्तेन घटन्तेन व्यायमन्तेन बाहितकेन मार्गेण चत्वारि ध्यानान्युत्पादितानि पंचाभिज्ञा साक्षात्कृता ॥ सो दानि कालधातुं समतिक्रमित्वा कायस्य भेदात् ब्रह्मदेवनिकाये उत्पन्नो ॥

भगवानाह ॥ यस्तेन कालेन काश्यपो ऋषिरेष स शुद्धोदनो अभूषि । या सा मृगी एषा सा भिक्षुणी महाप्रजापती अभूषि । यश्च काशिराजो भूदेष एष महानामो शाक्यो भूत् । यश्चैकशृंगको ऋषिकुमारस्तदाहं एव अभूव । या च नलिनी ना[308ᵃ]म राजकन्या एषैव यशोधरा अभूषि ॥ तदापि एषा आत्मानं अलंकृत्वा मम प्रलोभेति । एतरहिं पि एषात्मानं अलंकृत्वा मम प्रलोभेति ॥

नलिनीये राजकुमारीये जातकं समाप्तं ॥

1. M °rājño ṛi° atarasya pratyācaraṇaṃ° B °tpārara°. — 4. B °yāntā vica° M °ulcayā pa° BM °ochrayāḥ saṃ°. — 5. B °ṇānta hi jī° M °ṇānta hiṃ jī°.

6. B °rmeṇa saṃko kā° M °kto kāsagata rākaṣṭrīṃ° B °çriñgena vā° M °pratilaṃ-labhaṃ |. — 8ᵃ. B °lāto — mainighā triṃ° M °yamapārā dvā° jātāḥ |. — 8ᵇ. M °sāṃ mūlāto satira°. — 9. M °ṇa rājyaṃ anu° B °ṇa rājyaṃm anu° M °ayi ciraṃ° BM °jyeṣṭhapu° M °jye 'bhi° ṣipravarajito |. — 10. M °yugaṃ anuyuktena pūjya° vyāyamantena vā° B °vyāyapantena vā° M °sākṣātkṛtā |.

12. M °dhātu sama° bhedād brāhmaṇa de° B °brāhma de° M °tpannaḥ |. — 14ᵃ. M °lena tena samayena kāçyapo nāma ṛṣiḥ saha° |. — 14ᵇ. M mā sā mṛgī eṣā sā bhi° B °pati gau° M °gautami°. — 15. B °rājño bhūd e° M °d mahāraṃ ma° çākya 'bhūt | B °çākyā bhūt |.

16ᵇ. M °çriñgo ṛi° evaṃ ha°. — 16ᶜ. B °rājakanyā°. — 17. M °ekā āsan° e°. — 19. M iti çrīmahāvastuavadāne naḥ°.

भिक्षू भगवन्तमाहंसुः ॥ पश्य भगवन् यथेयं यशोधरा राज्ञा शुद्धोदनेन अननुयुंजित्वा अपर्यवगाहित्वा अनपराधी वध्या ति ओसृष्टा ॥ भगवानाह ॥ न भिक्षवः एतरहिमेव एषा यशोधरा राज्ञा शुद्धोदनेन अननुयुंजित्वा अनपराधी वध्या ओसृष्टा । अन्यदापि एषा यशोधरा इमिना राज्ञा शुद्धोदनेन अननुयुंजित्वा अपर्यवगाहित्वा अनपराधी वध्या ओसृष्टा ॥ भिक्षू आहंसुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

अतीतमध्वाने अनुहिमवन्ते महावनषण्डे तत्र माण्डव्यस्य ऋषिस्य आश्रमपदं चतुर्ध्यानलाभिनः पंचाभिज्ञस्य महाभागस्य मूलोपेतं फलोपेतं पुष्पोपेतं पत्रोपेतं पानीयोपेतं मृगपक्षिसहस्रेहि निषेवितं ॥ अथ खलु भिक्षवो माण्डव्येन ऋषिणा ग्रीष्मानां पश्चिमे मासे शुद्धपाकेहि फलेहि परिभुक्तेहि चङ्क्रमेण च पानीयेन पीतेन अभिष्यन्दीहि धातूहि उपलकुण्डके सशुक्रं प्रस्रावं कृतं ॥ अथ खलु भिक्षवो अन्यतरा मृगी ऋतुमती तृषायां श्रान्ता पानीयसंज्ञाय ततो उपलकुण्डकातो तं सशुक्रं प्रस्रावं पीतं । जिह्वाय च मुखतुण्डकेन स्वकं योनिमुखं परिलेहति । अचिन्त्यो सत्वानां कर्मविपाकः । तायि मृगीये तं शुक्रं रुधिरं च संमूर्छित्वा कुक्षिं प्रतिलब्धं ॥ सा दानि तत्रैव आश्रमपदस्य परिसामन्तेन चरति परिभ्रमति च ॥ सा दानि कालेन च समयेन च दारिकां दर्शनीयां अक्षुद्रावकाशां परमया शुभवर्णपुष्कलतया समन्वागतां गौरीं नवनीतपिण्डसंनिभां प्रसूता ॥ सा दानि मृगी तां दारिकां प्रसूता च तेन च ऋषिणा तं दृष्टं ॥ तस्यैतदभूषि ॥ कुतो इमस्यास्तिरश्चानगताये मृगीये मानुषं अपत्यान्ति ॥ समन्वाहरित्वा ऋषिणा पंचाभिज्ञानां ज्ञानं प्रवर्तति ॥ सो दानि ऋषि माण्डव्यो

1[b]. B bhikshu bha° M bhikshur bhagavantam āha° B °vanta āhaṃsuḥ pa°. — 1[c]. M °yujitvā aparyāvagāhetvā ana° B °jyitvā parya° M °osrishto | anyadā° (l. 4). — 3. B °yojitvitvā ana°. — 4. M °pi svā ya° °dharā stinā° B °dharā esinā° M °nena ananyuṃñjitvā aparyya°. — 5. BM bhikshu ā°.

6[b]. M °gavaṃ | : — 6[c]. M °kshavaḥ B °kshavo a°. — 7. M atīnam adhvāne° B °hāvanashaṇḍe tatra maṇḍa° M °hāvanakhaṇḍa tatra maṇḍavya° B °mūlopetaṃ | pha° M °gapakshigaṇaṃ°. — 9. B °vo maṇḍa° M °vo maṇḍavye° abhyandehi dhā° B °abyanda dhā° M °utparakuṇḍake° B °gdakehi sa° M °śukrapravrāvaṃ°.

11. M °pānīyaṃ saṃjñāya tataḥ utparakuṇḍakāto taṃ riśu° B °gdakāte° B °prasrāvaṃ° M °pramrāvaṃ tilaṃ. — 12. M °tuṇḍake° B °parilekhasi | M °parilekhasi. — 13[a]. B acintyaṃ sa° M acintya sa° °pāke te°. — 13[b]. M taye mṛgi° B °mṛgī taṃ° BM °śukrandha° M °saṃmūrcchitvā° B °kukshi pra°.

16. M °lena ca di° drāsakāṃ pa° B °paramapāṇḍubha° M °shkarastayā° BM °gaurī nava° M °nītapiṇḍasaṃ° °prasūtāḥ | : — 18. M °kāṃ drashṭuṃ ca te° B °nāṃ ca tena ca rishi° BM °drashṭaṃ dṛshṭvā ta°. — 19[b]. M °syā tiracchā° °patyaṃ u B °n ti na°. — 20. B °shi maṇḍa°.

पंचाभिज्ञो महाभागो समन्वाहरति ॥ इह मम [308b] अत्र आश्रमपदे अन्यस्य पुरुषस्य प्रचारो नास्ति । एषा च मृगी इमहिं एव मम आश्रमपदे जाता संवृत्ता तथान्यान्यपि मृगपक्षिशतानि इह वनषण्डे संवृत्तानि नैव मम क्वचित् मृगो वा पक्षी वा अन्यवनषण्डं गच्छति न चान्यातो वनषण्डातो कोचित् मृगपक्षी इहागच्छति । इह एते वनषण्डे मृगपक्षिगणा जाता च संवृत्ता च संवृद्धा च अभिरता च अमनुष्यचरितं च वनषण्डं । अमुककाले मया ग्रीष्माणां पश्चिमे मासे पक्वमुपक्वानि च फलफलानि परिभुक्तानि सुशीतलं च बहुतरं पानीयं पीतं । ततः मे भिषयोहि धातूहि उपलकुण्डके समुक्तं प्रस्रावं कृतं एताये मृगीये तृषिताये तं समुक्तं प्रस्रावं पानीयसंज्ञाये पीतं । ततो एताये मृगीये कुक्षिं प्रतिलब्धं । मम एष संनिश्रावो ॥ तस्य ऋषिस्य माण्डव्यस्य तस्य दारिकाये अतिप्रेमं संजातं ॥ तेन सा दारिका ऋषिणा गृह्य आश्रममानीता । सा वत्स्य मृगी पृष्ठतो व्रेति ॥ तेन दानि ऋषिणा ताये दारिकाये तं नाभि फलशस्त्रकेन छिन्नं मानुषिकाये च सं वेलायनाय वेलायनी ताये वनमृगीये स्तनाचूषणं अर्पति । सो पि तं अपि पुष्पाकानि फलानि मुखे पीडेति क्षामेन क्षामं तैलेनाभ्यंगेति मुखोदकेन स्नपेति ॥ संवर्धमाना च सा दारिका ताये मृगीये तेन च ऋषिणा अतीव तं वनं शोभेति सा च तां माता जिह्वाये परिलिहति ॥ यत्र काले सा दारिका विवर्धमाना पादेहि पि चलति ततो यत्र यत्र पादा निक्षिपति तत्र तत्र ताये दारिकाये पूर्वोपचितेन शुभस्य कर्मस्य विपाकेन पद्मानि प्रादुर्भवन्ति ।

1. B *iha mama putra ° pracāra nāsti* | . — 2. BM °*imahiṃ evaṃ mama* ā° B °*çramapadaṃ jā*° M °*jātāḥ* | *saṃvṛttāḥ ta*° BM °*tāni yāni mṛ*° M °*naivaṃ mama kva*° B °*go vā pakshi vā anyavanashaṇḍaṃ*° M °*kshi vā anyavanakhaṇḍaṃ gacchati* | *tadānyato vana*° B °*ānyanto vanashaṇḍā*° BM °*to kvaci*° M °*t mṛgapakshi i*°. — 5. B °*ete vanashaṇḍe*° M °*ete vanakhaṇḍe mṛ*° *tā ca abhi*° BM °*manu*(B °*mushya*)*caritaṃ ca vanakhaṇḍe mama*°.

6. M °*shmāṇāṃ paçcā*° BM °*kāni ca pari*° M °*hutalaṃ pā*°. — 7. M *tato me bhishyaṃdaṃdehi dhā*° B °*shyaṃtehi dhā*° M °*utpalakuṇḍake çayukraprasrāvaṃ*° B °*ṇḍake sayukraṃ prasrāvaṃ kṛ*° M °*tṛshitāye* ° *vaṃ pāniya*°. — 9ᵃ. B °*kukshi pra*°. — 9ᵇ. B °*nisrāvo ta*°. — 10. B °*shisya māṇḍa*° M °*shisya maṇḍalasya*°.

11ᵃ. B °*çramapadaṃ ā*°. — 11ᵇ. M °*pṛshṭhato vrajati* || . — 12. M *te dā*° B °*taṃ nālaphalaṃ çastra*° M °*taṃ nālaphalaçastreṇa* ° *mushikāye vanamṛgī helāyanahelāyanti* | *tā*° B °*naṃ helāyaniya helāyanti tā* ° *stanamūrcanaṃ ā*° M °*stanamūrcanam āsati* | . — 13. BM *so pi taṃ ṛshi*(B °*shī*) *bahu*° B °*deti* | *kālena kā*° M °*kena snāpeti* B °*pati saṃ*°. — 15. M *saṃvarddhamānā*° B °*vardhamānā*° M °*ṣi etena ca ṛ* ° *tīvaṃ taṃ vanaṃ çobhati* | *sā ca tāṃ mātā*° B °*çobhati so ca naṃ mātā*° BM °*lihati ya*°.

16. M °*vivarddhamānā*° B °*prati* | *tato*° M °*prati* | *tataḥ yatra yatra pā* ° *ti tatra tatra tasyā dārikāyā pūrvopacitena çu* ° *rbhavanti sa*°

समन्तेन च आश्रमपदे तस्य ऋषिस्य ताये दारिकाये पर्याहिण्डन्तिये पद्मपङ्क्ती उत्थापिता पद्मवनमिव शोभति तेहि च पद्मेहि सा दारिका क्रीडति हृष्टेनापि मुदा अच्छति ॥ तस्य दानि ऋषिस्य तस्या दारिकाये तं शुभकर्मविपाकतो क्रमेषु पद्मानि प्रादुर्भूतानि दृष्ट्वा विस्मयं संजातं अहो दारिकाये ऋद्धीति यत्र यत्र क्रमां निक्षिपति तत्र तत्र प्रासादिका[309a]नि दर्शनीयानि पद्मानि प्रादुर्भवन्ति कृतपुण्याये इमाये दारिकाये भवितव्यं पूर्वं दक्षिणीयेषु चोक्षकुशलेषु कुशलमूलाये यस्या इमं एदृशं अनुभावं ॥ तेन दानि ऋषिणा ताये दारिकाये पद्मावतीति नामं कृतं ॥

सा दानि संवर्धमाना ताये मातरे सार्धं तस्याश्रमस्य परिसमन्तेन अच्छति । यतो यतो सा मृगी चरमाणा अच्छति ततो ततो सापि दारिका ताये मातरे सार्धं अच्छति मृगेहि च मृगपोतकेहि च सपरिवारा क्रीडन्ती अच्छति ॥ यदा च बुभुक्षिता भवति ततो ताये मातरे सार्धं तमाश्रमं आगच्छति अपरेहि मृगेहि मृगीहि च मृगपोतकेहि च सपरिवारिता । ततो सो ऋषि आश्रमगताये मृगीये मृष्टमृष्टानि फलानि देति मृष्टमृष्टानि च पानकानि देति । सा दानि फलफलानि स्वयं पि खादति अपरेषां मृगपोतकानां देति । यदा सा दारिका तमाश्रमे शयिता भवति ततो ते मृगपोतका च मृगपोतिका च तां दारिकां अनुपरिचरित्वा शयन्ति यदा च चरितुकामा भवन्ति ततो तां दारिकां मुखतुण्डकेन प्रतिबोधयन्ति ॥ यतो यतो मृगा चरन्तो अच्छन्ति ततो ततो सा दारिका तेहि मृगेहि मृगपोतकेहि मृगपोतिकाहि च सार्धं क्रीडन्ती अच्छति । यतो यतो सा अच्छति

1. BM °śramapadaṁ tasya ṛṣi° °rdhāhiṇḍantiye padmehi paṅktihi u° B °ntiye padmehi aṭaki u° M °dasaṁ sa dā°. — 3. M °samya śaṁ° B °jātaṁ | aho° BM °kāye ṛddhītidi- (B °ti |) yatra yatra (M °tra eaṁ) kramaṇāṁ kaṁ° M °dakā darśa° °rdhavanti kṛtapuṇyāni kenā° B °nāṁ | kṛtapuṇyehi kaṇā° BM °vyaṁ | pūrvaṁ (M °vva) da° B °ṇīyeṣu° M °ṇīyeṣu° BM °kāye yasya i° BM °nubhavaṁ te°.

7. M °ye padmāva°. — 9. M °rddhamānā tāye° B °mānāṁ tāye° M °mātaraṁ sā° B °paribhramaṇa°. — 10. BM °gī caramāṇā aṇvati | tato tato (M °taḥ) sā pi° M °krīḍantī a° B °ḍanti a° BM °ṇvati ya°.

11. BM °vati | tato tāye (B °te tato ye) mā°. — 13. M tataḥ so° B °so ṛṣiḥ° M °pramṛṣṭāni phalāni deti° BM °ca phalapānakāni (M °nakāni) ca deti | . — 14. M °tāni ca svayaṁ° B °yaṁ vikhā°. — 15. M °sā dārikā tataḥ° BM °ti | tato° B °te mṛgapotakā ca dārikāṁ° M °śayanti | yadā ca caritukāmā bhavanti tataḥ tāṁ° B °tukāmā bhavanti | tato° M °dhayanti.

18. M yataḥ yato mṛgā caranto aṇvati tataḥ tato sā dā° B °nto aṇvati | tato tato sā dā° M °kehi ca sārdhaṁ krīḍati aṇvati B °kehi mṛgapotikehi ca sārdhaṁ krīḍanti aṇvati | . — 19. M yato yataḥ sā aṇvati tato tataḥ sa° B °ti | tato tato sa° kramamāṇeṣu pa° M °kramaṇeṣu pa° °rdhavanti | .

ततो ततो समन्तेषु क्रमेषु पद्मानि प्रादुर्भवन्ति । सापि दारिका तत्र एवम्भानि पद्मानि गृह्य स्वयं च आबन्धति तेषां च मृगपोतकानां पद्मानि आबन्धति ॥ एवं सा तेहि सार्धं क्रीडन्ती तहिं आश्रमपदे संवर्धति परस्परं विनापि न रमन्ति ॥ यत्र काले सा दारिका विज्ञप्राप्ता ततो तमृषिस्य आश्रमं सिंचति शोधेति नानाप्रकाराणि मूलविकृतीनि आनेति पत्रविकृतीनि नानाप्रकाराणि आनेति पुष्पविकृतीनि नानाप्रकाराणि आनेति फलविकृतीनि नानाप्रकाराणि आनेति उदकमानेति काष्ठं वा समिधानि वा आनेति । तं च ऋषिं तैलेनाभ्यंगेति स्नापेति । अग्निहोत्रं से प्रतिजागरेति तं च ऋषिं नानाप्रकारेहि मूलेहि च पत्रेहि च पुष्पेहि च [309b] फलेहि च परिविसति । नानाप्रकाराणि च फलपानानि आनयति । यतो यतो च तत्राश्रमपदे चरति यतो यतो गच्छति मूलहारिका वा पत्रहारिका वा पुष्पहारिका वा फलहारिका वा ततो तेहि मृगपक्षीहि परिवारिता आगच्छति ॥

कदाचित्सा पद्मावती तेहि मृगपक्षीहि परिवारिता उदकहारिं गता काम्पिल्लको च राजा ब्रह्मदत्तो बलाग्रेण सार्धं मृगव्यं अन्वन्तः तं प्रदेशं उज्झितो वातजवसमेन तुरगेन मृगमनुबद्धन्तो । तेन मृगेन सो राजा ब्रह्मदत्तो वनखण्डमुपनीतः ॥ यथोक्तं भगवता धर्मपदेषु ॥

गतिर्मृगाणां प्रवनं आकाशं पक्षिणां गतिः ।
धर्मो गतिर्विज्ञातीनां निर्वाणं महती गतीति ॥

सो मृगो तत्र वनखण्डे नष्टो ॥ तेन राज्ञा ब्रह्मदत्तेन वनखण्डे तं मृगं मार्ग-

1. M sā dārikā tadā evaṃ tāni padmāni gri° B °rikā tataḥ e° BM °yaṃ ca ābandha- (M °bandhamā)ti | teshāṃ mṛi° bandhati | . — 2. B °krīḍanti ta° M °krīḍantī tehiṃ°. — 4. BM °çodheti | nānāprakārāṇi mū° neti(B °ti |) pushpavikṛitīni ānetī phalavikṛiti- (M °ti)ni nānāprakārāṇi ānetī(M °ti |) udakam ā(M °dakā)neti(B °ti |) kāshṭam vā (M °shṭhāni vā) sa°.

7. BM °rishi tai° M °bhyaṃgī snāpeti. — 8. BM °traṃ me prati(M °ti)jāgareti (M °ti ||) taṃ° B °rishi nānāpra° M °rishiṃ nānāprakārehi mūlehi ca phalehi ca patrehi ca pariviçati B °viçati | . — 9a. B °pānāni vā ā° M °ni ca ā°. — 9b. B °gacchati° M °çanti yato yataḥ gacchati mūlahārikā vā pushpahārikā vā phalahārikā vā patrahārikā vā gacchati | tato° B °trahārikāvī vā pu° phalahārikā vā gacchati tato ° mṛigapakshihi parivārito ā° M °kshihi suparivārikā ā°.

12. M °sā pannā° BM °tehi mṛiga(B °ga)pakshihi pari ° riṃgatā ka(M °ta | kaṃ)- pilla ° vyaṃ anvataḥ(M °to) taṃ° B °ujhitvā vā ° tvā ° ujhivātajavena° M °turagavegena mṛiga° B °raṃgena mṛiga anu°. — 14. B °tto vanashaṇḍa° M °tto vanakhaṇḍam upanī- to | . — 15. B tatho° BM °cha ga°.

16. M gatir mṛi° BM °plavanaṃ ā°. — 17. B dharmā gatir vibhāti° M °rmo gatī vibhāti° mahatāṃ gatīr | . — 18a. M °mṛigo tatra vanakhaṇḍe nashṭo° B °shṭo te°. — 18b. M tatra

तेन तहिं उदककूले पदुमावती दृष्टा कृष्णाजिनेन निवस्ता वल्कलसंविका च उदककुम्भेन गृहीतेन पद्मेन च शोभनेन हस्तगतेन प्रासादिका दर्शनीया परमया वर्णपुष्कलतया समन्वागता । यत्र यत्र च क्रमाणि निक्षिपति तत्र तत्र पद्मानि प्रादुर्भवन्ति मनोरमाणि सुदर्शनीयानि । दृष्टा च पुनर्भिक्षवो राज्ञो ब्रह्मदत्तस्य पदुमावतीं ऋषिकुमारीं एतदभूषि ॥ अहो कन्यायाः रूपवर्णं अनुभावं यत्र यत्र क्रमाणि निक्षिपति तत्र तत्र पदुमानि प्रादुर्भवन्ति अतीव मधुरमणीयानि प्रासादिकानि दर्शनीयानि का नु खल्वियं भविष्यति देवकन्या वा नागकन्या वा किंनरकन्या वा मानुषी वा इयं भविष्यति अमानुषी वा । यं नूनाहं उपसंक्रम्य परिपृच्छेयं ॥

अथ खलु भिक्षवो राजा ब्रह्मदत्तो येन पदुमावती ऋषिकुमारी तेनोपसंक्रमित्वा पदुमावतीं ऋषिकुमारीमेतदवोचत् ॥ भद्रे का त्वं कस्य वासि ॥ एवमुक्ते भिक्षवः पद्मावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदवोचत् ॥ अहं खलु अस्मि पद्मावती नाम ऋषिकुमारी माण्डव्यऋषिस्य धीता मूलफलमौलिकस्य वनवासिस्य ब्रह्मचारिस्य ॥ एवमुक्ते भिक्षवः राजा ब्रह्मदत्तो [310ᵃ] पद्मावतीं ऋषिकुमारीमेतदवोचत् ॥ केवरूपा ते भद्रे भोजनविधानानि उपवने निवसन्तीये येनासि एवं उपचितशरीरा कीदृशानि ते वस्त्रविधानानि येन ते चैवं सुकुमारवर्णनिभा ॥ एवमुक्ते भिक्षवो पदुमावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदवोचत् राज्ञो वस्त्राणि परामृशन्ती ॥ मूलफलानि भक्षामि आहारं वल्कलानि प्रावरणानि एवं सूक्ष्माणि यादृशानि इमानि न च वस्त्राणि ॥ एवमुक्ते भिक्षवः

tena ca ° tena vanakhaṇḍe tahiṁ ° kūle padmāvatī ° B ° dṛṣṭāyā kṛ° M ° dṛṣṭo kṛ. ° nivastra ntā ° B ° nivasta ntā ° M ° ṇḍikena hasta ° B ° bhanena ca hasta ° M ° nīyā paramāye puṣkalavarṇatāya samanvāgatāḥ B ° puṣkarata °. — 3. BM ° yatra cañkra ° M ° rbhavanti | manoramāṇi ca ° B ° ṇi sukulanīyāni dṛṣ° M ° ryaṇīyāni dṛṣ°. — 4. B dṛṣṭitvā ca | pu° M ° puna bhi ° ṣya padmāvatiṁ rājakumārīm eta° B ° tiṁ rājakā °. — 5. M ° nyāyā rūpavātiṁ ṛddhiyāna ° B ° ataṁ ṛddhayānubhā ° BM ° yatra yatra cañkra ° M ° rbhavantī | ati ° B ° ati | atīva ca cakakṣu ° lriyaṁ bhaviṣyati | devakanyā vā nā ° anarakaṇyā vā nā ° BM ° iyaṁ rūpaṁ bha ° B ° ṣyati | a ° M ° amānuṣā ca.

8. M yaṁ nūnāhaṁ °. — 10. M ° yena padmāvatī nāma ṛ ° tvā padmāvatiṁ ṛ ° B ° tvā padumāvatī ṛ °.

11ᵃ. M ° eṣa rājā e °. — 11ᵇ. M ° kṣavo padmāvatī ṛ ° mā rājā ° tad uvāca | . — 12. M ° ṇḍavye ṛṣisya dhitā mūlaphalabhogika °. — 13. M ° kṣavo rā ° B ° hmadatto padmāvatī ṛ °. — 15. M ° bhadre bho ° B ° nadiye ca yenāsi ° M ° nāsi yena yāsi ti ° cīra ki ° cīra sukumāro varṇa ° B ° kumārā varṇa °.

17. M ° ti rājānaṁ bra ° BM ° rat | rājño ° M ° vastrāṇi parāmṛśantī B ° mṛśanti mū °. — 18. M mūla ° B ° prāvaraṇāni evaṁ sūkṣmāṇi yā ° M ° māni na ca v °. — 19. M ° kṣavo rājā bra °.

राज्ञो ब्रह्मदत्तस्य एतदभूषि । अविद्धिका इयं ऋषिकुमारी राज्ञो राजार्हाणां वा वस्त्राणां नैव अस्य विशेषं अभिजानाति न राजानस्य नैव अजिनानां विशेषं जानाति नापि राजार्हाणां वस्त्राणां विशेषं जानाति नापि मम तुरंगस्य । एषा च ऋषिकुमारी राजकन्या ममैषा भार्या अनुरूपा भवेया न शक्या मया माण्डव्येन ऋषिणा अननुज्ञाता पाणिनापि प्रष्टुं कुतो पुनरितो आश्रमातो अस्मिन्नं नगरं नयितुं । माण्डव्यो ऋषि महात्मानो शापेन मे सपरिवारं भस्मीकरेय । यं नूनाहं पद्मावतीमृषिकुमारीमुपायेन प्रलोभयेयं । पौराणानां च भिक्षवो राज्ञां मृगव्येन गच्छन्ताणां मधुसर्पिसंयुक्तानि सक्तूनि राजार्हाणि च मोदकानि च उक्कारिकानि च यमलकं पूरेत्वा अश्वपृष्ठे पल्लाणस्य पृष्ठतो बध्यन्ति मा राजा अटवीए एको अद्वितीयो वनेषु हतो समानो बुभुक्षाय मरेय । तेन खलु पुनर्भिक्षवो समयेन राज्ञो ब्रह्मदत्तस्य मधुसर्पिसंयुक्तानि सक्तूनि मोदकानि च उक्कारिकानि च यमलकं पूरेत्वा अश्वपृष्ठे पृष्ठतो पल्लाणबन्धेन बद्धमभूषि । अथ खलु भिक्षवः राजा ब्रह्मदत्तो यमलकातो मोदकं उद्धरेत्वा पद्मावतीये अदासि । हन्त भद्रे इमानि अस्माकं फलानि । सा दानि आह । कानि कतमानि शोभनतराणि फलानि युष्माकं वा अस्माकं वा । सा दानि तं मोदकं परिभुञ्जित्वा आह । भगवं शोभनानि इमानि युष्माकं फलानि मृष्टानि रसवन्तानि अस्माकं पुनः फलानि कटुकषायाणि । राजा आह । एतादृशानि अस्माकं आश्रमे वृक्षेषु फलानि यदीच्छसि [310b] ईदृशानि परिभुञ्जितुं ततो तं मम आश्रमपदं गच्छाहि । एवमुक्ते भिक्षवः पद्मावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदु-

1. M °ṛi rājñā rājārhāṇāṁ vastrā° BM °abhiṣya viçeṣaṁ nābhijā(M °jānāti na M °nairaṁ ajinānāṁ viçeṣaṁ nābhijānāni na rājānasya naiva ajinānāṁ ° turagasya ‖. — 4. BM eṣā ca ṛṣikumārī(M °rīṁ) rājakanyā mamaiṣa bhā ° ṣayā ça° M °kyā mayā maṇḍa ° pāṇinā° BM °kuto pu ito āçra° M °raṁ napituṁ B °yituṁ ma°.

6. BM maṇḍa° M °raṁ bhāsmī° BM °reyaṁ ‖. — 7¹. M °kumārīṁ upā° B° kumārām upā° M °bhbhejaṁ ‖. — 7². BM paurāṇāṁ ca bhi° M °vyena gacchantānāṁ madhusarppisaṁyuktānāṁ madhusarpisaṁyuktānaṁ madhusarpisaṁyuktāni çaktukāni rājārhā° B °nānāṁ madhusarppisaṁyuktānāṁ madhusarpiṣyuktāni çaktū ° rhāni ca mo° M °yamalakaṁ pū° BM °çvapṛṣṭhapallā(M °lāṇasya° M °to bandhyati ‖ mā rā° B °ndhyati mā rā°. — 10. B °ktāni çaktā° M °ktāni çaktuno° B °ukvaritāni yamala° M °kkārikāni yamarakaṁ rūpetvā ° to palāça baddhena baddha° B °lāçabaddhatena baddha°.

12. M °yamarakāto modako u° BM °khattetvā° B °sī ha°. — 14¹. B °imāṇi a ° lāni sā°. — 15. BM °dāni tato mo°.

16. B bhagavāṁ ço° M sarvaço ° punaḥ phalā° BM °ṇakṣāṇi°. — 17². M etādṛçāni asmākaṁm āçra° BM °lāni icchasi idṛçā° B °tuṁ ‖ tato° M °daṁ āgacchāhi ‖. — 19. M °kaharo yaimādūvati ° dattaṁ eta°.

वाच ॥ इच्छामि अहं एतृशानि फलानि परिभोक्तुं आगमे मुहूर्तं इदमपाद आश्रमं न दूरं यावदिमं उदकं हरामि तातस्य आगमेमि ततः तव आश्रमं गमिष्यामि ॥ अथ खलु भिक्षवो राजा ब्रह्मदत्तो पद्मावतीये अपराणि मोद-कानि अदासि ॥ इमानि पितुस्तपनामेहि एवं च वदेहि । यस्य ऋषिस्य आश्रमे एतृशानि फलानि तस्याहं भार्या भविष्यामीति । लघु त्वं च आगच्छेहि एष अहं इह नदीतीरे आसामि ॥

अथ खलु भिक्षवः पद्मावती ऋषिकुमारी येन माण्डव्यस्य आश्रमपदं तेनोपसं-क्रमित्वा पानीयमाण्डं निक्षिपित्वा तानि मोदकानि पितुर्माण्डव्यस्य अनुप्रदासि । इमानि तात फलानि खादाहि यस्य ऋषिस्य आश्रमे एतृशानि फलानि तस्याहं भार्या भविष्यामि ॥ अथ खलु भिक्षवो माण्डव्यस्य ऋषिस्य एतदभूषि ॥ नूनं पंचालराजा ब्रह्मदत्तो मृगव्येन अटन्तः इमस्याश्रमस्य समीपं अनुप्राप्तो तेन इमानि मोदकानि दिव्यानि परिभुक्तानि पद्मावतीये राजार्हाणि मोदकानि न एषा प्रजानाति भूयो इहाश्रमे कटुकषायेहि फलाफलेहि यापयितुं पद्मावती च राज-कन्या । यन्नूनाहं अस्य राज्ञो ब्रह्मदत्तस्य भार्यां प्रयच्छेयं ॥ अथ खलु भिक्षवो माण्डव्यो ऋषिः पद्मावतीं ऋषिकुमारीमेतदुवाच ॥ न खलु पद्मावति एवं-रूपाणि फलानि भवन्ति को ते जनपदसमेहि कामेहि प्रलोभेति ॥ अथ खलु भिक्षवो पद्मावतीये एतदभूषि ॥ भवितव्यं आमा नाम ते वृक्षा येषां इमानि एतृशानि फलानि ॥ अथ पद्मावती एवं पितरमेतदवोचत् ॥ यदि तात आम-फलानामीदृशो आस्वादो नाहं परिभुञ्जिष्यामि न मे इमानि महत्फलानि रोच-न्ति ॥ अथ माण्डव्यो ऋषिः पद्मावतीमेतदुवाच ॥ को ते पद्मावति इमानि फलानि अदासि देवरूपो वा सो ऋषिकुमारो अन्तरिक्षे वा प्रदेशे तिष्ठति ॥

1. M °aham edṛś° B °bhoktu ā° M °kaṁ āgamanaṁ mhaddhe yā° B °dūra yāvad imaṁ u° M °rāmi tātasya āgamiṣyāmi tato tavāśra°. — 3. M °ito padmāvatī° BM °kāni dati adā°. — 4[a]. M °evaṁ vadehi || °dahi ya°. — 4[b]. M °syāśra bhā° B °mīti la°. — 5. M laghu ca āpṛcchesi aho haṁ i° B °cchāmi a°.

7. M °vaḥ padmāvatī ° yena māṇḍavyasya ā ° tur maṇḍa° B °tur maṇḍavyasya apradā-si | . — 9. B imāṇi tato phalāni khā° M °tāta phalāni khā ° ṛṣisyāśra ° tasyāhaṁ°. — 10[a]. BM °vo maṇḍa° M °ṛṣisyaita°. — 10[b]. M °ṛgena aṭanto imasyā° B °aṭantaḥ imasyā° M °prāptaḥ | to ° kāni padmāvatīye rājā° B °rhāṇi mo° M °kāni naiṣā ° kaphalehi pa-ribhuñjayituṁ padmāvatīṁ ca rājakanyāṁ | B °kaphale yāpayi ° vatīṁ ca rājakanyā ya°.

14[a]. M yo nūnā°. — 14[b]. M °vo māṇḍavyo ṛṣiḥ padmāvatī ṛṣiku°. — 15. M °pa-dumāvati evaṁrūpāṇi phalāni bhavaṁti ko te janapadasamayehi kā°.

16. M °padmāva° BM °ṣi bha°. — 17. M °yeṣāṁ imā°. — 18[a]. M °d pita°. — 18[b]. B °ṣu āsvādo° M °ṣe ādṛśo tāto padmaṁ pari ° rocaṁti | . — 20[a]. M °ṛṣiḥ padmā-va°. — 20[b]. M °padmāvati |° B °vati i° BM °si ko ca rūpo sā(M °vo) ca ṛ(B °ṛiṣi° M °mārī ka°

एवमुक्ते पद्मावती माण्डव्यं ऋषिमेतदुवाच । सुखाजिनो तात ऋषिकुमारो दक्षीणे खाति [311ª] मृगमभिरूढो तेन मे इमानि फलानि दिन्नानि तस्य च तात आश्रमे एवंरूपाणि फलानि । अथ माण्डव्यो ऋषिः पद्मावतीये सार्धं येन राजा ब्रह्मदत्तस्तेनोपसंक्रमित्वा राजानं ब्रह्मदत्तं प्रतिसंमोदित्वा पद्मावतीं राज्ञो ब्रह्मदत्तस्य उदकेन ददाति । एषा ते महाराज भार्या भवतु महाराजस्य च एषा अनुरूपा मा च परस्य वचनेन अननुयुंजित्वा विप्रियं कुर्यासि ।

अथ राजा ब्रह्मदत्तो पद्मावतीं अश्वपृष्ठमारोपेत्वा माण्डव्यस्य ऋषिस्याभिवादनं कृत्वा तथैव अश्वपृष्ठे अभिरूहित्वा येन कंपिल्लं नगरं तेन प्रक्रमे । अद्राक्षी-द्राज्ञो ब्रह्मदत्तस्य बलाग्रं दूरत एवागच्छन्तं दृष्ट्वा च पुनर्येन राजा ब्रह्मदत्तो तेनोपसंक्रमे । अथ राजा ब्रह्मदत्तो ततो अश्वपृष्ठतो ओतरित्वा पद्मावतीये ऋषिकुमारीये सार्धं हस्तिपृष्ठमभिरूहित्वा येन कंपिल्ले नगरे स्वकमुद्यानं तेन प्रयासि । अश्रौषीत्पद्मावती कंपिल्ले नगरे महतो जनकायस्य निर्घोषं नगरं च कंपिल्लमद्राक्षीत् उद्विद्धप्राकारं अट्टालगोपुरतोरणं रमणीयं च । दृष्ट्वा च पुनः राजानं ब्रह्मदत्तमामन्त्रयति । कस्य एतं तात वनविवरे निर्घोषो श्रूयति ऋषिणां एतं वनमृगाणां च उटजानि एतानि उद्विद्धानि दृश्यन्तीति । अथ राजा ब्रह्मदत्तो पद्मावतीमेतदुवाच । एतमृषिणां वनमृगाणां च निर्घोषो एतानि आश्रमं उट-जानि उद्विद्धानि दृश्यन्तीति । अथ राजा ब्रह्मदत्तो येन स्वकमुद्यानं तेनोपसं-क्रमित्वा हस्तिपृष्ठातो प्रत्योरुहित्वा पद्मावतीये उद्यानं प्रवेशे । अथ खलु राजा ब्रह्मदत्तो अमात्यपारिषद्यानामन्त्रयति । हो भणे ग्रामणिका चिरा पुरोहित-

1². M °padmâvati mâṇḍavyaṁ°. — 1³. M sukhâmo jino tâtaḥ ṛi° B sukhâmo° M °mâri tale°. — 3. M °ṣhiḥ padmâvati° dehâ padmâvatîm°. — 5. B eshâ te mahârâja bhâ° M °te mahârâjasya mâtâ anurûpâ mâ ca parasya vacena ananuyu°.

7. M °padmâvatîṁ° °shṭham ârohetvâ mâṇḍavya° B °shṭham ârûyetvâ maṇḍa° BM °sya eshi° B °pṛshṭo abhi°. — 8. BM °d râjñâ bra° M °durata eva° °punaḥ ye° °dattas tena°. — 10. M atha khalu râ° °tto tataḥ aça° B °çvapṛshṭhâto o° M °otaritvâ padmâva° B °supṛshṭham abhi° BM °yena kampillaṁ nagaraṁ sva°.

12. M °ddha padmâva° °kabhî udvi° BM °aṭṭâlaguḍa M °puraskato° yaṁ ca dṛ°. — 13. M °puna râjâ° °tam âmantra° B °yati ka°. — 14. M kasyedaṁ° BM °bhavanaṁ vanavi° B °shiṇâ etaṁ vanamṛ° M °ṇâṁ evaṁ vanamṛ° BM °ghoshâ ulaṭâ B °pâṇi etâ°. — 15. M °dudvatthyam e°.

16. M °m ṛishiṇâṁ° B °kaṁ ulaṭâni udvi° M °kaṁ ulaṭâni udvṛiddhâni dṛiçyanti |. — 17. B °pṛshṭhâto pratyâro° M °pratyârohitvâ padmâvati° pravicet | B °pravi-ça |. — 18. M °âmâtyânâṁ âmantra°. — 19. M ho maṇe grâmaṇikâ kehi° B °kshipra paro° M °nethe | padmâvati° ciriṇâ siddhavrapâni ca yâvat ca râjakulaṁ yâvat ca udyâ° B °dyânaṁ ca taṁ ciraṁ° M °muṁ sarva alaṁkâram kâ° B °laṁkâropetha | siktavitâ° M °taṁ cirita° °opaktopatte° paṁ bhâpitadhûpanam cokshacitâpṛshṭham mu° B °paṁ

आनेथ पदुमावतीये वस्त्राणि आभरणानि च याव च राजकुलं याव च वनं तमन्तरं सर्वं अलंकारापेथ विततवितानं चित्रपुष्पपरिक्षिप्तं ओसक्तपट्टदामकलापं धूपनधूपितं सिक्तसंमृष्टं मुक्तपुष्पावकीर्णं देशेदेशेहि नटनर्तकल्लमल्लपाणिस्वर्यशोभिकहिस्त्लनकवेलम्बकमृदुधराणि उपस्थपेथ ॥

मनसा देवानां वचसा पार्थिवानां
अचिरेणाढ्यानां कर्मणा दरिद्राणामिति

वचनमात्रेण राज्ञो अमात्येहि यथा[3 r b]ज्ञप्तं सर्वं पटियागृतं ॥ अथ पदुमावती राजानं ब्रह्मदत्तमेतदवोचत् ॥ कहिं ते भगवं शरणं समिधा वा उदकोदङ्कं कमण्डलु वा समयो वा मे अग्निहोत्रं जुहनाय ॥ अथ राजा ब्रह्मदत्तो पदुमावतीमाह ॥ आगमेहि मुहूर्तं सार्धं ते भूतानि अजिनानि आनीयन्ति ततः गंगायां स्नाता सहिता अग्निं जुहिष्यामः ॥ अथ राज्ञो अमात्यपारिषद्या तत्क्षणं तन्मुहूर्तं अन्तःपुरं तमुद्यानं आनयेन्सुः पदुमावतीये वस्त्राणि आभरणानि आनयेन्सु ब्राह्मणं च पुरोहितं राजाचार्यं आनयेन्सु श्रेष्ठिप्रमुखो च निगमो पि निर्यासि सार्थवाहप्रमुखो वणिग्ग्रामो निर्यासि सर्वाणि अष्टादश श्रेणी निर्यान्सुः ॥

अद्राक्षीद्राज्ञो अमात्या पारिषद्या नैगमजानपदा च ब्राह्मणा च पुरोहितो च राजाचार्यो ब्रह्मदत्तस्य देवीं पदुमावतीं सर्वालंकारविभूषितां प्रासादिकां दर्शनीयां परमवर्णपुष्कलतया समन्वागतां । राज्ञा ब्रह्मदत्तेन सार्धं अग्निप्रदक्षिणीं करोति । यत्र यत्र च क्रमाणि निक्षिपति तत्र तत्र पद्मानि प्रादुर्भवन्ति प्रासादिकानि दर्शनीयानि । दृष्ट्वा च हृष्टा तुष्टा हर्षजाता राजानं ब्रह्मदत्तमामन्त्रयेन्सुः ॥ नास्माभिः महाराज कदाचित्कस्यचिदेदृशी आश्चर्या दृष्टा वा श्रुता वा

dhūpanadhūpitaṃ muktapuṣpāvakīrṇaṃ° M °ṣeṇaṃ deśehi ca° BM °jillamallakaṃpāṇisvaryaśobhya° B °hāsināḍi° M °hāsalāsyahāsavelambakavelamānukārikādharāṇi upasthapetha ||.

6. M °svayaṃ devānāṃ° B °sarva pa° BM °ṭiyāgṛtaṃ || — 7. M °padumāvatīye rā°. — 8. M kahiṃ te bhavaṃ ga° B °gaṇaṃ ca° BM °naṃodaṃkaṃ° M °kamaṇḍalu vā samayo vā me° B °samaye vā me°. — 9. M °padumāva°. — 10. M agnim° °ṇīyanti tato gaṅgāyāṃ° B °kahanāni aji° nīyanti | ta° M °nīyanti tato gaṅgā° nīyāni ||.

11. M atha rājā amātya° B °ṣadyā pāri° M °kṣaṇa a° B °maṃ ānayensuḥ padu° M °naṃ ānayensuḥ | padumāvatī° B °ṇāni ānayetsu brā° M °ṇāni ānayetsuḥ brāhmaṇapurohitaṃ ca rājācāryaṃ ānayensuḥ śreṣṭhipramukhā ca nigamo niryāsi sā° B °ryaṃ ānayensu śreṣṭhipramukho ca nigamo bhāsiryāsi sā° BM °mukho vaṇi° B °aṣṭādaśa śreṇī niryānsuḥ ||. — 15. M °rohitā cā rājācāryyo bra° devī padu° laṃkāravibhūṣitaṃ prāsādi° nīyaṃ paramavarṇapuṣkaratayā sa° B °rvāgato ||.

17. M rājā bra°. — 18. BM yatra yatra cakkra° B °māni nikṣi° M °ṇibhavanti prā°. — 19. BM °hṛṣṭā ca tu° M °dattaṃ āmantrayensuḥ B °yensuḥ nā°. — 20. M °smābhir

यथा इमस्या पद्मावतीये देवीये । साधु महाराज पद्मावती देवी पादेहि राजकुलं प्रवेशियतु ततो महाजनकायो देवीये इमां एवरूपां ऋद्धिं दृष्ट्वा प्रीता संवृत्ता: ॥ अथ राजा ब्रह्मदत्तो सान्तःपुरः पद्मावतीये देवीये सार्धं अमात्यपारिषद्यपुरस्कृतो महता जनकायेन सार्धं महता राजर्द्धीये महता राजानुभावेन उद्यानातो राजकुलं प्रवेशि ॥ अष्टाशीतिो जनकायो यावच्च उद्यानं यावच्च राजकुलं पद्मावतीये पदवीतिहाराणां उभयतो पद्मानि प्रासादिकानि दर्शनीयानि ॥ दृष्ट्वा पुनः महाजनकायो उदानं उदानेति ॥ कृतपुण्यो महाराजा ब्रह्मदत्तो यस्य इममेवरूपं स्त्रीरत्नं प्रादुर्भूतं ॥ अथ राजा पद्मावतीये सार्धं उपरिप्रासादवरगतो पंचहि कामगुणेहि समर्पितो समङ्गीभूतः क्रीडति रमति परिचारयति पद्मावती च देवी म[3.14ª]देहि वचोहि च गीतवाद्येहि च प्रेमेहि तावदन्या देवीयो न समन्वाहरति पद्मावतीये प्रमत्तो । पद्मावती च राज्ञा ब्रह्मदत्तेन सार्धं संवसन्ती आपन्नसत्त्वा संवृत्ता ॥

यत्र काले देवीप्रजननवेला ततः राज्ञा ब्रह्मदत्तेन या अन्तःपुरिकायो कुब्जायो स्त्रीधर्माये ता आयत्ता पद्मावतीमुद्दिश्य । राजा च हिरण्यसुवर्णं अग्रतो कृत्वा नानाप्रकाराणि च वस्त्राणि भिषक्को ये मे निवेदयिष्यन्ति येनैव पद्मावती प्रजाता ति तेषां आच्छादं दास्यामि ॥ तासां पि देवीनामेतदभूषि । पद्मपादाय पद्मावती आनीता तदुपादाय अस्माकं राजा न समन्वाहरति । अथ एषा प्रजायमाना अस्माभि अनयव्यसनमापादयितव्या ॥ ता दानि तां पद्मावतीं

mahâ° B °d edriçâni riddhi drishtvâ ca çru° M °riddhîm drishtvâ câ prîtâ ya° B °imasya pa° M °imasya padmâvatîye devîye B °vîye sâ°.

1. M °hi râjakula praveçatu | tadâ ma° B °mahâm janakâ° M ° imâm evarupâ tam riddhîm° B °pâm riddhim dri° BM °ratrah | . — 3. M °ntahpuro padu ° ahadyâpurask°ta mahato janakâ ° pravisi | . — 5. M °yo yâvaca râjakulam yâvaca udyânam padmâvatî ° vîthihârâ° BM °to padmâvatî prâsâdikâm darçanîyâm dri°.

7¹. M °kâya udânam°. — 7². M °ni evarûpam°. — 8. M °jâ padmâvatîye sârddham upari ° guṇa samarpa° B °rpito samaṅgîbhû° M °krîḍito ramati pravi° B °krîḍanti ramanti pravi° BM °yati padmâ(B °demâ)vatî ca devî ca adehi akehe ° gakhedi(M °gesha) tâvadanya devî yasa samâha° M °ti | padmâva° BM °tto pa°.

11. M padmâvatîm ca° B °rddhena samvasanti â° M °ssanti â ° jâtâ B °jâtâ ya°. — 12. BM yatra kâlam devî prajâmaveli° M °tato râjño bra° B °ttena yo a° M °yâm nâmâyatâ padmâvatîm anuddhâ B °tha râ°. — 14. B râjâ ca hi ° suvarṇam agra° M °sharuṇâye me° BM °yishyati | kahe° M °ca padmâvatî prajâtâni te° B °prajânâti te°.

16¹. B °bhishi pa°. — 16². B padmapâdâya anmâ° M yad upâya padmâvatî â ° râjânam sa°. — 17. M °smâbhir anaya° B °yitavya | C °yitavyâ | . — 18. BM te dâ° M °nikânâm padmâvatîm pricchanti jâ° B °pricchati jâ°.

पृच्छन्ति । जानासि कथं स्त्रियो प्रजायन्तीति । सा दानि आह । न जानामीति । ता दानि अन्तःपुरिका आहंसु । स्त्रीये प्रजायमानीये अक्षीणि पट्टकेन बध्यन्ति । सा दानि आह । मह्यं पि प्रजायमानीये अक्षीणि पट्टकेन बन्धेथ । तस्या दानि यं वेलं प्रजायिष्यतीति ततो अस्या अक्षीणि पट्टकेन बद्धानि । सा दानि द्वौ दारकौ प्रजाता प्रासादिका दर्शनीया । तासां दानि एतदभूषि । अपुत्रा तावियं देवी राज्ञो ब्रह्मदत्तस्य इष्टा च बहुमता च आसि किं पुनः सपुत्रा अपुत्रकस्मिं राजकुलस्मिं । इमाये द्वौ दारका जाता ततो अधिमात्रं राज्ञो ब्रह्मदत्तस्य प्रिया भविष्यतीति वयं च न समन्वाहरिष्यति । ताहि दानि अन्तःपुरिकाहि ते दारका तपनकस्मिं चैलकं उपस्तरित्वा तत्र प्रक्षिप्ताः । तं तपनं स्वपिहितं सुबद्धं कृत्वा राजकीयेन तापनीयेन तापयित्वा मुद्रयित्वा नदीये गंगाये प्रक्षिप्ता । पद्मावतीये च स्वकेन गर्भमलेन मुखं खचितं । सा दानि पद्मावती अन्तःपुरिकां पृच्छति किं मे जातानि । ताहि पि अन्तःपुरिकाहि द्वे उल्मुकानि गर्भमलेन म्रक्षयित्वा पद्मावतीये अक्षोपितानि । इमानि प्रजातानि । सा दानि आह । गृह्णथ एतानि किं एतेषां करिष्यामीति । राजा दानि ब्रह्मदत्तो पृच्छति । किं देवी प्रजाता ति । ता आहंसु । महाराज द्वे दारका प्रजाता प्रासादिका दर्शनीया ते [3.12b] च नं जातमात्रा ताये खादिता । कुतो महाराज ब्रह्मचारिस्य ऋषिस्य अपत्यानि पिशाची एषा त्वया आनीता त्वं दिष्ट्या जीवन्तो मुक्तो । ताये पिशाचिनीये मूलातो आगच्छ पश्याहि तां यदि अस्माकं न श्रद्दधासि । सो दानि तां देवीं पश्यनाय प्रविष्टो पश्यति च पद्मावतीं

1[b]. B °si | ka° M °thaṃ striyo prajāyanti | . — 2[a]. B te dā° M °antaḥpurikā āhaṃsuḥ stri°. — 2[b]. M °kshiṇī pa° °dhyate. — 3[b]. M °akshiṇī pa° B °kena bandhatha | . — 4. B tasya dāni yaṃ ve° M tasya dāni yaṃ° B °iti | tato asya akshiṇī pa° M tata 'sya akshiṇī pa°. — 5[b]. M °jātāḥ prā° BM °nīyā tā°. — 5[c]. B tāsāṃ dārikāni e° °ūshi a°.

6. M aputra tāva yaṃ° °sya ishṭāya° BM °bahūmatā° saputre aputrasmiṃ rāja° BM °kulasmiṃ i°. — 7. B °dārikā jātā | tato adhimā° M °dārakau jātāu tato adhimā° °priya bha° B °tīti | va°. — 8. B °dārakā tapanasmi cai° M °dāraka tapanke cailakaṃ upastaritvā te dārakā tatra° B °upastaritvā te dārakā tatra°. — 9. M °kṛtvā tāpanīyena tāpayitvā mu° B °dīye gaṃ° M °kshiptāḥ taṃ°.

11[b]. M padmāva° °rbhamale mu° BM °khaṃ prakshitaṃ | . — 11[c]. M °padmāva° jā-tāni ti | . — 12. M °kāshṭhā iva uddhahantā pa° B °uddhaḥrāntā pa° M °lena prapraksha-yitvā padmāva° B °ukshipitāni | . — 13[b]. BM amhiyatha° M °ni kiṃ ete° B °ete ka°. — 13[c]. B °vehati kiṃ°. — 15[a]. M devī° B °jātāni | . — 15[b]. M °āhaṃsuḥ | . — 15[c]. M °ja tev dā° prajātāḥ prā° BM °yā tena taṃ jāta° B °mātraye khādite ku° M °mātraṃ ye khā°.

17. M °apatyaṃ ti ja° °esho tva° B °shā | tva° M °nītāḥ tāṃ drishtvāsi° B °nītā tā drishṭvāsi° BM °kto ta°. — 18. B °cinī° hi taṃ ya° M °hi | taṃ ya°. — 19. M °vaṃ pasya° °vaḷi ca° B °dhirapraksh°.

रुधिरम्रक्षितेन आकृती राक्षसी ॥ सो दानि तान्दृष्ट्वा भीतो संजातो ॥ अमात्यानामाह ॥ गच्छथ तां घातापेथ मानुषिका ति कृत्वा एषा मयानीता यदि एषा पिशाचिनी वा राक्षसी वा न मे ताये कार्यं ॥ सा दानि ततो राजकुलातो निष्कासिता ॥

सा दानि तेषाममात्यानां पृच्छति ॥ कहिं मे नयिष्यथ ॥ ते आहन्सुः ॥ राज्ञासि ब्रह्मदत्तेन वध्या ओसृष्टा ॥ सा दानि तेषां अमात्यानां पृच्छति ॥ किं मये राज्ञो ब्रह्मदत्तस्य अपराद्धं येनाहं वध्या ओसृष्टा ॥ ते अमात्या आहन्सुः ॥ त्वया द्वे दारका जनित्वा खादिता ततो राज्ञा पिशाचिनीति कृत्वा वध्या ओसृष्टा ॥ सा आह ॥ न मे दारका जाता पृच्छथ अन्तःपुरिकां ता आहन्सुः द्वे ते उल्वका जाता ते पि तथैव मेलिता नैव दारकानि पश्यामि नैव खादामि ॥ ते दानि अमात्याः पण्डिता स्त्रीमायानां शाठ्यानां चाभिज्ञाः ॥ तेषामेतदभूषि ॥ इयं पद्मावती राज्ञो ब्रह्मदत्तस्य इष्टा च बहुमता च कान्तं विहरति यं एताहि अन्तःपुरिकाहि एषा पद्मावती अत्यामकानी अनोकृता भवेय विप्रलब्धा वा ॥ ते दानि अमात्या तां पद्मावती पृच्छन्ति ॥ कथं सि प्रजाता ति ॥ सा दानि तेषां अमात्यानां तां प्रकृतिं विस्तरेण आचिक्षति ॥ ताहि मे अन्तःपुरिकाहि प्रजायमानीये अक्षीणि पट्टकेन बद्धानि नैव दारकान्पश्यामि नैव खादामि । यं कालं च प्रजाता ततो पृच्छामि तानि अन्तःपुरिकानि किं मे जातं ति ताहि दानि मम द्वे उल्वका अक्षीपिता ते जाता ति ॥ तेषां दानि अमात्यानामेतदभूषि ॥ इयं देवी अन्तःपुरिकाहि ईर्ष्याप्रकृतेन विप्रलब्धा इयं च देवी ब्रह्मदत्तस्य इष्टा च बहुमता च सा पश्चाद्राजा ब्रह्मदत्तो

1[1]. M °sa tāṁ dṛṣṭvā°. — 1[2]. B amātyenā° M °tyā āha | . — 2. B gacchatha tāṁ ghātāpetha mā° M gacchatha tāṁ ghātāpetha mā° BM °mānuṣikāni kṛt° M °tvā ekā mayā nītā | yadi yadi pa° ne tāye kāryyaṁ || . — 3. M °ṣkāsitā | B °ṣkāsitā sā°. — 5[1]. M °teṣāṁ amā° B °ṣāṁ amātyāṇāṁ amā° BM °ti ka°. — 5[2]. M °hiṁ te me na°. — 5[3]. M °āhaṁsuḥ | .

6[1]. BM °na vadhvā o° M °sṛṣṭāḥ | . — 6[2]. B °amātyaamātyā° ti kiṁ°. — 7[1]. B °aparaddhaṁ | ye° M °aparāddhaṁ ye° BM °vadhvā o°. — 8. M tvayā ca dā°. — 9[1]. B °ha ma°. — 9[2]. M °chāmi || antaḥpurikā te ā° B °kāṁ | te ā° M °nsuḥ | dave te ulūkaṁkā jā° B °dvalve ti ulvamkā jā° BM °mellitā naiva dā° M °naiṁvaṁ khā° B °khādāmi te°.

11. M °amātyā paṇḍitā strī° śāṭhyānāṁ cā° B °śāṭhyānāṁ cā° M °jñāḥ teṣāṁ°. — 12[1]. B °ohi iyaṁ°. — 12[2]. B °ahāṁ viharu° M °dyāti | yaṁ etāni antaḥ° B °etāni antaḥ°. — 14. M °tyā nāṁ paduma° BM °cchati ka°. — 15[1]. BM °nāṁ tāṁ prakṛ°.

16. M °akṣīṇi pa° naivaṁ dārakāṁ paśyāmi naiva svādāmi | B °dārikān pa°. — 17. M °mi tāni antaḥpu° ve ulūkaṁkā akṣīpitā te jānāti ta° B °ve ulvaṁkā akṣīpitā | te jānāti te°. — 19[1]. B °ha iṣṭyā° M °sya iṣṭyā° BM °ṣakena ca glaunāyaṁ°.

द्वीपे पद्मावतीये बलेन बिम्बिसारो भवेय शोकेन च मैनाकं पतेय । तेहि [313ᵃ] दानि अमात्येहि सा देवी पदुमावती स्वके गृहे गोपिता राज्ञो ब्रह्मदत्तस्य निवेदितं घातिता देवीति ॥ ता दानि देवीयो घातिता पदुमावतीति श्रुत्वा तस्य राज्ञो ब्रह्मदत्तस्य चटुकारायन्ति धूतं च परिविषन्ति सर्पर्षाणि च अपी प्रचिपन्ति चतुर्दिशं च बलिं निष्क्रामयन्ति शान्तिं च करोन्ति दिष्ट्यासि महाराज जीवन्तो मुक्तो राक्षसीहस्तातो ॥ तं मुहूर्तं राजा स्नातो विलिप्तो नित्युघोषेण नाटकेन प्रक्रीडितो । तावदन्तःपुरिकायो काचिद्वीणां प्रवादिता काचित्सुघोषकं काचिन्मृदंगं काचिद्वेणुं काचित्प्रनृत्यन्ति काचिद्गायन्ति ॥

अथ खलु तिस्सो अन्यतरा देवता मायकायिका अभिप्रसन्ना वैहायसमन्तरीक्षे स्थिहित्वा राजानं ब्रह्मदत्तमेतदुवाच ॥ दुःश्रुतं ते महाराज अपरिज्ञातं ते महाराज अविज्ञातं ते महाराज यो त्वमननुयुञ्जित्वा अपर्यवगाहित्वा अनपराधी पदुमावती वध्यामर्षयसि तादृशस्य महाभागस्य आर्षिकस्य वचनं न समनुस्मरसि ॥ अथ राज्ञो ब्रह्मदत्तस्यान्तःपुरिका देवताये अन्तरीक्षगताये तं घोषं श्रुत्वा भूयतरं गायन्ति वादेन्ति च यथा राजा ब्रह्मदत्तो एताये देवताये शब्दं न शृणेयाति ॥ अथ राजा ब्रह्मदत्तो अन्तःपुरिकां निष्कासेति कामेव तावत्स्थानान्न किमेषा देवता अन्तरीक्षगता भणतीति ॥ सा दानि अन्तःपुरिका राज्ञो वचनेन तूष्णीभूता संजाता देवता राज्ञो ब्रह्मदत्तस्याह ॥ दुःश्रुतं महाराज यो त्वमननुयुञ्जित्वा अपर्यवगाहित्वा अनपराधी पदुमावती देवी वध्यां घोषिरेसि तादृशस्य महाभागस्य आर्षिकस्य संदेशं न समनुस्मरसि ॥ राजा दानि

1. B °taṁ pahitā devīti | M °taṁ ghātitā devīti | . — 3. M °ghātitā padumāva° sya cāṭukārāyanti ghṛtaṁ° B °sya cāṭukārāyanti ghṛtaṁ° M °pariviṣanti sarvapāṇi ca agnau prakṣipanti catu° ṇikāsayanti | diṣṭyāsi mahā° B °ṣānti ca karoti diṣṭyāsi mahā° BM °rākṣasīto ha° B °ṣṭāto taṁ°.

6. M muhūrta rā° B °viliptaṁ° BM °nityaghoṣeṇa° ṭaka ka°. — 7. B °kaṁ | kācit vīṇāṁ° M °gaṁ kāci dardaraṁ kācid ve° B °vaṁ kācin pra° kācit gāyanti | M °tyantī kācit gāyanti | . — 9. BM °ṁ imaṁ ja° M °siheti rā°. — 10. B duḥśrutaṁ° M duḥśrutaṁ me mahārāja aparijñātan te mahārāja avijñātaṁ te mahārāja yo tvaṁ ananu° B °taṁ te mahārāja abhijñātan te mahārāja yo tvaṁ ananu° BM °hetvā anaparādhīṁ padumaṁ M °dhīṁ padumāvatiṁ vadhyā° B °smarati | .

13. M °brahmadattasyāntaḥpurikāye de° B °purikā de° M °rīkṣe ga° B °gāyanti° M °gāyanti vādyanti ca yathā ° ito ye tāye de°. — 15. M °purikā nistha ° kim eṣā de° B °kṣagatā ya° M °bhaṇatīti | .

16. B °vacana tūṣṇī° M °jātāḥ de °syāhuḥ | . — 17. B duḥśrutaṁ° M duḥśrutaṁ te mahā° yo tvaṁ ananu° B °yo tvaṁ ananu° M °hitvā anaparādhīṁ padumāvatīṁ devīṁ vadhyā° [illegible] | tā°. — 19. M °kāye pa°.

ब्रह्मदत्तो ताये देवताये श्रुत्वा अन्तःपुरिकायो पृच्छति ॥ सत्यं अत्राय किन्ति दानि दारका ये पद्मावतीये जाता: ॥ ता दानि अन्तःपुरिकायो राज्ञा ब्रह्मदत्तेन पृच्छियन्तीयो ना प्रभवन्ति ॥ पद्मावती राज्ञा आपन्तीये घातिता भवति राज्ञा अस्माकं पि परित्यजितुं आचिक्षाम नं सत्यं यथाभूतं ति ॥ ता दानि अन्तःपुरिका आहन्सु: ॥ महाराज पद्मु[3, 3ᵇ]मावतीये द्वे दारका जाता ते अस्माभि: तपनाये प्रक्षिपित्वा राजकाये मुद्राये मुद्रेत्वा सतपना नदीये गंगाये प्रवाहिता नापि तत्रापि दृष्टा नापि खादिता पि ॥ तस्य दानि राज्ञो ब्रह्मदत्तस्य दौर्मनस्यं उत्पन्नं ॥ अनपराधी तादृशी स्त्रीरत्नं मया घातापितं तादृशस्य च महाभागस्य ऋषिस्य मया संदेशं न कृतं पुत्रा लब्धा च परित्यक्ता ति ॥

सापि दानि मंजूषा नदीये गंगाये वुह्यन्ती कैवर्तकेहि मत्स्यबन्धकेहि उत्क्षिप्ता ॥ ते दानि केवट्टा तां मंजूषां पश्यन्ति राजकाये मुद्राये मुद्रितां ॥ तेषां केवट्टानामेतदभूषि ॥ मा हैव चौरेहि राजकुले अपराद्धं ततो इमा मंजूषा प्रष्टा भविष्यति सर्वेषां युक्तं अकामीभवति गच्छाम इमां मंजूषां राज्ञो ब्रह्मदत्तस्य उपनामेम मा वयं चौरा ति कृत्वा ज्येष्ठेन दण्डेन शासेयेम ॥ ते दानि तां मंजूषामादाय राज्ञो ब्रह्मदत्तस्य उपसंक्रान्ता महाराज अस्माभिरेषा गंगायां मत्स्यबन्धकेहि इयं मंजूषा उदकेन वुह्यन्ती उत्क्षिप्ता राजमुद्राये मुद्रिता तां देवो प्रत्यवेक्षतु ॥ अथ खलु सिवयो राजा ब्रह्मदत्तो अमात्यपारिषद्यानामन्त्रयति ॥ हो भणे

1. M °tha kiṃ te dārakā ye padmāva° BM °jātāḥ iti°. — 2. M °kāyo rājā bra° BM °ttena pṛcchanti pṛccha° °nīyo na paçyanti B °nīyo ve paçyanti |. — 3. M padmāvatī rājā āpantīye ghātitā pra° B °jāpantīye ghā° BM °vati | rājā a° M °kahāma taṃ sa° °bhūtaṃ ti || B °taṃ ti ti°. — 5. M °jātāḥ te asmābhi tapanāye pra° BM °kāye(B °kāyaṃ) mudrā(B °drāye) mudre(M °driṃtvā) sā tapanā nadī° °hitā nāpi trutāpi dṛṣṭatvā nāpi khā°.

7. M tasyā dā° °daurmanasyam utpa°. — 8. M °ghātāpitaṃ | sādṛ° BM °deçaṃ kṛtaṃ | putra labdhyanto ca parityaktāḥ ti |. — 10. M °mañjuṣā° °hyanti | kaivarttehi matsya° BM °matsyā bandhanehi nadīye gaṅgāye vahyantī utkṣiptā |.

11¹. M °ni kaivartakā taṃ mañjuṣaṃ paçyanti rā° B °kevaṭṭa taṃ mañjūṣaṃ pa° M °drāya mudritaṃ | B °dritaṃ |. — 11². M °ṣāṃ kaivartakānāṃ e° B °kevaṭṭānāṃ° °abhi sat°. — 12. M mā hairaṃ co° B °haiva cāra° °le aparāddhaṃ ta° M °le aparāddhaṃ || ta° BM °te imaṃ mañjuṣā(B °ṣo) prakhyā(M °ṣṭhā) bhavi° M °ṣyati || sarve ca pu° °cchāma || imaṃ mañjuṣaṃ rājño° B °cchāma imaṃ mañjūṣaṃ rājño° M °name | mā vayaṃ caura ti kṛ° B °jyeṣṭena da° M °ṣṭhena daṇḍena ça°. — 14. BM °ni taṃ mañjū(M °ju)ṣām ā° B °saṃkrāmantā° M °saṃkrāntā mahā° °yāṃ matsyabandha° B °yāṃ matsyā bandhantehi | i° M °yaṃ mañjuṣā° B °kena vuhya° M °vuhyantī utkṣi° BM °drāyaṃ mudritā taṃ de° B °vekṣitu ||.

17¹. M °dattā amātya pārṣadyā° °yati ||. — 17². BM °tha | ki° M °mañjuṣāyam ti || B °yaṃ ti sā°.

ज्ञायथ किमत्र मंजूषायं ति ॥ सा दानि मंजूषा अपावरिता मुक्ता पश्यन्ति च तानि पद्मावतीये द्वे दारका प्रासादिका दर्शनीया ॥ ते आहंसुः ॥ महाराज इमहिं मंजूषायां द्वे दारका प्रासादिका दर्शनीया पद्मावतीये पुत्राणि महाराजस्य संभूतानि । अनपराधी महाराज पद्मावती देवी ईर्षाय अभ्युद्धुजिता अपर्यवगाहित्वा यथा घोषुष्टा ॥ अथ राजा ब्रह्मदत्तो तानि दारकाणि दृष्ट्वा पद्मावतीये च वक्त्राणि गुणकर्माणि समनुस्मरन्तो मूर्छितो भूम्यां पतितो दुःखीरजातो भूतो ॥ अथ तेषाममात्यानामेतदभूषि ॥ मा हैव राज्ञो देवीये उत्कण्ठनाय किंचिदेव शरीरस्याबाधं भवेय ॥ ते दानि आहंसुः ॥ महाराज मा पद्मावतीये कारणेन उत्कण्ठेहि अस्माभिरेवं देवार्थे उपजनिता साहसं न कृतं देवी स्थापिता न घातिता अनागतं अर्थपदं ज्ञात्वा ॥ सो दानि राजा ब्रह्मदत्तो एतम[3 a 4']मात्यानां वचनं श्रुत्वा प्रह्लादितो संजातः ॥ अमात्यानाह ॥ कहिं पद्मावतीति ॥ अमात्या आहंसुः ॥ अमुक गेहे ति ॥ राजा दानि तस देवीये पद्मावतीये सकाशं गतो ॥ गत्वा राजा पद्मावती देवीं क्षमापयति संज्ञापेति दिष्ट्यासि देवि तादृशातो व्यसनातो च मुक्ता दिष्ट्यासि मया च पुत्रेहि च समंगीभूता । तपस्वीहि सि च मं घातापिता किंचि अभिप्रायं किंचिणं तव अभिप्रायं दापयामि कीदृशं वा व्यसनं निगच्छन्तु येषां भवे यदि राजाज्ञया सर्वावसा निगडबद्धा शाकशाटकनिवस्ता अटनं परिचरन्तु ॥ अथ खलु शिवकी पद्मावती देवी अग्रमहिषी राजानं ब्रह्मदत्तमेतदुवाच ॥ मा महाराज तासां देवीनां किंचिद्विप्रियं करोहि ॥ एता ज्येष्ठायो अहं कनीयसा या च एतेषां

1. M °mañjushā a° B °jāsho a° M °mukto paçyanti ca° B °nti | ca° M °ni padmāvatīye tva° B °rgaṇā to°. — 2[b]. BM °imaṃhi mañjū(M °jūshāyāṃ(M °yaṃ) dva° M °ye padmāva° °ṇya sukṛi°. — 3. B anuparādhīṃ ma° M °ja padmāva° °navajjitā apary° B °vaddhyā a°. — 5. M °shṭvā padmāva° BM °guṇāni ca sa° B °nto | mū° °bhūrashtā |.

7[b]. M °teshāṃ amā° B °teshāṃm amā°. — 7[b]. M °utkaṇṭhaṇya kiṃ° BM °cid devasya çarī° M °bādhaṃ bha° BM °sayaṃ |. — 8[b]. B ta dā°. — 9[b]. M °ja padmāva° B °ja na padu° M °lobhiṃhe aṃ° B °pitā na dyātitā anā° M °ghāṭitā | anā°. — 10. B sā dā° dānā ma° M °jāta |.

11. M °tyānam ā° B °tyā āha |. — 12[a]. M °padmāva°. — 12[b]. M °dānisaḥ |. — 12[b]. BM °ho ti rā°. — 12[b]. BM rājā(B °jāḥ) dāni(M °nī) ta° M °padmāva° B °to ga°. — 13. M °padmāva° B °jñāpeti dṛishṭyā° M °peti dṛishṭvāsi | devī ° kā dṛishṭyā ca mayā° B °kā dṛishṭyā ° M °samaṃgībhūtāḥ ca° B °bhūtā ca°. — 15. BM °tuhi sma(B °va)-maṃ° B °ghātāyitā kiṃ te abhi° M °mīyānaṃ° B °samaṃ nirgacchatu çre° M °echatu prayaṃ° BM °bhava(B °va) yadi rajānaṃ tā sarvā va kiṃ nigaḍabaddhānaṃ(M °nasa) çākaṭanivastānaṃ paricarantaḥ(M °nto) |.

17. M °kohavalo padmāva ° devamāṇī tā kiṃ te rājā°. — 19. BM etāṃ jyeshṭā(M °shṭho)-

कल्पिता वृत्ती तां मानं अभिवर्धेहि मा परिहापेहि सर्वाणि च अनुवर्ताहि । यथाकृतानां कर्मणां सत्वा विपाकमनुभवन्ति कालं आगमयाय यथा द्रुमाणां पुष्पफला । मया एवं महाराज तानि कर्माणि कृतानि यदहं त्वया सत्कृता च मानिता च मया एवमानि कर्माणि कृतानि यदहं त्वया वध्या घोषिता । अथ राजा ब्रह्मदत्तो पद्मावती देवीमेतदुवाच । मा देवि अत्यर्थं प्रपातेहि सर्वंमे राष्ट्रं निःसृतानि पुत्रेहि समंगीभूता अभिरमाहि क्षमाहि च मे एतं अपराधं । अथ पद्मावती देवी राजानं ब्रह्मदत्तमेतदुवाच । किं मे महाराज विज्ञानकीये राज्येन पुत्रेण वा धनेन वा गंतामि अहं प्रव्रजित्वा पुनः तातस्य सकाशं । उक्तं तातेन को ते पद्मावति आश्रमवर्णेहि कार्येहि प्रलोभेति ते मे तातस्य वचना इदानीं परिदहन्ति यथाहं तातेन आश्रमपदे उक्ता यं तव महाराज भूयोपि आगमातो पितुः सकाशातो अनपराधी वध्या ।

अथ पद्मावती देवी पुनरपि प्रव्रजित्वा धातुरक्तानि वस्त्राणि प्रावरित्वा माठव्यस्य ऋषिस्य आश्रमं गमते । माठव्यो च ऋषी कालगतो अभूषि । तृणकुटीपर्णकुटीनि विशीर्णानि अभूंसुः । अथ पद्मावतीये देवीये एतदभूषि । तादृशेन मे निर्बन्धेन विनाशयितो राजा ब्रह्मदत्तो प्रज्ञाख्यातः पिताशो मे [3 r 4^a] कालगतो अथ परिक्षष्टा । यं नूनाहं भिक्षाचारं चरामि जनपदानि च राजधानीयो च अनुचरन्ती । अथ पद्मावती देवी जानपदराजधानीषु चरन्ती वाराणसी राज्ञो कृषिस्य नगरं गता । अट्टालीवाराणसीयको काशिराजा

pa sthaṃ° M °kuruṣya° BM °sā yaṃ ca sta° M °syāti taṃ mānaṃ° B °iti taṃ mānaṃ° BM °hāyehi sa° °rṇāhi ya°.

2. M °bhavanti || kālaṃ ka°. — 3. M °mānitāni ca || mayā evaṃ tāni ka°. — 4. M °padmāva°. — 5. M °devī apramā° B °apramā° M °rājyaṃ nih° BM °māhi na me ekaṃ apa°.

7^b. BM °vijñānīye rā° M °ṇa taṃdhanena mārgyantaṃ ° punas tātasya sakāśam ukta° B °aṃ tātasya sakāśaṃ u°. — 8. BM °ko tava padmāvati (M °māvati) jṛa° M °samayehi ka° BM °bheti | te° B °me tātasya° BM °hanti || yathā evyaṃ yathāhaṃ° B °ktā yaṃ me mahā° M °ktā yan tava mahā ° parādhiṃ vadhyā || B °parādhiṃ vadhyāṃ ||.

12. M atha padmāvatiṃ devīṃ pu° B °mānā devī ° e tāpasīṃ pra° M °e tāpasīṃ pra° BM °ritvā māṭha° M °shiyāśra° B °āgamanaṃ | . — 13. BM māṭha° M °ṣinā kā°. — 14^a. M tṛṇakuṭīparṇakuṭīnī vi° B °ṇakuṭī vi° M °abhūvaṃs || . — 14^b. M °padmāvatī devīṃ eta° B °ehi tā°. — 15. M °me nibandhena vinaśayitena° B °ndhena vinaśitena° M °khyāta pi° BM °loguṇa vayaṃ°.

16. BM °caṃ carantī ja° rāṣṭrarājadhānīṣu ca anuvayanti (M °yati) || . — 17. M °padmāva° B °rāṣṭrarājā° M °rāṣṭrarājadhā ° kṛṣiṣya°. — 18. M °ako kāśirājā padmāvatīṃ devīṃ paridaṃta° B °parādanta° M °padmāva° BM °yaṃ bhrutyāya jātirū° M °pañcphalāni pra° B °tāni phalāni prasādikāni prasādāni° M °kāni prasādikāni tasya° B °ehi sukhānantaraṃtare abhi° M °sukhānantaraṃ abhi° BM °dayāna || —

पदुमावती देवी पुरान्तरे दृष्ट्वा च पुनः काशिराजा पदुमावती देवी बहुप्रकारं प्रलोभेति किं तव भद्रे प्रव्रज्याये तरुणाये बालरूपाये अभिरूपाये इमानि याद्-यानि पुष्पितानि फलानि प्रासादिकानि प्रसादनीयानि मनोरमकराणि एहि अमुष्यायामनान्तरे अभिरमिष्याम । एवमुक्ते पदुमावती तापसी काशिराजान-मेतदुवाच । अपि महाराज इच्छसि प्रवेष्टुं ये प्रव्रजिताये सार्धं इच्छसि रमितुं धर्मविनाय नाहं महाराज कामेषु अर्थिका ति । काशिराजा आह । यदि भद्रे न इच्छसि ततो बलसा ते धर्षिष्यामि । पदुमावती आह । यदि बलसा मे गृह्णसि ततो ते तपसा अग्नीव शुष्कतृणं दहिष्यामि । सो दानि राजा तं श्रुत्वा भीतो प्रत्यागतो च सा च तत्र राष्ट्रे यथासुखं यथाकामं । अहं ते निम-न्त्रेमि सर्वहितोपस्थानेन ।

अथ ब्रह्मदत्तो राजा ब्राह्मणवेषेण काशिराजो गृहं प्रविशित्वा आह पि महा-राज अपेहि कुशलो ति । सो पि राजा देवीहि सार्धं क्रीडन्तो क्रीडते पदु-मावती च समार्पति । केन कोपेन इहागता । पदुमावती आह । तव एव महाराज अपराधेन इहागता । ततो काशिराजा संभ्रमितो राजानं ब्रह्मदत्तं पृच्छति । न मे कदाचिद्दृष्टपूर्वा एतादृशी नारी श्रुतपूर्वा कस्त्वं का ते एषा ति । राजा ब्रह्मदत्तो आह । अहं ब्रह्मदत्तो पंचालराजा एषा मे पदुमावती भार्या इहागता । एवमुक्ते काशिराजा ब्रह्मदत्तं राजानमेतदुवाच । स्वागतं महाराज अनुरागतं महाराज नेहि देवी अहं यथार्थेन संविभजामि । अथ राजा ब्रह्मदत्तो पंचालराजा पदुमावतीं देवीं वाराणसीतो चतुरंगेन बलकायेन सार्धं हस्तिपृष्ठे आरूढयित्वा महता राजानुभावेन महता राजर्धीये पुनः कांपिल्ल नगरं आनेसि । पदुमावतीये च देवीये राजा ब्रह्मदत्तेन अग्रमहिषीभावे च

4. M °padmāva°. — 5. B °akṣaṃ | yaṃ° M °abhilṣam icchasi ° sthitā | ye nā° BM °rthikā ni ||.

6b. M °te gṛihṇāsyāmi ||. — 7a. M padmāva° B padumāti°. — 7b. BM °gṛihṇasi (M °si ||) tato ° yaṃ dahi°. — 8. B °pratyāgato° BM °yāthā s°. — 9. B °hanti | te°.

11. B °brahmadatto° M °çirājo gṛihaṃ praveçitvā° B °pravitvā° M °hārājā ahchehi kuça-lehi ti ||. — 12. B °eṣa krīḍato pa° M °eṣa krīḍako padmāvatīṃ ca saṃvadanti ke° B °vatīṃ ca saṃvadanti ||. — 13a. M padmāva°. — 13b. M °evaṃ ma°. — 14. M tataḥ kā° B °cchati na°. — 15. M °ahṭāpūrvādharya° BM °dṛiçāni gṛiṃ çru° B °s tvaṃ kānte s° M °te saho ti ||.

16b. M °jā eshā me pañcālarājā || mahā me padmā° B °ahāṃ me°. — 17a. B °devī s° M °haṃ ca balāgreṇa taṃ vi° BM °bhajāmāmi ||. — 18. M °padmāvatī de° B °vatīdevīṃ vārāṇa° M °turaṅgena ba ° pṛiṣṭha āruhitvā° B °priṣṭe āropitvā° M °ṛiddhyena kāṃ-pillanagaraṃ°.

21. BM padmā M °dmā)vatī ca devī rājña bra ° [illegible] B °[illegible] ||.

क्रमेषु तानि पदुमानि अन्तर्हितानि अभूंसुः । पुनश्च राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लं आनीताये भूयो क्रमेषु पद्मानि प्रादुर्भूतानि ॥

भगवानाह ॥ न खलु भिक्षवो अन्यो स माण्डव्यो ऋ[3:5*]षिरहमेव तदा माण्डव्यो ऋषिरभूषं ॥ न खलु भिक्षवो अन्या पदुमावती देवी । एषैव यशोधरा तदा पदुमावती देवी अभूषि ॥ न खलु भिक्षवो अन्यः स राजा ब्रह्मदत्तो भू । एष राजा शुद्धोदनस्तदा राजा ब्रह्मदत्तो अभूत् ॥ तदापि एतेन राज्ञा शुद्धोदनेन एषा यशोधरा अननुयुंजित्वा अपर्यवगाहित्वा वध्या ओसृष्टा । एतर्हिं पि एषा एतेन राज्ञा शुद्धोदनेन अननुयुंजित्वा अपर्यवगाहित्वा अनपराधी वध्या ओसृष्टा ॥

पदुमावतीये परिकल्पो समाप्तो ॥

भिक्षू भगवन्तमाहंसुः ॥ कस्य भगवं कर्मस्य विपाकेन पदुमावतीये क्रमेषु पद्मानि प्रादुर्भवन्ति यदा च राज्ञा ब्रह्मदत्तेन वध्या निसृष्टा ततो सा तानि पदुमानि अन्तरहितानि भूयो च राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लं आनीताये सन्तीये पुनरस्या क्रमेषु पद्मानि प्रादुर्भूतानि ॥ भगवानाह ॥ एतस्या एवं भिक्षवो पदुमावतीये कर्मणो विपाकं अभूषि येनास्या क्रमेषु पद्मानि प्रादुर्भूतानि अभूंसुः राज्ञा च ब्रह्मदत्तेन वध्याये निसृष्टाये अन्तरहितानि भूयो च राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लं आनीताये सन्तीये प्रादुर्भूतानि ॥

भूतपूर्वं भिक्षवो अतीतमध्वाने नगरे वाराणसीयं अपरस्य गृहपतिस्य प्रेषणकरी पद्मिनीतो उदकघटमादाय पद्मेन च हस्तगतेन वहिर्नगरातो अन्तोनगरं प्रवि-

1. M °e ca rājā bra° B °āuhitāye° M °nitā ‖ ya bhūyo pakra ° dmāni bhū°. — 3[a]. M °bhavo °nyo ° sa evaṃ tadā° B °ra evaṃ tadā° M °ṣhir abhūt. — 4[a]. M °ra anyā sā padmāva°. — 4[b]. B °rā tadā tadā pa° M °padmāva°. — 5. M °ro anyo so rā ° datta °bhūt ‖ B °bhū tada°.

6[a]. M °ddhodana tadā brahmadattarājābhūt ‖. — 6[b]. M °pi etena rājñā ṣu° B °pi rājā eta° BM °gāhetvā vadhyā°. — 7. B °tena rājña ṣu° M °tena rājā ṣu° B °rena ananuyuñjyitvā anaparādhinī va° M °ananūjī ° gāhetvā anaparādhinī va°. — 10. M iti padmāvatīavadāna padmāva ° kalpaṃ samāptaṃ ‖.

11[a]. M bhikṣhur bhagavantam evam āhatur ‖ B °hataṃḥ ‖. — 11[b]. M °gavan karma ° kena padmāva ° rbhavati ‖ bhaga° (l. 14) B °atā ‖ yadā ° te sya tāni padmāni antarahitāni bhūyo ca sa rājñā ° punar asya kra°. — 14[b]. M °padmāva ° rmaṇaḥ vi° B °rmaṇā vi° BM °abhi ‖ yenāsya kra ° nuh ‖ rājña (B °jñā ca) brahmadattena vadhyāye nisṛ- (M °dhyāsṛṣṭāya)āhitāye anta(M °nītā)nāṃ° B °yo ca rājña bra° M °yo ca rājā bra ° pītam ānītāye santīye prā°.

18. M °dye emakasya pra° B °ri padminīto u° M °padminī ° tasu ānīya padmena ca hastajātena vahiṃ nagarāto antonagaraṃ° B °stagate ca vahi°.

गति ॥ अपरो च प्रत्येकबुद्धो वाराणसीये नगरे पिण्डाय चरित्वा बहिर्नगरं निर्धावति प्रासादिकेन ईर्यापथेन अभिक्रान्तेन प्रतिक्रान्तेन प्रासादिको अभिप्रसन्ना च देवमनुष्या ॥ तस्या दारिकाये प्रत्येकबुद्धं दृष्ट्वा चित्तप्रसादमुत्पन्नं । प्रसन्नचित्ताय तं पद्मं तस्य प्रत्येकबुद्धस्य दिन्नं । प्रत्येकबुद्धेनापि अनुग्रहार्थं प्रतिगृहीतं ॥ सा दानि दारिका तं पद्मं तस्य प्रत्येकबुद्धस्य हस्ते अतीव शोभमानं पश्यति स्वकं च हस्तं शोभितं पश्यति ॥ ताये दानि भूयो तस्य प्रत्येकबुद्धस्य सकाशातो तं पद्मं याचितं भगवं देहि मे तं भूयो पद्मं ति ॥ प्रत्येकबुद्धेन तं पद्मं भूयो तस्या दारिकाये दिन्नं हन्त भद्रे ति ॥ ताये पद्मं भूयो प्रत्येकबुद्धस्य [3:5b] हस्तातो गृहीतं ॥ सा दानि स्वकं च हस्तं पद्मेन शोभमानं पश्यति प्रत्येकबुद्धस्य हस्तं शोभितं पश्यति । ताये विप्रतिसारं संजातं । न शोभनं मया कृतं यं मे प्रसन्नचित्ताये एतस्य ऋषिस्य इमं पद्मं दत्वा पुनः आच्छिन्नं ॥ ताये दानि तं पद्मं भूयो तस्य प्रत्येकबुद्धस्य दिन्नं ॥ प्रतिगृह्णाहि मे भगवन्भूयः इमं पद्मं अनुकंपामुपादाय ॥ सो दानि पद्मो तस्या दारिकाये तेन प्रत्येकबुद्धेन पुनर्गृहीतं ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्या सा तेन कालेन तेन समयेन वाराणसीये दारिका अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एषा सा भिक्षवो पद्मावती वाराणसीये दारिका अभूषि ॥ यं मे तं प्रसन्नचित्ताये प्रत्येकबुद्धस्य पद्मं दिन्नं तस्य कर्मस्य विपाकेन पद्मावतीये क्रमेषु पद्मानि प्रादुर्भवेन्सुः । यं से तस्य प्रत्येकबुद्धस्य हस्तातो तत्पद्मं भूयो आच्छिन्नं तस्य कर्मस्य विपाकेन राज्ञा ब्रह्मदत्तेन वध्याये आज्ञत्ताये तानि पद्मानि क्रमेषु अन्त-

1. BM °sito nagare° M °rdhāvati | pra° BM °dikena abhikrānte(M °krāṃte)na pratikrānte(M °krāṃte)na prāsādikābhiprasannā(M °sannā) ca de° M °manuṣyāḥ B °ṣyā ta°. — 3°. M °cittapra°. — 3°. M °tāye taṃ padmaṃ pra° B °taṃ papadmaṃ°. — 5. B sa dāni° M sā dārikā° BM °naṃ paśyati | svakaṃ ca hastaṃ śobha(B °śobhe)yakaṃ pa°.

6. M ye dāni bhūyo ta° te taṃ padmaṃ yāvitaṃ | bhagavan dehi me bhūyo padmaṃ ti. — 7. M °padmaṃ bhū° naṃ | hastaṃ bha° BM °ti ti°. — 8. M °padmaṃ bhū° B °ttyekasyā ha°. — 9. BM sa dāni ca svayaṃ° sya hastaṃ śobha(B °śobhe)yakaṃ pa°. — 10°. BM °taṃ na°. — 10°. M °bhana mayā kṛtaṃ yaṃ me pra° cittāḥ e° B °cittā e° M °padmaṃ da° nar ācchinnaṃ | B °nnaṃ tā°.

11. M °padmaṃ bhūyo tasyā dārikāye tasya pra° BM °nnaṃ pra°. — 12. BM °gṛhṇāhi maḥ(M °ma) bha° M °gavaṃ bhūyo imaṃ padmaṃ a°. — 13. M °padme ta° B °tasya dā°. — 14°. M °hu bhikṣa° BM °evamkaṃm e° B °d anyā sa tena kā° M °d anyāḥ sa tena kā° °sīye dā°. — 15°. M °tetaṃ d°.

16°. B sahāṃ sā° M sahā bhikṣavaḥ padmāvatī nāma sā°. — 16°. M yaṃ se taṃ prasannaṃ ci° dinnaṃ tasya karmasya vipākena padmāvatī° vikarensu | B °vensuh yaṃ°. — 18. B °sāto padmaṃ° M °t padmaṃ ācchi° rājā bra° ttena vadhyā° B °ttena vadhyāye ājñatāye | tāni pa° M °ptāye tāni padmāni kramesu aṃtarhi°.

हिंसामि । यं से तं पदुमं भूयो तस्य प्रत्येकबुद्धस्य दिन्नं तस्य कर्मस्य विपाकेन भूयो राज्ञा ब्रह्मदत्तेन वाराणसीतो ओपक्रमानीताये पुनः क्रमेषु पद्मानि प्रादुर्भूतानि ॥

समाप्तं पदुमावतीये पूर्वयोगं ॥

भिक्षू भगवन्तमाहन्सुः ॥ कस्य भगवन्कर्मस्य विपाकेन राहुलस्य कुमारस्य षड्वर्षाणि गर्भावासो अभूषि ॥ भगवानाह ॥ एतस्य येव भिक्षवो राहुलस्य कुमारस्य पौराणं कर्मविपाकं ॥

भूतपूर्वं भिक्षवो तीतमध्वानं वैदेहजनपदे मिथिलायां राजधान्यां ब्राह्मणो राजा अभूषि ॥ तस्य द्वे पुत्रा अभूवन्सुः चन्द्रो च नाम कुमारो सूर्यो च नाम कुमारो ज्येष्ठो सूर्यो कनीयसो चन्द्रो ॥ अथ खलु भिक्षवो सो वैदेहको ब्राह्मणराजा आयुःक्षयाय कर्मक्षयाय कालमकार्षीत् ॥ चन्द्रो सूर्यमाह ॥ त्वं ज्येष्ठो तुवं राज्यं प्रापुणेहि । अहं ऋषिप्रव्रज्यां प्रव्रजिष्यामि ॥ अथ सूर्यो कुमारो चन्द्रं कुमारमेतदुवाच ॥ किं राज्ञां कर्तव्यन्ति ॥ चन्द्रो कुमारो आह ॥ राज्ञा जनस्य आपत्ती दातव्या ॥ अ[3.(6*)]थ खलु सूर्यो चन्द्रमेतदवोचत् ॥ अहं कुमार राज्यं तव आमयेमि त्वं राजा भवाहि अहं च ऋषिप्रव्रज्यां प्रव्रजिष्यामि ॥ अथ खलु भिक्षवः सूर्यो कुमारो चन्द्रं कुमारं मिथिलायां राज्येनाभिषिंचित्वा ऋषिप्रव्रज्यां प्रव्रजेसि ॥ तेन दानि पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन चत्वारि ध्यानानि निष्पादितानि पंच चाभिज्ञा साक्षीकृता महर्द्धिको महानुभावो ऋषि संजातो ॥

1. M °taṁ padmaṁ bhūyo tasya pra° B °naṁ | tasya ka° BM °kena bhūyo rājā bra° M °yo nava kramešu pa°. — 4. M iti çrīmahāvastuavadāne padmāvatīye pūrvayogaṁ samāptaṁ ||. — 5¹. M bhikshavo bhagavantam ā° B °vanta ā°. — 5². B °bhagava karma° garbhavāso°.

6². BM etasya caiva° M °paurāṇaṁ ka°. — 8. B °pūrva bhi° M °kshavo atī°. — 9. M tasya dvau putrau abhūtāṁ caṁdro ca nāma kumāro sū °māraḥ jye° BM °shtho candro kanyaso sūrya(M °kanashṭha sūryya) ||. — 10. M °ro sau vai° hmaṇo rājā āyuḥkshayāc ca karmakshayāt ya kālaṁ akārshīt ||.

11¹. B sūryo candraṁ āha | M sūryo caṁdram āha ||. — 11². B °shṭho tava rā° M °shṭho na ca rā°. — 12¹. M aham ṛishi°. — 12². B °ūryo kumāro° M °ro caṁdraṁ kumāro etad avocat ||. — 13¹. M °rttavyān ti ||. — 13². M °māraha ||. — 13³. B °jana āpa° M °āpanti dā°. — 14¹. M atha sūryyo caṁdra°. — 14². B °papeḍ tvaṁ° M °papehi tvaṁ rājaha bhavāhi° B °hi | ahaṁ° M °shipravrajyāni ||. — 15. M °kshavo sūryo kumāro caṁdra kumāraṁ° B °ro candra kumāraṁ° M °tvā ṛipravrajyāṁ° B °jyāṁ pravrajyasi ||.

17. M tena dānīṁ pū° rikoyo° B °rikāyoga anu° harantā ca catvā° M °harantā catvā°.

ये पि मूर्धस्य कुमारस्याभ्यन्तरे परिवारा अभूषि ते पि मूर्धेन सार्धं ऋषिप्रव्रज्यां प्रव्रजिता सर्वे च चतुर्ध्यानलाभी पंचाभिज्ञा महर्द्धिका महानुभावा संवृत्ता । अथ मूर्धस्य ऋषिस्य एतदभूषि । अहं खलु चतुर्ध्यानलाभी पंचाभिज्ञो अयं च मे परिवारो सर्वो चतुर्ध्यानलाभी पंचाभिज्ञो यं नूनाहं उत्तरिविशेषं आरभेयं । तेन दानि समादानं कृतं न मया अदिन्नं उदकं दन्तकाष्ठं पि परिभोक्तव्यं ।

अथ खलु भिक्षवो मूर्धो ऋषिरपरकालेन स्मृतिसंमोषेन अपरस्य ऋषिस्य उदकभाजनातो अदिन्नं उदकं पिबे । तेन पीतेन अस्य स्मृतिरुत्पद्ये मम व्रतसमादानं न मया अदिन्नं उदकं दन्तकाष्ठं पि परिभोक्तव्यं इति । इमं च मया इमस्य ऋषिस्य उदकभाजनातो स्मृतिसंमोषेन उदकमदिन्नं पीतं । चौरो स्मि अहं तस्य कौकृत्यमुत्पन्नं चौर्यं मया कृतं ति यं मे परस्य उदकभाजनातो अदिन्नं उदकं पीतन्ति । सो दानि दुःखदौर्मनस्यजातो आसनातो उत्थाय पृथिव्यां निषण्णो । अथ खलु ते माणवका येन मूर्धो ऋषिस्तेनोपसंक्रमित्वा मूर्धं ऋषिमभिवादेन्सुः । अथ खलु भिक्षवो मूर्धो ऋषी तां माणवकानेतदवोचत् । मा यूयं माणवका मम अभिवादेथ । अथ खलु भिक्षवस्ते माणवका मूर्धमृषिमेतदवोचत् । भो उपाध्याय किस्य वयं उपाध्यायं नाभिवादेष्यामः । मूर्धो ऋषि आह । अहं खलु माणवका चौरो ति । माणवका आहन्सुः । किं वा कथं वा उपाध्याय । मूर्धो ऋषि आह । अमुकस्य माणवकस्य उदकभाजनातो अदिन्नमुदकं पीतं । ते दानि माणवका एतमाहन्सुः । मा भवन्तु उपा[3.6b]ध्याय एवं वदेहि । न भवां चौरो यमस्माकं उदकं उपाध्यायस्य स्वकं ते उदकं पीतं मा कौकृत्यं करोहीति । मूर्धो ऋषि आह । जानन्ति माणवका मम व्रतसमादानं न मया कदाचिददिन्नं उदकं दन्तकाष्ठं पि भुक्तं पूर्वं मया अदिन्नपूर्वं उदकं पि पीतं ।

1. BM °ski | te° B °re ca cātuhdhyānalābhī°. — 3ᵃ. M °ahisyaitā°. — 3ᵇ. M °ayaṃ ca parivāro sarve catu° B °ro sarve catu° M °bhijñā yaṃ nū° °dhaṃ ārabheyaṃ | . — 5. M tena dānīṃ sa° BM °udakā dantā° M °kāṣṭhā pi°.

6. M °kālena ca smṛtiṃ saṃmohā aparasya ṛṣisya uda° °dakā dantaka pi na tena yasya smṛti° B °pibe tena°. — 7. B °pītena yasya° M °smṛti utpa° °dāna na mayā° °kaṃ daṃtakā°. — 8. B °ṛṣisya udakaṃ bhā° M °ṛṣisya udakabhājanātto smṛtiṃ saṃmohe° BM °dinnaṃ | pītaṃ cau°. — 9. M °ste parasya udakabhājana° °kaṃ pītanti | .

11ᵃ. M so dānīṃ duḥ° °rpannaṃ jātaṃ ā° °ṣaṇṇaḥ. — 11ᵇ. M °ten ṛṣiṃ ṛṣiṃ° BM °tvāḥ | . — 12. M °ṛṣini tāṃ māṇavakān eta°. — 13. M °ka mamābhi°. — 14ᵃ. M °khalu te mā°. — 14ᵇ. M °nābhivāde°. — 15ᵇ. M °vaka cau°.

16ᵃ. M °vako āhansu | . — 16ᵇ. M °katha upā°. — 17ᵃ M °dakabhājanātu a°. — 18ᵃ. M tā dā° BM °evaṃ ā° M °hansu | . — 18ᵇ. BM mā bhavatu upā°. — 19ᵃ. M °ro yaṃ asmā° °dakaṃ upādhyāyasya ke te uda°. — 20ᵃ. M jānanti mā° °cid dinnaṃ udakaṃ dantakāṣṭhāṃ pi paribhuktaṃ pūrvaṃ mayā° B °nnaṃ udakaṃ° M °nnapūrvam udakaṃ pītaṃ pi°.

सो हं चौरो संवृत्तो दण्डकर्मं करोथ यथा चौरस्य क्रियति तस्य मे ॥ माणवका आहन्सु: ॥ भो उपाध्याय न वयं उत्सहाम उपाध्यायस्य दण्डकर्मं कर्तुं । एषो च ते चन्द्रो राजा भ्राता तस्य सकाशं गच्छाहि ॥ सो ते दण्डकर्मं दास्यति ॥

अथ खलु सूर्यो ऋषियेन मिथिला राजधानी तेन प्रक्रामि राज्ञो चन्द्रस्य सकाशं ॥ अश्रोषीद्राजा चन्द्रो भ्राता मे सूर्यो ऋषि मिथिलायां आगच्छतीति ॥ अथ चन्द्रो राजा चतुरंगेन बलकायेन सार्धं सूर्यस्य ऋषिस्य प्रत्युद्गमनाय निर्याति ॥ अथ खलु चन्द्रो राजा येन सूर्यो ऋषिस्तेनोपसंक्रमित्वा यानातो ओरुह्य सूर्यं ऋषिमभिवादयति ॥ अथ खलु सूर्यो ऋषि चन्द्रं राजानमेतदुवाच ॥ मा खलु पुनस्त्वं महाराज मम अभिवादेहि ॥ एवमुक्तो भिक्षव: चन्द्रो राजा सूर्यं ऋषिमेतदुवाच ॥ किस्याहं भगवं ज्येष्ठं भ्रातरं सूर्यं ऋषिं दृष्ट्वा नाभिवादयिष्यामि ॥ एवमुक्ते भिक्षव: सूर्यो ऋषिचन्द्रं राजानमेतदवोचत् ॥

अहं चौरो महाराज अदिन्नं उदकं पिबे ।
तस्य करोहि मे दण्डं यथा चौरस्य क्रियति ॥

अथ खलु भिक्षव: चन्द्रो राजा सूर्यमृषिमेतदुवाच ॥ अनुजानाम्यहं भगवं यं त्वया उदकं पीतं स्वविजितातो तमुदकं पीतं यं मम राज्यं तव पि तं राज्यं गच्छ येन इच्छसि मा भगवं कौकृत्यं करोहि ॥ अथ सूर्यो ऋषिचन्द्रं राजानं गाथाये अध्यभाषे ॥

नाहं शक्तो महाराज कौकृत्यं प्रतिविनोदितुं ।
साधु मे क्रियतु दण्डो यथा चौरस्य क्रियति ॥

1[1]. M mo ha cau° B °syūtaṃ tasya karmaṃ° M °tto tasya karma karotha | yathā° B °tha | yathā° M °rasya kriyati° BM °me mā°. — 1[2]. B °āhaṃsuḥ | . — 2[1]. B °utsahāma° M °sya daṇḍakarma kartuṃ | . — 3[1]. M eṣāṃ ca te caṃdro rā°. — 4. M atha sūryya ṛ° B °thilāyā rā° M °thilāyāṃ rā° B °prayāsi | rājño° M °jño caṃdra° B °yasā sa°. — 5. M °jā caṃdro bhrā° B °lāyāṃ āga°.

6. M atha caṃdro °sūrya ṛ° BM °dgamanaṃ niryāsi(B °ryāsati) | . — 7. M °la caṃdro rā °sūryya ṛṣhi tena ° tvā yānāto ārohya sūryya ṛṣhiṃ abhi°. — 8[1]. M atha sūryyo ṛṣhi caṃdraṃ rā °tad avocat | . — 9. M °vaḥ caṃdro rā° BM °sūrya ṛ° M °tad avocat | . — 10. M kasyā° B kiṃsyā° M °gavan jyeṣṭhaṃ° B °jyeṣṭhaṃ bhrā° M °sūryya ṛ°.

11. M °ṛṣhi candraṃ rājānaṃ ela°. — 12. M °dinna u°. — 13. B °thā viramya kriyanti | M °kriyati | . — 15[1]. M °vaḥ caṃdro rājā sūryaṃ ṛṣhim etad avocat | . — 15[2]. B anukajānā° M °haṃ bhagavan yaṃ tvayā udakaṃ pibe taṃ rājyaṃ gaccha ye° B °pītaṃ svavijitāto tam udakaṃ pītaṃ yaṃ mama°. M °gavaṃ kaukṛ°.

17. M °ṛṣhiś caṃdraṃ rā°. — 19. BM °pakta me° B °tyaṃ parimo°. — 20. B °dhu mā kri° M °dhu me kriyataṃ da°.

अथ खलु चन्द्रस्य वैदेहस्य राज्ञो पुत्रो च भागिनेयो च चन्द्रं वैदेहराजमेतदुवाच ॥ किंतु देव ऋषिस्य दकर्म्मं कौतूहलस्य प्रतिविनोदनार्थं मा ऋषि कौतूहलेन क्लिमन्तु ॥ अथ चन्द्रस्य राज्ञो एतदभूषि ॥ कीदृशमहं सूर्यस्य ऋषिस्य दककर्मं कुर्येयं येन ऋषि निःकौतूहलो भवेय ॥ अथ खलु चन्द्रो राजा अशोकवनिकां सिक्तसंमृष्टां कारापेत्वा मणीनि च [317'] आसनं प्रज्ञप्य खादनीयं च प्रवेशयित्वा राजार्हाणि मोदकानि वृक्षाग्रेषु बन्धापेत्वा सूर्यं ऋषिमेतदुवाच ॥ गच्छ भगवं अत्र अशोकवनिकायां आसाहि यं चात्र खादनीयं भुञ्जाहि धानं च ततो यथासुखं परिभोगं अनुजानामि ॥ अथ खलु चन्द्रो राजा सूर्यं ऋषिमशोकवनिकायां षड्रात्रं धारेति ॥ अथ चन्द्रस्य राज्ञो षड्रात्रात्ययेन एतदभूषि ॥ कथमहं सूर्यमृषिं निःकौतूहलं कृत्वा विसर्जेयं ति ॥ तस्यैतदभूषि ॥ यं नूनाहं सर्वबन्धनप्रमोक्षं कारापेयं ॥ कारापेसि खलु भिक्षवः चन्द्रो राजा सप्तमे दिवसे सर्वबन्धनप्रमोक्षं । सूर्यो च ऋषि अनाहारो जातो ॥ गच्छतु भगवां उद्घाटितपक्षो ति । राज्ञा चन्द्रेण सर्वबन्धनमोक्षं कारापितं ॥ सो दानि निष्कौतूहलो पुनः आश्रमपदं गतः ॥

भगवानाह ॥ स्यात्खलु भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन चन्द्रो राजा । एष तदा राहुलभद्रकुमारो अभूषि ॥ यः सूर्यो ऋषिरासीत् अहमेवाभूवं ॥ यत्सूर्यो ऋषि अशोकवनिकायां षड्रात्रं उपरुद्धः तस्य कर्मस्य विपाकेन राहुलो कुमारो षड्वर्षाणि गर्भावासक्लिष्टो अभूषि ॥

राहुलभद्रस्य पूर्वयोगं ॥

1. M °lu caṁdrasya vaideharājño ° ya ca caṁdraṁ vai ° tad avocat |. — 2. M kiṁ-pa ° udakarma kau°. — 3¹. M °tha caṁdrasya°. — 3². M °dṛçaṁ ahaṁ sūryyasya ṛ-ṣihidaudakarma ku ° nai nikau° B °kṛityaṁ kha°. — 4. M °lu caṁdro rājā a° B °ktasaṁ-ṛṣhṭāṁ kā° M °siktasaṁmṛṣṭāṁ kārāpe° B °taṁ ca 3[317']āna ° bandhāpetvā sūrya ṛ° M °sūryya ṛiṣhim etad avocat |.

7. M °param atra a ° naṁ ca tataḥ ya ° gaṁ anujā° — 8. M °lu caṁdro rājā sūryyam ṛiṣhi açoº B °traṁ dhāreti | M °traṁ dhārema | atraṁ dhāreti |. — 9. M atha caṁdra ṣhaṭrātrasyātyayena e°. — 10¹. M °sūryya ṛshi niḥ° B °shiṁ kau° M °sarjayeyaṁ ti B °ti ta°.

11¹. M yaṁ nūnāhaṁ° B °sarva ba° BM °payaṁ kā°. — 11². B kārāpesi | kha° M °vaḥ caṁdro rā°. — 12¹. M sūryo pi ṛi° B °kto gaccha°. — 12². M gaccha bhaṁte udghā° B °tha | kha ° udhṛuta° BM °ṣko ti |. — 13¹. B rājño ca° M °jñā caṁdreṇa sarva-bandhana° B °kārapitaṁ |. — 13². M °dāni nikautūhalo punar āçra°. — 14¹. M °kha-ro yuṣhmākam a° B °yena tadā camdro° M °yena caṁdro rā° BM °jā a°.

16¹. B aha rāhu° M aha ahaṁ asthāsit |. — 16². M ya sūryyo ṛiṣhi rāhulakumāro abhūshi tadā yo sū°. — 17. M yo sūryyo° B °ṛishiṁ açokavanikā° M °ṣhaḍrātraṁ uparuddho ta ° kasha° B° karma ka ° ṣi garbhavā°. — 19. M iti rāhulabhadrasya pūrvayogaṁ ° gaṁ sa-māptaṁ |.

राजा दानि शुद्धोदनः शाक्यां संनिपातयित्वा आह ॥ भवन्तो यदि न कुमारो सर्वार्थसिद्धो अगारातो अनगारियं प्रव्रजितो तं राजा चक्रवर्ती भवेय बहूनां राजानसहस्राणां ईश्वरो भवन्तो पि सर्वे अनुयाता भवेय सर्वे चक्रवर्तिराज्यमपहाय क्षत्रियकुलातो अगारातो अनगारं प्रव्रजितो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो सो च क्षत्रियो ब्राह्मणपरिवारो च तं नो अनुच्छवं भवेतु ॥ ते दानि शाक्या आहन्सुः ॥ आज्ञापेतु देवः किं क्रियतूति ॥ राजा शुद्धोदनो आह ॥ कुलातो कुलातो एकः क्षत्रियकुमारो प्रव्रजतु । यत्र एकः सो एकपुत्रको मा प्रव्रजतु । यत्र दुवे भ्रातरो ततो एको प्रव्रजतु । यत्रापि संबहुला भ्रातरो ततो पि एको प्रव्रजतु ॥ शलाकानि चारेथ यत्र येभूयेन शाक्यगणस्य उत्पद्यतु प्रव्रजतु शाक्यकुमारा ॥ कुलपुरुषकेण तत्र शलाकानि चारीयन्ति येभूयेन शाक्यगणस्य उत्पद्यति ॥ यदा राज्ञा शुद्धोदनेन आज्ञप्तं प्रव्रजन्तु शाक्यकुमारा कुलपुरुषकेण यो च एकपुत्रको सो मुच्यतु तत्र दानि तेन कुलपुरुषकेण पंच कुमारशता अभिनिष्क्रमन्ति प्रव्रज्याय ॥ राज्ञो शुद्धोदनस्य भगवां च पुत्रो सुंदरनन्दो च । भगवता प्रव्रजितेन सुन्दरनंदो [317b] मुचति ॥ शुद्धोदनस्य पुत्रा आनंदो च उपधानो च देवदत्तो च । तेषां देवदत्तो अभिनिष्क्रमति ॥ आनन्दो पि इच्छति प्रव्रजितुं माताये मृगीये शाक्यकन्याये नानुज्ञापीयति ॥ सो वैदेहं जनपदं गत्वान मौन-

1¹. M atha rājā çuddhodano çākyā saṃni°. — 1². M bhagavanto yadi * dāno agārāto anagāri * taṃ rājā cakravartir bhaveya bahū° BM °çvaro bhavantu (B °bhagavanto) pi sarve anuyātā bhavetha sa (M °so na) ca cakra° B °hāya kshatriyakulāto agārāto anagāri pravrajito (après ce passage, qui depuis "taṃ rājā" est ajouté à la marge, suit : dvāsaptati (?) séparé de ce qui précède, mais rapporté à la même ligne; je ne sais qu'en faire.) M °kulāto agārāto anagāriyaṃ pra° B °ttarā saṃbuya° M °samyaksaṃbodhim abhisaṃbuddham abhi * dāho sa ca kshatriyabrāhmaṇapa° B °dāho sa ca kshatri° BM °ebo ca tato anu°. — 5. M °bhavaḥ |.

6¹. M ānayantu deva kiṃ° B °ājñapetu de° M °kriyatati ||. — 6². B kulāto ekaḥ kshatri * vrajitu yatra ekaḥ so ekaputro mā pravrajitu |. — 7¹. Omis par M. B °vrajitu. — 7. M putraḥ ca bhrātā° BM °to eko pravraja(B °jitu yatra ekaḥ so(M °ko ça) eka° M °putrako mā pravrajayatu | B °vrajitu |. — 8. BM °hula bhrā° M °vrajitaṃ B °tu ça°. — 9. B °lākā pi cārāvetha° M °cārāvetha | kathaṃ bhūyo na * tpadyatu°. — 10. M purushaṃ ta° B °shakena ta° M °ārādayantāṃ | yebhū * kyagaṇa(?)sya° B °gaṇasya°.

11. M rājā çu° B °rājña çu° M °damna â * vrajantu çā° B °vrajatuṃ çā° BM °shakena yo ca e(M °ca sajka° M °ko sā utpadyatuḥ tatradāni kulapurushakena paṃ° B °so muhyatu | ta° M °bhinishkramanti pra° BM °jyāya rā°. — 13¹. M °bhavāṃ ca putro sundarānando ca B °ndo ca bha°. — 13². M °tena sundaranando pravrajati | B °do suarati |. — 14. BM °putro ā° M °datto. — 15¹. M abhi°. — 15². M ānando°.

16. BM °mṛgī çā°.

व्रतेन यापयति ॥ शुक्लोदनस्य पुत्रा नन्दको च नन्दिको च एते अभिनिष्क्रमन्ति । अपरे च दुवे पुत्रा गृहे स्थिता ॥ अमृतोदनस्य पुत्रा अनुरुद्धो च महानामो च भट्टिको च ॥ अनुरुद्धो च महानामेन पृच्छीयति । किं त्वं प्रव्रजिष्यसि गृहकार्यं वा चिन्तयिष्यसीति ॥ सो अनुरुद्धो पुण्यवन्तो न पृच्छति किं गृहमध्यावसन्तेन करणीयं किं वा प्रव्रजितेन करणीयं पुण्यवन्तो निष्पुरुषेण नाटकेन क्रीडन्तो यापेति पंचहि कामगुणेहि समर्पितो समंगीभूतो । तस्य अस्तमिते आदित्ये सहस्रं दीपवृक्षाणि निशि प्रदीप्यन्ति । मोहनस्य शिक्षासनार्थं एकूनं दीपवृक्षसहस्रं प्रदीपापितं । तस्य दानि ताव विशुद्धं मांसचक्षु यं तं एकूनं दीपवृक्षसहस्रं तस्य चित्ते नास्ति संपूर्णं दीपवृक्षसहस्रन्ति । तस्य दासपरिवारो सर्वो विस्मितो । अहो परिशुद्धं कुमारस्य चक्षु ति । यत्र नाम दीपवृक्षसहस्रातो एकेन दीपेन ऊनं अविशुद्धानि दीपानि संजानाति ॥

सो दानि तं ज्येष्ठभ्रातरं महानामं पृच्छति ॥ किं गृहमध्यावसन्तेन करणीयं किं वा प्रव्रजित्वा करणीयन्ति ॥ सो तं आह ॥ गृहमध्यावसन्तेन कल्यतो एवोत्थितेन राज्ञो सुखरात्री दातव्या शाक्यमहत्तरकानामपि सुखरात्री दातव्या ये पि कान्ता ते पि अवलोकितव्या कालगतानां पि मृतकरणीयेहि स्थातव्यं गृहजना वेष्टितव्या दासीदासकर्मकरपौरुषेया वेष्टितव्या भोजनाच्छादनेन सर्वेहि च उत्सवेहि समन्वाहरितव्या व्ययकर्मेण उत्सविकेन पारिच्छदिकेन च हस्त्यश्वरथपत्तिवेष्टकानि

1. BM çukloda ° putro nanda° M °no ca nandako° B °ahkramantā | M °ahkramaṃte. — 2ᵃ. B °sthita a°. — 2ᵇ. BM °putro a° M °nubuddho ° nāmā ca bhaṭṭikā ca B °ko ca a°. — 3ᵃ. M anubuddho mahā pṛcchati B °yati kiṃ°. — 3ᵇ. M °vā ciṃtayi° — 4. M °ddho puṇyavaṃto pṛ° BM °cchati kiṃ gṛhe adhyavasa° B °ntena kaplyaṃ kiṃ vā° M °ṇyavaṃto niṣpuruṣeṇa nā° B °ṇa nāṭake ° ti | paṃ° M °paṃcahi kā° BM °bhūto ta°.

6. M °ashṭama i° BM °te sa ādityasahasraṃ ti dīpavṛkṣāṇyāṃ ni° M °dīpyaṃti | B °dīpyaṃti mo°. — 7. M mohanasa śijñā° B mohanasa sijñā° M °ekunaṃ dīpa ° pāditaṃ | . — 8. M °dānāṃ tānad viçu ° mansakshushaṃ tam ataṃya ci° B °m ekanadīpavṛkshasahasraṃ tasya citta nā° M °pūrṇṇa dī ° hasraṃ ti B °nti ta°. — 9. M °ayo dāniṃ pari ° sarva vi° B °to a°. — 10. M °pena ūnamanaviçuddhaṃ dīpā°.

11ᵃ. M °dāni taṃ° B °jyeshṭabhrā°. — 11ᵇ. B kiṃ adhyā° M kiṃ gṛhe adhyāvasaṃtena ° kiṃ pra ° ṇīyeti | . — 12ᵃ. B sā naṃ° M sā naṃ āha | . — 12ᵇ. M °vasaṃtena kalpato evotthitena rājñā sukharātrī dātavyā pā ° ttarañkānām api su° B °yo pi kaṃtā te° M °pi avalokayitavyā kālagatānā api mṛ° ° gṛhajanā veshṭitavyā | dāsī ° shaya veshṭitavyā | bhoganāchhādanena sarve ca utsahehikena pā° B °nena sarve ca utsavehi samanvāharitavyā | vayaṃ karma ca utsavi° M °vyayakena ca hasty° BM °yaujāya° M °yakā niveshṭāpayitavyā | rathayugyayānāni veshṭāpayitavyāni niveshṭitavyāni pratyavekshitavyāni ca kā° B °bhāgāṇi ca pari ° pratyavekshitāni ca | .

वेठापयितव्यानि रथयुग्ययानानि वेठापयितव्यानि यानानि च भोगानि च परिपाचयितव्यानि कर्मान्तानि कालानुकालं प्रत्यवेक्षितव्यानि क्षेत्राणि वाहयितव्यानि नानाप्रकाराणि धान्यजातीनि रोपयितव्यानि निवेदितव्यानि प्रत्यवेक्षितव्यानि च । कालानुकालं च यथाप[3, 8a]क्वानि च धान्यजातानि लवापयितव्यानि खलधानेषु संहारापयितव्यानि चोपुनापयितव्यानि । यत्किंचिद्गृहकार्यं अभ्यन्तरबाहिरं सर्वं कर्तव्यं ॥ अनुरुद्धो आह ॥ प्रव्रजितेन पुनः किं कर्तव्यं ॥ महानामो आह ॥ प्रव्रजितेन पूर्वाह्णे भिक्षा चरितव्या पूर्णं वा प्रणीतं वा आहारेण आहारं कार्यं कृत्वा एवं चात्मानं दमेतव्यं शमेतव्यं परिनिर्वापयितव्यं ॥ अनुरुद्धो आह ॥ अलं मे गृहकार्येण यूयं करोथ अहं प्रव्रजिष्यामि ॥

ते दानि पंचमात्रा शाक्यकुमारशता महता राजानुभावेन महता राजऋद्धीये सकलकेहि विभवेहि अभिनिष्क्रमेन्सु । केचिद् हस्तिपृष्ठेहि सुवर्णच्छत्रेहि मयूरचामरेहि केचित्सुवर्णमिथिकाहि नानारत्नसंकटाहि केचित्सौवर्णेहि रथेहि चतुर्घण्टेहि नानारत्नजालसंछन्नेहि सर्वेचर्मिकेहि सर्वालंकारेहि उच्छ्रितछत्रध्वजपताकेहि । केचिदश्वपृष्ठेहि सर्वालंकारविभूषितेहि हेमजालसंछन्नेहि । देवदत्तो च हस्तिपृष्ठे सर्वालंकृतेन हेमजालसंछन्नेन सर्णसिंहासने निषण्णो निर्यासि । तस्य निर्यायन्तस्य तोरणार्थे कर्कटकस्मिं मकुटं लग्नं । तेन कर्कटकेन तं मकुटं देवदत्तस्य शीर्षातो उत्थितं महाजनकायेन अद्भुतमहाजनं चिह्नं नैमित्तिकेन च पौरपाठकेन च व्याकृतो येन कार्येण देवदत्तो कुमारो अभिनिष्क्रमति तं कार्यं न सायपिष्यतीति । उत्तमार्थं परिहापयिष्यतीति यमेतं उत्तमांगतो मकुटं तोरणाघातो कर्कटकेन उत्थितं ॥

4. M °tāṁ kālaṁ ° tāni ca laṁvāpayitavyāni khalahānesu° B °khalahānesu ahā° M °oduṇā° B °opunapāyitavyāni ya°. — 5. M °abhyantarabāhiraṁ sa°.

6b. M anuhaddho°. — 7. BM °bhikkhaṁ vā prapiṇḍaṁ vā āhāreṇa āhāraṁ kā° ekaṁ tāvat° B °naṁ tametavyaṁ pari° M °dametavyaṁ ça° — 9. M °kārya yū°. — 10. M tadāntaṁ pañcamātrāṇi yā° yatāni mahatā rā° jarddhiye ca sva° kehi abhiniṣkrāmetsu | B °mesuḥ ||.

11. B °pṛṣṭhehi suvarṇacchatrehi mayūrapravālehi kecit su° M °pṛṣṭhe kecit suvarṇacchatrehi suvarṇapravālehi suvarṇapiñcikāhi nānāratnasaṁchannāni | kecit suvarṇaratha° B °mithi kai sau° M °turghaṇṭikehi nānāratnajālaṁ saṁ° BM °anehi sa° M °jayantikehi sa° B °simsthilighaṭehi°. — 13b. B °pṛṣṭhehi sa° tehi | he° BM °anehi de°. — 14b. B °pṛṣṭhena sva° M °svarṇākṛt° ekaṇya nirddhānt B °ekaṇṇo nirddhānt tasya°.

16a. M °nirdhānanirddhāvitasya to° B °nirddhāvinta° kuṭe la° M °kuṭa la°. — 16b. M °tekena naṁ maku° pratiṣṭa kaṁ° B °pāṭhakena ca° M °pāṭhena vyākṛtā ya° bhiniṣkramati | taṁ kāryeṇa pa°. — 19. M uttamārtho pa° tāt | yaye taṁ° B °tāt | ya° M °kena kahāpaṇaṁ |.

अथ खलु ते पंच शाक्यकुमारशतानि महता राजानुभावेन महता राजर्द्धीये सर्वपुष्पेहि सर्वगंधेहि सर्वतूर्यताडावचरेहि कपिलवस्तुतो नगरातो निर्यात्वा येन न्यग्रोधारामं तेन प्रयासि ॥ अथ खलु ते पंच शाक्यकुमारशता यावदेव यानानां भूमिस्तावदेव यानेहि यात्वा यानेषु प्रत्योरुह्य येन भगवांस्तेनोपसंक्रमित्वा अनेकजनसहस्रपरिवारिता भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासु ॥

तेषां दानि शाक्यकुमाराणां उपालिर्नाम नापितदारको उपस्थायको कृतकुशलमूलो पूर्वजिनेहि सम्यक्संबुद्धेहि वासितवासनो छिन्नबन्धनो अ[3, 8b]नुत्पत्तिको आर्यधर्माणां परमसविको लाभी ध्यानानां अभिज्ञानां च । सो दानि मातरे भगवतो उपनामितो अयं भगवतो केशानि ओतारेष्यति । भगवतापि अधिवासितं ॥ सो दानि उपालि भगवतो केशानि ओतारेति ॥ सा दानि उपालिस्य माता भगवन्तं पृच्छति ॥ सुखं भगवं उपालि केशानि ओतारेति ॥ भगवानाह ॥ सुखं केशानि ओतारेति अपि च तथागतं अभ्याकाडेति ॥ सा दानि आह ॥ मा दारक भगवन्तं अभ्याकाडेहि ॥ सो दानि प्रथमं ध्यानं समापन्नो ॥ सा ताव ये पुनर्भगवन्तं पृच्छति ॥ सुखं भगवं उपालिदारको केशानि ओतारेति ॥ भगवानाह ॥ सुखं दारको केशानि अवतारयति अपि तु क्षुरं पिलिपिलिपायेति ॥ सा दानि आह ॥ मा दारक क्षुरं पिलिपिलिपायेहि ॥ सो दानि द्वितीयं ध्यानं समापन्नो ॥ सा पुनः उपालिस्य माता भगवन्तं पृच्छति ॥ सुखं भगवन् उपालिदारको केशान्यवतारयतीति ॥ भगवानाह ॥ सुखं उपालिदारको केशान्यवतारयति अपि तु आश्वासप्रश्वासेहि तथागतं उपहनति ॥ सा दानि आह ॥ मा दारक आश्वासप्रश्वासेहि भगवन्तं उपहन ॥ सो तान्यपि-

1. M °lu çâkumârapañcaça * nityehi sarvapu° B °tûryatâḍâvacarehi | kapi° M °ryatâḍâvacarehi kapi * stuto naga * grodhâmaṃ°. — 3. M °pañca ku * çatâ yâvad eva yânânâṃ bhûmiṃ tâvad e° B °a tâvaddeva yânahi yâtya yâneshu° BM °pratyâru° M °sahasrehi pa° B °parivârito bha° M °vato pâ° B °dau sira° BM °sâ vanditvâ° M °ekânte a° BM °sthâsuḥ |.

6. M °lir nâmâ pâlaḍâ * sthâyakaro° B °sitavâsanocchi° M °sitakâsanâ echinnabandhano na utpatika â° B °jânânâṃ ca so°. — 8. M sho dâ° B °keçâni ottaraiṣyati | M °abhivâsi upi°. — 9. M upâ ca tathâ sâ siddhaṃ | B °vato pi°. — 10ᵇ. M sâ dâ° B °pâli bhagavatâ keçâni otârehi | M °yâmi ko târeti. — 10ᵃ. B so dâ° M °gavantaṃ pṛ°.

11ᵇ. M °gavan upâ° B °gavâṃ u°. — 12. B °târehi a° M °bhyâkaḍâhati |. — 13ᵇ. M °gavantaṃ abhyâkaḍâhehi. — 13ᵇ. M sa dhâniṃ pra° B °pannaṃ sâ°. — 14ᵇ. M °gavantaṃ pṛ°. — 14ᵇ. M °gavan upâ°. — 15ᵇ. M mukhaṃ° B sukha dâ°. BM °yati a° M °tu ahuraṃ pilipâyeti |.

16ᵇ. M °pilipilipâyehi |. — 17. B punaḥ° M punar upâsya°. — 18ᵇ. M sukhaṃ upâridâ° BM °yati | âçvâsa pra * gata upahanet M °haraiti |. — 19ᵇ. M °gavantam upahaṃtha |. — 20ᵇ. M °turiya dhyâ * pannaḥ.

भित्वा तृतीयं ध्यानं चतुर्थं ध्यानं समापन्नो ॥ भगवान्भिक्षूणामाह ॥ गृह्णथ एतं भिक्षव उपालिहस्तातो क्षुरं मा भूमिं प्रपतिष्यति ॥ सो दानि क्षुरो उपालिस्य हस्तातो भिक्षुभिर्गृहीतो ॥

ते दानि शाक्यकुमाराः स्वकस्वकानि वस्त्राभरणानि उज्झित्वा उपालिस्य पुरतो निक्षिपेन्सुः । एतन्ते उपालि धनं भवतु । अस्माकं प्रव्रजितानां नैतेन कार्यं ति । भगवतो संनिके वयं प्रव्रजिष्यामः ॥

उपालिस्यापि एतदभूषि । इमे शाक्या कुमारा राज्यमवजहिय इमानि च वस्त्राभरणानि मम दत्वा अगारातो अनगारियं प्रव्रजन्ति विपुलरत्नानि: क्षुर-वृत्तीहि न प्रव्रजितव्यं भवेय । अहमपि प्रव्रजिष्यामि । न एतेषां वान्तं परिभुञ्जिष्यामि ॥ अथ खलूपालिः कल्पको येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वंदित्वा भगवन्तमेतदवोचत् ॥ प्रव्राजेतु मे भगवां उपसंपादेतु मे सुगतो ॥ अथ खलु भगवां उपालिकल्पकं [319ᵇ] एहिभिक्षुकाए आभाषे । एहि भिक्षु उपालि चर तथागते ब्रह्मचर्यं ॥ तस्य दानि भगवतो एहिभिक्षुकाये सहोक्तेन यत्किंचिद्गृहिलिंगं गृहिगुप्ति गृहिध्वजं गृहिकल्पं सर्वमन्तर्हितं त्रिचीवरं चास्य प्रादुर्भवे मुण्डं च पात्रं प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथो चास्य संस्थितो सय्यथापि नाम वर्षशतोपसंपन्नस्य भिक्षुस्य आयुष्मतो उपालिस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥ येनान्तरेण पंच शाक्यकुमारशता मातापितॄणां मित्रज्ञातिसालोहितानां च प्रतिसंमोदेन्ति तेनान्तरेण उपालि प्रथमतरं प्रव्रजितो ॥

1ᵇ. M °kṣūṇa āha ‖. — 1ᶜ. BM gṛhṇatha° M °kṣavar ŭpālihastātā kṣuraṁ ṁ bhū°. — 3. M °dāniṁ kṣuraṁ upā ° bhikṣubhir gṛhītaḥ. — 4. M tadā ° mārā svakasvakāni canākhān° BM °pāsi mudritvā ° petsuḥ |. — 5ᵃ. M imaṁ te upāli vasaṁ° B °li yasaṁ°. — 5ᵇ. M °bhā nai ° kāryya ti ‖.

6. M °to saṁnike°. — 7ᵃ. B °kumāra rājyam avagāhaya i° M °jyam avagāhāya vastrā° BM °datvā° M °vrajati kiṁ ° syaṁ vayam aha° B °bhaveyam aha°. — 9ᵃ. M santa° B °ahāṁ vāmana taṁ° M °ahāṁ vāmantaṁ pā ° ṣyāmaḥ ‖. — 10. M °khalu upā ° matrā pādau° M °gavantam e°.

11. BM pravraje° M °gavān upasaṁpādet sugataḥ | B °saṁpādetu me sugata |. — 12ᵃ. M °gavān upā ° lpako ehibhikṣukāye ā° B °kalpaṁka ehibhikṣukāe ā° BM °ehi s°. — 12ᵇ. M °caratha tathā°. — 13. M °dāni bhagavatā e° BM °ya sahaṁvadi yat kiṁcid gṛhaliṁgaṁ gṛhiguptiṁ(M °ptaṁ) gṛhidhva(M °bhāvaṁ)jaṁ gṛhi(M °hi)kalpaṁ sarva(M °sarva)m anta° B °dbhavensuḥ muṇḍakaṁ pātraṁ ca pra° M °rbhaveasu | muṇḍaṁ ca pātra pra° BM °bhāvaṁ saṁsthitā° M °yā īryyāpatho cā° B °sthitā | sayya° M °sthito | tadyathā ° smasya bhikṣukasya ā ° syā saṁpadā bhikṣubhāvaḥ ye° B °padā bhikṣubhāvaṁ°.

17. BM yenāntareṇa(M °ṇa paṁca śākya(B °kā)kumāreṣu satā(M °tāṁ) mātā° B °pāṁ maitrajñā° M °mudenti | tenāntare° B °ati | tenā ° pāli pra° M °jitaḥ ‖.

अथ खलु पंच शाक्यकुमारशता येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेतदुवाच ॥ प्रव्राजेतु मे भगवां उपसंपादेतु मे सुगतो ॥ अथ खलु भगवां तानि पंच कुमारशतानि स्थापयित्वा देवदत्तं एहिभिक्षुकाये आभाषे ॥ एथ भिक्षवः शाक्यकुमारा चरथ तथागते ब्रह्मचर्यं ॥ तेषां दानि भगवता एहिभिक्षुकाये आभाष्टानां यत्किंचि गृहिलिंगं गृहिगुप्ति गृहिध्वजं गृहिकल्पं तत्सर्वमन्तरहाये त्रिचीवराणि च सानं प्रादुर्भवेन्सुः मुंडकानि च पात्राणि प्रकृतिस्वभावसंस्थिता केशा ईर्यापथो च सानं संस्थिहे सय्यथापि नाम वर्षशतोपसंपन्नानां भिक्षूणां एव आयुष्मन्तानां शाक्यकुमारशतानां प्रव्रज्या उपसंपदा भिक्षुभावो ॥

ते दानि भगवता उक्तानि ॥ उपालि भिक्षु युष्माकं वृद्धतरको एतस्य पादां वन्दित्वा सर्वे पटिपाटिकाये तिष्ठत । यो च प्रथमतरं तथागतस्य उपालिस्य च पादां वन्दित्वा पटिपाटिकाये स्थास्यति सो वृद्धतरको भविष्यति ॥ ते दानि भगवतो उपालिस्य च पादां वन्दित्वा सर्वे भिक्षुभूता पटिपाटिकाये स्थिता ॥ अपि हि जितं महाजनकायो एवमाह ॥ जितमानक्रोधा शाक्या निहतमानदर्पा शाक्या ति ॥ राजापि शुद्धोदनेन सपरिवारेण शाक्येहि च उपालिस्य भिक्षुस्य पादा वन्दिता । आयुष्मांश्च उपालि एवमाह ॥ स्वागतं राज्ञो शुद्धोदनस्य अनुरागतं राज्ञो शुद्धोदनस्य ॥ अथ खलु राज्ञो शुद्धोदनस्य अमात्यपारि-[319b]षदा आयुष्मन्तं उपालिं तं राजानं शुद्धोदनं आत्मना आभाषन्तं दृष्ट्वा तं विभावयेन्सुः ॥ कथं नाम उपालिकल्पको हीनजात्यो राज्ञा शुद्धोदनेन आर्यति ॥

1. M °çatāni sthāpayitvā° (L. 3). — 2. B pravraje ° sugata | . — 3. M °tāni sthā°. — 4[b]. BM eha bhi° B °rṣaṃ te°. — 5[a]. M °bhāshṭānāṃ yat kiṃcid gṛhaliṅgaṃ gṛhaguptaṃ gṛhaṃdhvajaṃ gṛhakalpaṃ tant sarvaṃ antarhāye tri° B °kiṃci gṛhaliṅga gṛhaguptiṃ gṛhadhvajaṃ gṛhakalpa° M °rāṇi ca sā° BM °rbhavensuḥ(M °ṣu) | muṇḍakāni ca pā° BM °bhāva(M °vā) saṃsthito keçā iryāpathasampattiḥ(B °saṃpannā) sadā° M° sthihe | tadyathā° B °sthihe | sayya° M °yadvarṣaçatābhiḥ paṃcāçāṃ pā° saṃpada bhikshubhāvaḥ |

10[b]. M tadāni ° vucyati B °cyati u°. — 10[c]. M °bhikshuḥ yu° B °sya pāda va° M °dāṃ vanditvā sarve pratipāṭikā tishṭhamāṃ | B °pāṭikā pra°.

11. BM yo ca pra° M °lisya ca pādaṃ vanditvā paṭipāṭikā° B °sthāsyati | so°. — 12. M tadāni bhu° BM °lisya pādāṃ vandi(M °vaṃdi)tvā° M °çatā pratipāṭikāye° BM °sthitā api°. — 14[a]. M °jitaṃ mahājanakāyaḥmi āha | B °jita mahājā ja ° ka jā°. — 14[b]. BM jitā mānakro° M °rpā çākya ti B °ti rā°. — 15. B rājāpi çu° M °lisya ca bhikshusya pādāṃ vanditvā B °kṣusya pādāṃ vanditvā ā°.

16[b]. M °pālim eva°. — 16[c]. M svāgataṃ rājño çuddhodanasyāsu ° sya upāli | B °anurā° ga ° sya upālisya | . — 17. M °yushmantānaṃ upāli taṃ rā° B °upāli taṃ rā ° danaṃ ātmanā ābhāṣantaṃ kaluṣu tam bhavikāyataḥ ka° M °danaṃ ātmajā ā — abhāṣantaṃ bhikshavaḥ tam bhavikāyatam. — 19. BM °rājā çu°.

राजापि शुद्धोदनो तेषां पारिषद्यानामात्यानामाह ॥ मा भवन्तो आर्यस्य उपालिस्य हीनजात्येन समुदाचरथ । अन्यास्य पुरिमा जाति अन्या एतरहिं श्रमणस्य राजर्षिस्य न एष भूयो हीनजात्यो ति वक्तव्यः ॥

भिक्षू भगवन्तमाहंसुः ॥ पश्यथ भगवं अयमायुष्मतो उपालिस्य हीनजात्यस्य भगवन्तमागम्य सराजिकाय परिषाय पादा वन्दिता ॥ भगवानाह ॥ न भिक्षव एतरहिमेव एतस्य उपालिस्य हीनजात्यस्य ममागम्य सराजिकाय परिषाय पादा वन्दिता अन्यदापि एतस्य उपालिस्य हीनजात्यस्य ममागम्य सराजिकाय परिषाय पादा वन्दिता ॥ भिक्षू भगवन्तमाहंसुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवो अतीते ध्वनि नगरे वाराणस्यां काशिजनपदे द्वे दरिद्रा दारका कुल्माषपुटकानि भक्तं गृह्य काष्ठहारका गच्छन्ति प्रत्येकबुद्धो च वाराणसीं पिण्डाय प्रविशति प्रासादिकेन ईर्यापथेन अभिक्रान्तप्रतिक्रान्तेन आलोकितविलोकितेन संमिंजितप्रसारितसंघाटी पात्रचीवरधारणेन नागो पि विय कारितकारणो अन्तर्गतेहि इन्द्रियेहि अबहिर्गतेन मानसेन स्थितेन धर्मतामात्रेन भूतः संप्रजानो समाहितो एकाग्रचित्तो संवृतेन्द्रियो आविषिप्तवृत्ती ॥ ते तु तं दृष्ट्वा प्रसादमुपसंक्रमन्ति ॥ ते दानि प्रसन्नचित्ता अन्योन्यं एवमाहंसुः ॥ ये केचिद्दारका वक्कवृत्तिका श्रमणब्राह्मणविप्रहीना मनुष्यदुर्गता मनुष्यकृपणा मनुष्यवराका यथा वयं यान्ये च सर्वे एडूकेषु द्विपादकेषु पुण्यक्षेत्रेषु कुशलमूलानि न कृता ये केचित्पुन-

1¹. BM °ṣadyānām amātyānām ā(B °nām ā)ha | . — 1². M °bhavanto ā° jātena sa°. — 2. BM anyasyā pu° B °jāti anya eta° M °anyaitarahiṁ çramaṇa° B °çramaṇo sya rājarṣisya ṇa esa° M °rṣisya na esa bhūyo hīnajātīti va° B °hīnajātiyeti va°. — 4¹. M atha bhikṣur bhagavantam āhansu | B bhikṣu āha°. — 4². M paçyata bhagavan katha° bhagavantam ā° dā vaṁditā | bhi° (l. 8¹). — 5². B °va etarahiṁm evaṁ e° tasya upāli hīna° ādā bhi°.

8¹. M bhikṣur bhagavantaṁ āhaṁsuḥ | B °gavantam ā°. — 8². M °gavan bhaga°. — 9. M °kṣavaḥ B °va bhā°. — 10. B °dhvani nānagarāto vārāṇasyāṁ° M °dhvani nānanagarāto vārāṇasyāṁ° de daridrā dārakā ca kākulmāṣapuṭa° B °hya kāṣṭhakā° M °gacchanti pratye° yasyāṁ piṇḍā° kena īryā° BM °pathena atikrānta(M °krānta)pratikrānta(M °krāntaka)na° ālokita(M °kina)vilokitena saṁmiñjita(M °jinaṁ)pra° B °ghāṭī pātra° M °go viya° pa antargatehi indriya° B °samāhita | e° BM °dṛṣṭvā pa°. — 15. BM pasādaṁ tañ° B °kramantena ā° M °kramantena nadupajanna°.

16¹. M °cittāḥ | anyonyaṁ evaṁ evam āhuṁsu | B °nnā ya°. — 16². B °dārakā kṛivṛttiṁ° M °çramaṇavipraddhā manuṣyadurgata manuṣyakṛpaṇā manuṣyavarākā yathā° B °paṇā manuṣyavarākā yathā° BM °yaṁ yaṁ cānye ca(M °va) sa° M °sarvam edikeṣu dvipādayakeṣu puṇyakeṣu° B dānam mahākāruṇyo kuśa° vā anya vā ka° M °evarākā°.

राज्ञा महाधना महाभोगा क्षत्रियमहाशालका वा ब्राह्मणमहाशालका वा अन्ये वा केचित्सुखिता सर्वे ते एतादृशेषु द्विपादेषु पुण्यक्षेत्रेषु कुशलानि कृत्वा । यं नूनं वयं इमां कुल्माषां इमस्य ऋषिस्य पात्रेषु प्रतिष्ठापयेम ॥ तेहि दानि ते कुल्माषा तस्य प्रत्येकबुद्धस्य पात्रेषु प्रति[300ᵃ]ष्ठापिता ॥ प्रत्येकबुद्धो पि तेषां दारकाणां तां भिक्षां प्रतिगृह्य हंसराजा विय वैहायसेन प्रक्रान्तो ॥ ते दारका तं प्रत्येकबुद्धं वैहायसेन गच्छन्तं दृष्ट्वा प्रीतिसंजाता महाभागो अस्माकं ऋषिः पिण्डपातेन प्रतिमानितो ॥ ते दानि प्रीतिसौमनस्यजाताः प्रणिधानं उत्पादेन्ति ॥ एको आह ॥ अहं अनेन कुशलमूलेन राजा भवेयं क्षत्रियो मूर्धाभिषिक्तो ॥ द्वितीयो आह ॥ अनेन कुशलमूलेन ब्राह्मणमहाशालकुले उपपद्येयं आढ्यो महाधनो महाभोगो ॥

न हि चित्तप्रसन्नेन स्वल्पिका भवति दक्षिणा ।
तथागते वा संबुद्धे ये च बुद्धान श्रावका ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितं ॥

ते दानि दारका आयुक्षयाच्च कर्मक्षयाच्च कालगता समाना तत्रैव वाराणसीयं नगरे । एको पि राजकुले राज्ञो अग्रमहिषीये उपपन्नो द्वितीयो पि पुरोहितकुले पुरोहितस्य भार्याये कुक्षिस्मिं उपपन्नो ॥ कालेन समयेन राजभार्या पुरोहितभार्या च प्रसूता । उभये दारका जाता ॥ उभयेषां सप्ताहं रमणीयानि जातकर्माणि कृतानि सप्ताहस्यात्ययेन राजपुत्रस्यापि ब्रह्मदत्तो ति

2. M °vayaṃ imaṃ kulmāṣām imasya ṛ° sthāpayemaṃ | — 3. M tehi dāni ku° B °ṣṭhāpi pra°. — 4. M °kānāṃ tāṃ bhikṣāṃ bhikṣāṃ ° hāyasena pra° BM °to te°. — 5. BM utsṛṣṭa B °rṣṭvā kāṇaṃ pra° M °gacchantaṃ dṛṣṭvā prītā saṃjātā° B °prītisaṃprajātā° M °asmākaṃ ṛ° mānito | .
7. M te dānāṃ prī° dhānam utpādanti B °tpādenti | . — 8ᵃ. BM ekām āhaṃ°. — 8ᵇ. M °anye ku° BM °triya mū°. — 9ᵃ. M °upapadyemān | 9ᵇ BM °ge ma°.
11. M °hi cittena° bhavati dakṣiṇāḥ | . — 12. M °ye saṃbuddhāna śrāvakā ca B °kā sa°. — 13. M °kṣayāntāḥ nicayāḥ patanāntāḥ samucchrayo B °cchrayāḥ saṃ°. —
14. M saṃyogāviprayogāntā maraṇāntaṃ hi°. — 15. M te dānāṃ dārakā āyukṣayena puṇyakṣayena kālagato samāgatāḥ | tatrai° B °yukṣayena kālagato samāgato | tatrai° BM °re e°.
16. B °jakule rājño° BM °ṣīye upapanno | (M °nnaḥ) dvi° M °upapannā | . — 17. M °yasya bhāryāye kukṣismiṃ upapanno ni° BM °jātā u°. — 18ᵇ. B ubhaye dā° ta u°. — 18ᵇ. BM °yāṇi jā° M °kṛtāni pu° nāmaṃ kṛtaṃ puro° nāmaṃ kṛtaṃ | B °ke ti nāma kṛtaṃ sam°.

नाम कृतं पुरोहितपुत्रस्यापि उपको ति नाम कृतं ॥ अनुरूपा धात्री उपस्थापिता राजपुत्रो च पुरोहितपुत्रो च यथा उत्पलं वा पद्मं वा कुमुदं वा पुण्डरीकं वा तथा संवर्धन्ति ॥ यथोक्तं भगवता ॥

कुलपुत्रा हि वर्धन्ति न्यग्रोधा विय सुभूमियं जाता ।
अनुपन्थके विय द्रुमा अल्पपुण्या विहीना त्ति ॥

ते दानि यत्र काले विवृद्धा विज्ञमात्रा संजाता ततो लिपीयं पि शेखियन्ति लेखाहिरण्यगणनां धारणमुद्रां ॥ राजपुत्रो पि ब्रह्मदत्तो हस्तिस्मिं अश्वस्मिं धनुस्मिं त्सरुस्मिं धावितस्मिं लंघिते वल्गिते इष्वस्त्रज्ञानेषु सर्वत्र गतिंगतो संजातो ॥ पितरि च कालगतेन ब्रह्मदत्तो कुमारो अमात्येहि वाराणस्यां राज्येनाभिषिक्तो ॥ उपको च माणवको अन्यतराये माणविकाये सार्धं प्रतिबद्धचित्तो अभूषि ॥ सो दानि ताये माणविकाये कस्मिंचिदेव स्थाने कंचित्कालं अवसादितो अभूषि न तं चोदेति । वाराणसीयं च कौमुदी चातुर्मा[300b]सी उपस्थापिता सापि माणविका उपकस्य माणवकस्य भावानुरक्ता प्रत्यागता ॥ माणव कौमुदी चातुर्मासी उपस्थिता गन्धमाल्यं मे उपस्थापेहि यथा कौमुदी चातुर्मासी रमणीयं करेयाम ॥ सो दानि माणवको तस्या माणविकाये श्रुत्वा तुष्टो आत्तमनो अभूषि । दिष्ट्या मे माणविका प्रत्यागता ति ॥ तस्य दानि उपकस्य माणवकस्य गंगाकूले माष अपरस्य पुरुषस्य सकाशातो याचनकं लब्धं । सो च तं माषो तत्रैव गंगाकूले गोपितको अभूषि ॥ सो दानि तस्य माषस्य अर्थाये विधुरे

1. M °laṁ vā padmaṁ vā puṇḍa° riddhayaṁti |. — 3. BM °la kri°. — 4. M °puṇya hi ° dhā vipa subhūmiyaṁ jā°. — 5. B °nthaka vi° M °nthakā vipa dru ° hinaṁ ti | B °hinanti |.

6. M tadāni yatra kālaṁ vivṛ° B °kālaṁ vivṛ° BM °piyaṁ yaṁ śekhiyanti(M °yaṁti) vikshipaṇā(M °ṇṇa° M °gaṇā dhā°. — 7. M °tto hastismiṁ aśvasmiṁ dhanusmiṁ sarūsmiṁ dhāvitasmiṁ laṁghite jinata i° B °dhanusmiṁ sarusmiṁ dhāvitasmiṁ iṁghi° M °stu ca sarva°. — 10[a]. M °vako 'nya naya ° pratisaṁbaddhamito a° B °pratibaddhaci°. — 10[b]. M °tāye māṇavakāye kasmiṁścideva sthāno° B °d evaṁ sthāne ° ahi | naraṇ ālasāti vā° M °ahi na tam ālesati |.

12. M °dyaṁ kau ° rmāsya upasthāpitāḥ sa pi° B °upasthāpitā sa pi° BM °anurakto ā° BM °sthapeti | ya°. — 13. M sā tam āha | māṇava kaumudī cāturmāsī upasthitā gaṁdham — 15. M °dāniṁ māṇavaka ta° BM °ahi dṛi°.

16[a]. BM dṛishṭvā ma° M °gateti |. — 16[b]. M °dāni u ° sakāsāto vāca° B °gāto vāca°. — 17. M °traivaṁ gaṁgākūla go°. — 18. M °sthāya vidyate madhyā ° dhuraiye kaṇḍanāriye gi° B °dhuraiye karaṇe nāriye gi° M °gopaṁto gaṁgākulaṁ kulaṁ ta° B °kūlaṁ ta° M °māsāmāya a°.

मध्याह्ने वर्तमाने ईर्येण मधुराणि किन्नरीव गीतानि गायन्तो गंगाकूले [तस्य माणवस्य चर्यायै] गच्छति ॥

अट्टालकाभिषण्णः राजा ब्रह्मदत्तो उपरिप्रासादवरगतः उपकं माणवकं मध्याह्ने निर्घोषेन मधुरेण स्वरेण गायन्तं अन्तोनगरातो बहिर्नगरं गच्छन्तं दृष्ट्वा च पुनरस्य उपके माणवके प्रेमं निपतितं ॥ यथोक्तं भगवता ॥

पूर्वे वाससंनिवासेन प्रत्युत्पन्ने हितेन वा ।
एवन्तं जायते प्रेमं उत्पलं वा यथोदके ॥
यत्र मनो निविशति चित्तं वापि प्रसीदति ।
निःशंकं पण्डिता गच्छेयुः संवुत्था मे पुरा भवे ॥

एवं तस्य राज्ञो ब्रह्मदत्तस्य तत्र उपके माणवके सह दर्शनेन प्रेमं निपतितं ॥ तेन राज्ञा ब्रह्मदत्तेन उपकस्य माणवकस्य दूतो प्रेषितो ॥ गच्छथ यो एषो माणवको गायन्तो अन्तर्नगरातो बहिर्नगरं गच्छति एतं आनेथ ॥ सो तेहि गत्वा उक्तो ॥ आगच्छ माणवक राजा ते शब्दापेतीति ॥ सो दानि तेहि राजपुरुषेहि राज्ञो सकाशमुपनीतो ॥ देव अयं सो माणवको आनीतो ॥ अथ खलु राजा ब्रह्मदत्तो उपकं माणवकं गाथाये अध्यभाषे ॥

मध्यान्तिके वीतिवते कुक्कुलवत्तती मही ।
अथ गायसि वक्त्राणि न तापयति आतपो ॥
उपरि तपति आदित्यो हेष्टा तपति वालिका ।
उदग्रचित्तो सुमनो अथ वक्त्राणि गायसि ॥

3. BM °devarapalo(M °to) upakaṃ māṇa(B °najvakaṃ madhyā° B °hne vidyana madhu° M °hne vidyana madhurena gāyakaṃ antonagarāto vahairna ° gacchantaṃ dṛ° upaka māṇaka pre°. — 5. BM °ta pr°.

6. BM °rve nivāsa(B °sa; nivāsa°. — 7. M evam taṃ jā ° premaṃ u° B °ke ta° M °ke ya°. — 8. B tatra manu ni° M °niviśati ci°. — 9. M niśilhā piṇḍita gaccheyuḥ vuste me itaḥ puro bhavet evaṃ° B °ṇḍita gacchet saṃvutte me ito pure bhaved evaṃ°. — 10. B °tasya bra ° darśanena°.

11ᵃ. BM °rājño bra ° ahita pa°. — 11ᵇ. M gacchathaḥ | yo° B °gacchatha | yo° M °ko gāyanto antonagarā° B °antanagarā° BM °cchati | e ° tha sa°. — 12. M °ucyati | B °ti ā°. — 13ᵃ. M °mavika° BM °labdvatiti | . — 13ᵇ. M °tehi rājñā sakāsam u° B °te de°. — 14ᵃ. B °yaṃ sā mā° M °nītāḥ | . — 14ᵇ. B °māṇakaṃ gāthāye bhāṣe | .

16. M madhyaṃtike vithīnate kukkulavantā mukhe | B °kkulāvantato mukhe | . — 17. M °gāvani vaktrāṇi na te tāpi ā° B °trāṇi na te tāpi ātapo u°. — 18. M tāpayaṃti yāta tāpayaṃti tāni aṃtakā ātapo uparipatraṃ ādityo hyāṣṭā na pati vāluka te° B °ri tapati | āti ° kā u°. — 19. B °no | a°.

अथ खलु भिक्षवः उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषे ॥

न आतपो तापयति अन्यका तापयन्ति मां ।
अन्यकाय विघाताय ते तापेन्ति न आतपो ॥
इत्वरं खु अयं तापो यो खु कायं प्रतापये ।
का[321a]र्यो नाम विघाता च ते तापेन्ति न आतपो ॥

राजा दानि ब्रह्मदत्तो उपकं माणवकं गाथाये प्रत्यभाषति ॥

किन्ते अर्थेति संयोगं अर्थं केन प्रतप्यति ।
तापेन पीडितो कायो तं त्वं आख्याहि पुच्छितो ॥

अथ खलु भिक्षवो उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषति ॥

वृषली देव कान्ता मे कुम्भदासी वरिंदम ।
तस्या उपस्थितो सर्वो तथास्मि उपतापितो ॥

अथ भिक्षवो राजा ब्रह्मदत्तो उपकं माणवकं आमन्त्रयति ॥ कहिं माणवक गमिष्यसीति ॥ अथ खलु भिक्षवः उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषति ॥

माषो मे याचमानस्यो गंगातीरस्मि रोपितो ।
पुरस्तिमे नगरस्य तदर्थाय व्रजाम्यहं ॥

अथ खलु भिक्षवो राजा ब्रह्मदत्तो उपकं माणवकं आमन्त्रयति ॥ आगमेहि

2. B °mānā a°. — 3. M °pati na ā°. — 4. B °pu khu tāyaṁ° M °pu yadu tāpaṁ pra° B °paye kā°. — 5. BM kārya nāma° B °vādena te° M °vādavaṁ te tāpeti na ā°.

6. M °dāniṁ bra° ālaṁ | vyāha°. — 7. B °jānanti saṁkalpaddhaṁ kāyaṁ prata°. — 8. B kena tapena pīḍito ayaṁ kāye taṁ te ā°. — 9. B °jāna bhrahmadatto gā°. — 10. BM °devī(M °deva)kā me ° dāsī avidi(M °biṁ)daṁ ta°.

11. BM °sthito parvatapaṁmiṁ ta(M °asā va)pa°. — 12a. M °āmantrayaṁ°. — 13. BM °bhāshati | . — 15. M mānasko me vāsa° B °ma vāsa° M °lahdhaṁ gaṁgātīrasmi go° B °tīrasmiṁ°.

16. BM °apa arthā° B °ya purasra° M °ya purarajāsyahaṁ | . — 17¹. M °āmantrayati | . — 17². M °hi tāhi tāva° B °ka mānā°.

तावत् माणवक मुहूर्तं शीतलके गमिष्यसि । अथ खलु उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषे ।

येहि अर्थो अयमस्य ऊर्ध्वं तिष्ठन्ति तिष्ठतो ।
याने तु अस्यमानस्य पुरतो धावन्ति धावतो ।
गंसाम्यहं महाराज तस्य माषस्य कारणा ॥

(अथ खलु राजा ब्रह्मदत्तो उपकं माणवकं गाथाये प्रत्यभाषे ।)

सर्वे ते अर्थो माषेण अहं माषं ददामि ते ।
करोहि कृत्यं माषेण उपको माणव मा व्रज ॥

उपको माणवको आह । यदि देवो माषं दास्यति एतं द्वितीयं माषं एतेहि माषेहि तुष्टा सर्वे पि वृषली कौमुदीयं च अविघ्नं भविष्यति । अथ खलु उपको माणवको राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ।

यं च माषं देवो दद्यात्तं द्वितीयं भविष्यति ।
एतेहि द्वीहि माषेहि तुष्टा मा वृषली भवे ॥

राजा आह । अहन्ते माणव दुवे माषाणि दास्यामि मा च उष्णेन पच्चन्तो गच्छाहि । राजा ब्रह्मदत्तो उपकं माणवकं गाथाये अध्यभाषे ।

सर्वे ते अर्थो माषेहि दुवे माषा ददामि ते ।
करोहि कृत्यं माषेहि उपको माणव मा व्रज ॥

1. M °kuṇḍalakaṁ ga°. — 3. BM °arthā aryāna(M °yāṇa) B °ūrddhanti tiṣṭhata aṃyā° M °ūrdhvaṁti tiṣṭhato mamā |. — 4. BM aṃyā te ayya(M °te appa)māṇasya puratu dhāvati dhāvato(M °tah |). — 5. M gaṁgāmya° B gaṁ[illegible]° M °tasya māṣa-sya kāraṇā || sa° B °yā sa°.

7. M °ete te artha māṣeṇa ° māṣakaṁ da° B °te ka°. — 8. M °[illegible] māṣeṇa°. — 9°. BM yaṁ [illegible] māṣaṁ(M °māṣaka) dāsyati yaṁ ca taṁ dvi° M °[illegible] māṣakaṁ [illegible] māṣake tu° B °[illegible] māṣake tu ° [illegible]°. — 10. M upako māṇavako atha khalu rā ° gāthaye a°.

12. M [illegible] māṣake devasya taṁ dvi° B °devasya taṁ dvi°. — 13. M °māṣakehi tu°. — 14°. M ahaṁ te māṇava [illegible] māṣakāṇi°. — 15. M °[illegible] ma° B °[illegible]°.

16. BM sarve te° B °[illegible] māṣakehi dve māṣā° M °[illegible] māṣakehi dve ca māṣakā da° B °te ka°. — 17. M °[illegible] māṣakehi u° B °[illegible]°.

उपको आह ॥ एते च द्वे माषा तं च तृतीयं भविष्यति आमन्त्रणं च भविष्यति । एवं वृषलीये रमणीयं कौमुदियं भविष्यति ॥

भवतम दुवे माषा तं तृतीयं भविष्यति ।
एतेहि त्रीहि माषेहि तुष्टा सा वृषली भवे ॥

राजा ब्रह्मदत्तो उपकं माणवकं एवमाह ॥ माणवक उष्णे मा गच्छाहि [3 a 1 b] अहं ते त्रयो माषां दास्यामीति ।

भवे ते त्रयो माषेहि भूयो माषां ददामि ते ।
करोहि कृत्यं माषेहि उष्णे माणव मा व्रज ॥

माणवको आह ॥ देव एतानि च त्रयो माषा तं चतुर्थं भविष्यति आमन्त्रणं च भूयो भविष्यति । एवं वृषलिकाये सार्धं रमणी कौमुदीयं भविष्यति ॥

भवतम त्रयो माषा तं चतुर्थं भविष्यति ।
चतुर्हि देव माषेहि उदग्रा वृषली भवे ॥

एतेन क्रमेण राजा ब्रह्मदत्तो शतसहस्रं उपकस्य माणवकस्य देति तं च माषं न मुंचति । यावदपराज्येन ततो माषातो न निवर्तितो ॥ तेन दानि राजा ब्रह्मदत्तेन अर्धराज्यं तस्य उपकस्य माणवकस्य दिन्नं । अन्तःपुरातो अर्धं दिन्नं । कोशकोष्ठागाराणां पि हिरण्यसुवर्णधनधान्यसारराणां पि अर्धं दिन्नं ॥

ते दानि उभये राज्यं कारयन्ति । उभौ अर्थानि समनुशासन्ति ॥ सो दानि माणवको पंचहि कामगुणेहि समर्पितो क्रीडति रमति परिचारयति ॥ सो दानि

1^b. M °māṣā taṁ ° yaṁ bhaviṣyati | āmantraṇaṁ°. — 2. BM °ll rama° M °mudikaṁ°. — 3. BM bhavatāṁ dve māṣāṁ taṁ (M °māṣāt taṁ) tṛ°. — 4. M °māṣehi tu°. — 5^a. M °vakam e°. — 5^b. M °yo māṣā dāsyāmīti.
7. M saṁcaitir ar-māṣehi ° māṣāṁ da° B °te ka°. — 8. M °tyaṁ māṣehi° BM °uṣṇaṁ māṇa°. — 9^b. BM deva e(M °te)tena ca tra° M °māṣā taṁ ° āmantraṇa ta ° dhyaty evaṁ°. — 10. BM °ṣalikāye° B °ramaṇīṁ kau° BM °mudī na bha°.
11. M bhagavantaṁ tra° BM °māṣā taṁ° M °turtha bha° BM °ti ca°. — 12. M °turhi deva māṣehi ° bhavet |. — 13. BM °tta rājā ṣa° M °upakasya māṇa ° ca māṣa na muñcati | B °ca māṣa naṁ muñcati |. — 14^a. BM yāvad apa(B °apa)rājyena ta° M °māṣāto na° BM °rtito te°. — 14^b. M °dāniṁ rājñā ° dattena a° B °rddharājyam asya u° M °jyaṁm asya u°. — 15. BM °rāṇāṁ pi dinnaṁ a(M °anaṁ a)rddha° M °lāgrāṇa api ardha dinnaṁ |.
17^a. M taddāniṁ ubhayaṁ rā ° yaṁti u°. — 17^b. M °ṣāsayaṁti |. — 17^c. M °ko yaṁhea ° marpitya kri° BM °krīḍito rama° M °cārati |. — 18. BM sa dāni° M °ko anyatheva ātra u° B °ko citavanto° M °di karhi cid api ° tato u° BM °datrā°.

राजा ब्रह्मदत्तो अत्यर्थं प्रतीय उपकस्य माणवकस्य अन्तिके चित्तको यदि कहिंचि पि गच्छति ततः उपकस्य माणवकस्य उत्सङ्गे शीर्षं दत्वा शयति ॥ तस्य दानि उपकस्य राज्ञा शयितेन एतदभूषि ॥ कथं एकराज्येन दुवे राजानो यं नूनाहं इमं राजानं ब्रह्मदत्तं घातेत्वा अहमेव एको राजा भवेयन्ति ॥ तस्य दानि भूयो एतदभूषि । न एतन्मम साधु भवेय न प्रतिरूपं यमहं राज्ञो ब्रह्मदत्तस्य कृतज्ञस्य अकृतज्ञो भवेयं ॥ द्वितीयं तृतीयकं पि एतदभूषि । न एतं साधु भवेय न प्रतिरूपं यं एके राज्ये दुवे राजानो यं नूनाहं राजानं ब्रह्मदत्तं जीवितातो व्यपरोपयित्वा अहमेव एको काशिराजा भवेयं ति ॥ तस्य दानि द्वितीयकं तृतीयकं पि एतदभूषि । न एतं मम साधु भवेय न प्रतिरूपं यं अहं राज्ञो ब्रह्मदत्तस्य कृतज्ञस्य अकृतज्ञो भवेयन्ति ॥ सो दानि अविधाविधन्ति प्रव्याहितो तेन राजा ब्रह्मदत्तो प्रतिबुद्धो ॥ सो तं आह ॥ उपक अविधाविधन्ति वदसि ॥ सो दानि आह ॥ एवंरूपो मे देव चित्तो अभूषि । यं नूनाहं ब्रह्मदत्तं जीवितातो व्यपरोपयित्वा अहमेव एको काशिराजा भवेयं [322*] ति ॥ तस्य सो ब्रह्मदत्तो राजा न पत्तीयति ॥ सो दानि उपको आह ॥ एवमेतं देव यथा मे वक्षामीति ॥ अथ खलु राजा ब्रह्मदत्तो उपकं माणवकं गाथाये अध्यभाषे ॥

दिन्नो मे अर्धराज्यं ते शोकशोकेन माणव ।
एवं भुंजसि न मायं कथं अन्तो भविष्यति ॥

अथ खलु उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषे ॥

न हि अन्तो अनन्ताये तृष्णाये इह विद्यति ।
प्रव्रजिष्याम्यहं राजन् न राज्येन रतो स्मि च ॥

1. M °yitenaitad a°. — 3. M °mānaṃ imaṃ rāja bra° B °rājaṃ bra° M °ghātetvā aham evam eka bha°. — 4. M tasya idānīṃ bhū° B °shi na e°. — 5. M naitaṃ mama° BM °bhaveyaṃ na° M °tasya krita [sya° B °veyaṃ dvi°.

6². B °tṛitīyaṃkaṃ° M °tṛitīyaṃka pi°. — 6³. M na rājye du° B °taṃ mama sā bhaveyaṃ na° yaṃ ahaṃ eka° M °rājño anurūpa yaṃ° B °jāna anurūpa yaṃ° M °rājānaṃ bra° B °rājā bra° M °vyaparo° rājo bhaveya]. — 8. M tasyedā° B °tīyaka tṛi° ahi na°. — 9. M naitaṃ sādhu mama bha° B °sā bha° BM °veyaṃ na° M °yaṃ yam a° BM °datta kṛi° M °veyaṃ ti]. — 10. M sa dāni abhidhāvidhaṃ ti ° rājñā bra°.

11¹. M so tam ā°. — 11². M °abhidhāvidhaṃ ti vadasi] B °ti vadasi [. — 12¹. M °po ya devadatto abhū° B °devaṃ ci°. — 12². M °m evam eka bh°. — 13. M °datto pattīyati B °tīyāyati]. — 14¹. M etam e°. — 15. M upa° abhyabhāshate].

16. M dinnā me° B °rājye śoka° M °jyaṃ tokaśoke° B °va kena mamā°. — 17. M °kona muṃcasi na mārdhaṃ kathaṃ aṃto bha° BM °shyati]. — 18. BM °rājānaṃ bra° M °dattaṃ gā°. — 19. BM adaṃ anta(M °anto) ana° dyati pra°. — 20. B °shyāmi ahaṃ° jyena rataṃ ca | M °jyena tarpaṃāmi ca].

बहुहि कामेहि अर्थं मे येहि बालो न तृप्यति ।
अर्थं मे सर्वकामेहि प्रव्रजिष्यामि अनागारियं ॥
काम जानामि ते मूलं संकल्पात्काम जायसे ।
न कामं कल्पयिष्यामि ततो मे न भविष्यसि ॥
अल्पेषु बालो कामेषु बहुष्वपि न तृप्यति ।
अपहाय सर्वकामानि प्रतिबुद्धो व पश्यति ॥
इच्छामि दानिं प्रव्रजितुं च ते
इच्छा प्रहातव्या च न भोन्ति एवं ।
एतं च इच्छाय फलं विदित्वा
न प्रार्थये पुत्रपशुं धनं च ॥

अथ खलु उपको माणवको ब्रह्मदत्तं राजानमेतदुवाच ॥ अनुजानाहि मे देव प्रव्रजिष्यामि ॥ राजा आह ॥ मा प्रव्रजाहीति सहिता राज्यं कारयिष्यामः ॥ उपको आह ॥ न महाराज राज्येन अर्थो अनुजानाहि मे प्रव्रजिष्यामि ॥ सो दानि राज्ञा ब्रह्मदत्तेन अनुज्ञातो यदि एवं अभिप्रायो प्रव्रजाहीति ॥

तहिं दानि काशिषु उत्तरेण कुम्भकारस्य प्रव्रजितस्य ऋषिस्य पंचाभिज्ञस्य आश्रमपदं ॥ सो दानि उपको माणवको तमाश्रमपदं गत्वा तस्य कुम्भकारस्य प्रव्रजितस्य ऋषिस्य सकाशातो प्रव्रजितो ॥ तेन दानि पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन युज्यन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानानि उत्पादितानि महर्धिको महानुभावो ऋषी संजातो चन्द्रमण्डलं सूर्यमण्डलं आकाशे पर्यंकेन निषण्णो पाणिना परिमार्जति परामृशति यावद्ब्रह्मलोकं कायेन वशे

1. M bahuhi kāmehi amaro ca ya° B °mehi amalo ca yo° M °hi bālo na tṛpyati ‖. — 2. M °chyāmyahaṃ nagā° B °mi nāgā°. — 3. BM kāmaṃ jānā° M °mi tañca alaṃ°. — 4. M °mi tato me naṃ bha° B °me naṃ bha°. — 5. M °tṛkhyati ‖.

6. M apahā° kāmeṣu prativiruddho ha paśyati ‖ B °ddho tva paśyati ‖. — 7. M °bhavanti° BM° icchā a(M °icchā)lunāya na bhonti(M °bhavanti) ‖. — 9. B etaṃ ete anicchā° M etaṃ evaṃ anicchā°.

11¹. B °datta rājāna eta° M °datta rājānam evāṃ ‖. — 11². M anujānāhi°. — 12¹. M °prajāhīti° BM °ṣiṣyaṃ ‖. — 12². B °ja | rājyena anartho° M °prajiṣyāmi ‖. — 13². B °vrajyāhīti ‖. — 15. M tasmiṃ dānaṃ kāśi° °ttareṇa kumbhakāra pra° B °mbhakārasya pra°.

16. B °pavako māṇavako tam āśramapadaṃ pra° M °pavako nam āśra° °ttvā tasya kumbhakāra°. — 17. M tadāni pū° B te dāni pūrvaṃ rātrā° M °viharantena yujyantena ghaṭantena | na vyāpayantena catvāri dhyānāni pratyādittā° B °vyāyamantena catvāri dhyānāny utpā° °bhāvā ṛ° M °bhāvo ṛṣiḥ saṃjātā caṃdramaṇḍalaṃ sūryyaṃ maṇḍalaṃ āśrupa-ryyaṃkena niṣaṇṇo pā° yama vaśe vartteti ‖.

वर्तेति ॥ अथ खलु राजा ब्रह्मदत्तो उपकस्य माणवकस्य सुहृयन्तो अभीक्ष्णं इमां गाथां भाषति ॥

अल्पस्य इदं महाविपाको
उपको अध्यगमे महान्तमर्थं ।
सुलब्धा लाभा खलु माणवस्य
यो प्रव्रजे कामरतिं प्रहाय [322ᵇ] ॥

राज्ञो ब्रह्मदत्तस्य अन्तःपुरिका पुनर्पुनः इमां गाथां राज्ञो ब्रह्मदत्तस्य सकाशातो शृण्वन्ति न चास्यार्थं विजानन्ति ॥ तस्य दानि राज्ञो ब्रह्मदत्तस्य गंगपालो नाम कल्पको । राज्ञो ब्रह्मदत्तस्य स विश्वस्तो यथासुखं अन्तःपुरं प्रविशति उपस्थानकरो ॥ सो दानि राज्ञा ब्रह्मदत्तेन उक्तः ॥ गंगपालक केशश्मश्रुं मे करोहीति ॥ एवं वदित्वा ओसुप्तो ॥ तेन तस्य शयितस्य केशश्मश्रु कृतं राजापि विबुद्धित्वा आह ॥ गंगपाल आगच्छ करोहि मे शिल्पकर्मं ॥ गंगपालो आह ॥ कृतं ते देव केशश्मश्रु शयितस्य ॥ सो दानि गंगपालो आदर्शं गृह्य राज्ञो ब्रह्मदत्तस्य अल्लीनो निध्यायतु देवो ति । राजा आदर्शेन केशश्मश्रु निध्यायन्तो गंगपालस्य कल्पकस्य प्रीतो संवृत्तो ॥ राजा आह ॥ गंगपाल तुष्टो स्मि तव एतेन शिल्पेन अभिराद्धो ग्रामवरेण प्रवरेण प्रवारेमि गृह्ण यं ग्रामं इच्छसि ॥ सो दानि आह ॥ यावत्संमन्त्रेमि ततो देवस्य सकाशातो ग्रामवरं गृह्णिष्यामीति ॥ सो दानि गंगपालो राज्ञो ब्रह्मदत्तस्य अन्तःपुरिकायो आलिपति ॥ अथ मया राजा ब्रह्मदत्तो शिल्पेन आराधितो ग्रामवरेण चाहं प्रवारितो गृह्णामि ग्राम-

1. M [illegible]. — 3. M [illegible]. — 5. M [illegible].

7. M rājño brahmadattasya [illegible]. — 8. B [illegible]. — 9. M [illegible]. — 10ᵃ. M so dānim rājño brahmadatto [illegible]. — 10ᵇ. M [illegible].

11ᵃ. B [illegible]. — 11ᵇ. B [illegible]. — 12ᵃ. B [illegible]. — 13ᵃ. M [illegible]. — 13ᵇ. [illegible]. — 15. B [illegible]. — 15ᵇ. M [illegible].

17ᵃ. M [illegible]. — 18ᵃ. M [illegible]. — 18ᵇ. M [illegible].

रन्ति ॥ अन्तःपुरिका आहन्सुः ॥ सर्वेहि यामवरं एषो राजा अभीक्ष्णमिमां गाथां भाषति ।

अल्पस्य कर्म महाविपाको
उपको अधगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजे कामरतिं प्रहाय ॥

वयं च एतायि गाथायि अर्थं न विजानामथ । ततो गच्छ राजानं ब्रह्मदत्तं पृच्छाहीति अलं मे देव यामवरेण यं देवो अभीक्ष्णं इमां गाथां भाषति ।

अल्पस्य कर्म महाविपाको
उपको अधगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजित्वा कामरतिं प्रहाय ॥

एतस्य मे महाराज अर्थं आचिक्षाहीति ॥ सो दानि गंगपालो राज्ञो ब्रह्मदत्तस्य उपसंक्रमित्वा आह ॥ देव अलं मे यामवरेण यं देवो अभीक्ष्णं इमां गाथां भाषति ।

अल्पस्य कर्म महाविपाको
उपको अधगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजित्वा कामरतिं प्रहाय ॥

इमस्या देव गाथाये अर्थमाख्याहि ॥ एतं मे वरं भवतु ॥ राजा आह ।

1[1]. B °haṃsuḥ || M °haṃsu || . — 1[2]. M sarvehi gṛā° gāthā bhā°. — 3. M alpasyemaṃ° vipāka upako mahāvipāko adhvagame mahāntam arthaṃ B °adhvagate mahāntaṃ arthaṃ su°. — 5. BM °ṇa brāhmaṇasya yo°.

7[1]. M °ca yetāye artha vijānāmitha | . — 7[2]. BM °rājaṃ bra° BM °ti | alaṃ° M °yaṃ devā abhi° BM °gāthā bhāṣīa(M °ṣaṃ)ti | . — 9. B °sya mahāvipāko adhvagame° M °vipāko adhigame mahāntam a° B °hāntaṃ arthaṃ su°.

11. M °vraje kāma° BM °hāya e°. — 13[1]. M °arthaṃ gṛhītaṃ°. — 13[2]. BM °gaṃgāpā°. — 14. M °yaṃ devā abhi° gāthā bhā° BM °ti | a°.

16. B °sya mahā° adhvaga° M °mahāntaṃ artha B °rthaṃ su°. — 18. B °ṇa brāhmaṇasya yo° M °bhā mahābrāhmaṇa khalu yo pravraje kāmara° B °t kāmarati° BM °hāya i°. — 20[1]. BM imasya devo gā°. — 20[2]. M °me bhavatuṃ || . — 20[3]. M °jā āha || .

उपको [323b] माणवको अर्धराज्यमपहाय कामेषु आदीनवं दृष्ट्वा ऋषिप्रव्रज्यां प्रव्रजितो सो च पंचाभिज्ञो महाभागो ऋषि संवृत्तो अहं च कामेषु प्रमत्तो । सो हं तस्य उपकस्य माणवकस्य स्पृहयन्तो अभीक्ष्णं एतां गाथां भाषामि ॥ सो दानि गंगपालो राज्ञो श्रुत्वा अन्तःपुरं प्रविशित्वा अन्तःपुरिकानामारोचेति ॥ तस्य मा उत्कण्ठथ न राजा प्रव्रजिष्यति । तस्य उपकस्य माणवकस्य स्पृहयन्तो राजा अभीक्ष्णं एतां गाथां भाषति ॥ इदानीं अन्तःपुरिका हृष्टा तुष्टा आत्तमना हिरण्यस्य सुवर्णस्य च वस्त्राभरणानां च महान्तं राशिं कृत्वा गंगपालमाहन्सु: ॥ गंगपाल इदन्ते अभिच्छादं भवतूति ॥ तस्य दानि गंगपालस्य एतदभूषि ॥ सो च नाम उपको माणवको आढ्यो राज्यमपहाय प्रव्रजितः किं पुनर्मया न प्रव्रजितव्यं भवेय । यं नूनाहं पि प्रव्रजेयं किं मे परेषां वित्तेन कार्यं ॥ सो दानि अन्तःपुरिका आह ॥ अलं मे तेन हिरण्यसुवर्णेन अहं पि प्रव्रजिष्यामि ॥ सो दानि ब्रह्मदत्तस्य उपसंक्रमित्वा आह ॥ देव अनुजानाहि मे प्रव्रजिष्यामि इति ॥ राजा आह ॥ कस्य सन्तिके प्रव्रजिष्यसि ॥ सो आह ॥ उपकस्य ऋषिस्य सन्तिके प्रव्रजिष्यामि ॥ राजा आह ॥ अनुजानामि प्रव्रजाहीति ॥

सो दानि गंगपालो उपकस्याश्रमं गत्वा प्रव्रजितो ॥ तेनापि पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन युज्यन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानानि निष्पादितानि पंचाभिज्ञा साक्षीकृता चन्द्रसूर्यमहर्द्धिकमहानुभावपरिमार्जको ऋषि संवृत्तो ॥ अश्रोषीत्काशिपती राजा ब्रह्मदत्तो सर्वे ते उभयो ऋषयो पंचाभिज्ञा संवृत्ता ते महर्द्धिका महानुभावा । तस्य दानि तेषां ऋषीणां दर्शनकामता

1. M °jyam avahāya ° ādīnavaṁ ° ce gaṁ paśca° B °vṛtto | ahaṁ° M °haṁ ca kāmeshu pravṛtto B °pramatto ca ahaṁ°. — 2. M ahaṁ° B °spṛhayanto° M °spṛhayanto ° gāthā bhāshati || B °bhāshati | ; — 3. M °gaṁgapā ° śrutvā antahpuraṁ ° śitvā antahpurikānāṁ ārocanti || B °cemti || ; — 5ᵃ. M °uthaṁ rājā pravrajishyati | . — 5ᵇ. M °spṛhayanto rā° BM °gāthā bhā°.

6. M idānīṁ antahpurikāṁ cittā tu° B °rikā cittā tu° M °nāṁ ca mahāntaṁ rā ° har- tsu | B °naṁ gaṁ°. — 8ᵃ. B °anicchā° M °cchādanaṁ bha° B °ti te°. — 8ᵇ. M tasyedā- nīṁ gaṁgapālasyaita°. — 9ᵃ. M sa ca nāma u° B °ṇānaṁ u° BM °āḍhyo rā° M °hāya pravrajito kiṁ ° na prajitavyaṁ° BM °vyaṁ | ; — 10ᵃ. M °ahaṁ cito na kārya | . — 10ᵇ. M °dānīṁ antahpu°.

11ᵃ. M na tena rūpasvarṇena ahaṁ pi pra | sva° B ayaṁ me°. — 11ᵇ. M °dānīṁ bra° B °bradatta°. — 12. M °hi mama pra ° shyāmīti || ; — 13ᵃ. M °syu santike°. — 13ᵇ. M °shisya santike°. — 14ᵃ. BM °vrajyāhīti | ; — 15ᵃ. M °dānīṁ gaṁgapāla upa- kasyāśramaṁ°. — 15ᵇ. M °pūrvarātrāpara ° kena yujyantena ghaṭantena vyāyamantena catvā ° kṛtā candrasuryamaha ° ṛṣito. — 18. M °śrāshe umbhayo ṛṣi pravrajito pi maha° B °ṛṣitā ti ma° BM °rddhiko ma° M °bhāva B °bhāvā te°. — 19. M tasyedānīṁ te ° kāmatā n°.

उदुपासि ‖ सो दानि अमात्यपारिषद्यानामन्त्रयति ‖ गच्छाम तेषां ऋषीणां दर्शनाय कुम्भकारस्य प्रव्रजितस्य च उपकस्य च गंगपालस्य चाश्रमं सर्वे ते च ऋषयो चतुर्ध्यानलाभी पंचाभिज्ञा महर्द्धिका महानुभावा ति । सो कालो तथारूपाणां दक्षिणीयानां दर्शनायोपसंक्रमणाय पर्युपासनाय ‖ अमात्यपारिषद्या [3,3ᵃ] आहन्सुः ‖ मा देवो तेषां सकाशं गच्छतु ते नाम इह आनयितव्या ‖ [सो दानि गंगपालो राज्ञो ब्रह्मदत्तस्य आसन्नं गतो नापितभाण्डं ओस्वजयित्वा प्रव्रजितो ‖ अथ खलु अन्यतरो राजामात्यो राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ‖

अयमेव सो आसन्नो ब्रह्मदत्तस्य शीलवतो ।
यत्र क्षुरं च भाण्डं च ओस्वजयित्वा प्रव्रजितो ‖]

इत्येते सप्त नक्षत्रा लोकपाला यशस्विनः ।
आदिष्टा पुरिमे भागे एतेषां पुरिमा दिशा ॥
एते वो अधिपालेन्तु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमे ।
लब्धार्था च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
पुरस्तिमे दिशोभागे अष्ट देवकुमारिका ।
भद्रोत्तरा नन्दिषेणा नन्दिनी नन्दिरक्षिता ॥
जयन्ती विजयन्ती च सिद्धार्था अपराजिता ।
तेषामधिपती राजा धृतराष्ट्रो ति नामतः ॥
गंधर्वाधिपती राजा देवेहि स च रक्षितः ।
सो पि वो अभिपालेतु भूमीये भवनेन च ॥
क्षेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ सर्वदेवेहि रक्षिता ॥
पुरिमस्मिं दिशोभागे चापलं म नाम चेतियं ।
नित्यं ज्वलति तेजेन नित्यं यशोपस्थापनं ।
सो पि वो अभिपालेतु भूमीये भवनेन च ॥
[360a] क्षेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ सर्वचेतियसुरक्षिता ॥
येन केनचिदर्थेन गच्छथ दक्षिणां दिशं ।
नक्षत्रा अभिपालेन्तु ये तां दिशामधिष्ठिता ॥
मघा चोभे च फाल्गुनी हस्ता चित्रा च पंचमा ।

1. B °pāle ya°. — 2. B adi° M adiṣṭo purime° BM °diçām |. — 3. BM kshemā ca sadi°.

6. B °rikām |. — 7. B nandottarānandise° M nandarānandinandiranandisenanda[illegible]kshitā |; — 8. B omet cette ligne. M nandirānandinaddhitā ca siddhā °jitā | tā pi ca adhipālentu bhumiye bhavanena ca | kshemā ca vo diça bhontu mā gamo pāpam āgami | labdhārthā ca nivartatha devakanyāhi rakshitā | 10° (l. 9). — 9. M °dhipati rājā dhṛita[illegible]rāshṭrati° B °dhṛitarāshṭrena nā°. — 10. M gandharvādhipati rājā devehi ca rakshitā | B °hi sa ca rakshatah |.

11. BM °pi to a°. — 12. B kshemā ca vo di° M °gami |. — 13. BM °sarva de°kshitām |. — 14. M purimasmiṃ° B °diçābhage cāpālaṃ° M °ge pālaṃ ° cetiye |. — 15. M °jvarati° BM °nityā satya(B °asayvipayā°.

16. BM °leti bhāmī(B °bhūrīye°. — 17. B kshemā ca vo pā° M °gami | B °mī | la°. — 18. M °rthāya ni° BM °vartatha°. — 19. BM °kshitā di°. — 20. M °[illegible] [illegible]dim adhi°.

21. B °ghā cābhe° M °ghā vabhe ca phārguṇyau°.

स्वाती चैव विशाखा च एतेषां दक्षिणा दिशा ॥
इत्येते सप्त नक्षत्रा लोकपाला यशस्विनः ।
आदिष्टा दक्षिणे भागे एतेषां दक्षिणा दिशा ॥
ते पि वो अभिपालेन्तु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
दक्षिणस्मिं दिशोभागे अष्ट देवकुमारियो ।
लक्ष्मीमती शिरीमती यशोमती यशोधरा ॥
सुप्रस्थिता सुप्रजाता सुविबुधा सुदाकृता ।
ता पि वो अभिपालेन्तु भूमीये भवनेन च ॥
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ देवकन्याहि रक्षिता ॥
नागानामधिपती राजा विरूढको ति नामतः ।
कुम्भाण्डाधिपती राजा यमेन सह रक्षतु ॥
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ कुम्भाण्डेहि सुरक्षिता ॥
दक्षिणस्मिं दिशोभागे अभिपद्मं नाम चेतियं ।
नित्यं ज्वलति तेजेन नित्यं सत्योपयाचनं ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ चेतियेन सुरक्षिता ॥
येन केनचिदर्थेन गच्छथ पश्चिमां दिशं ।

1. M °caivaṃ vi° BM °kṣiṇāṃ diśāṃ ‖. — 3. B °diśāṃ ‖. — 4. M te pi ca a°. — 5. M °otu mā ga vo pā°.

6. B labdhā cārtha° M °rthā va ni°. — 7. BM °kṣiṇasmiṃ° M °kumārikā | B °riye |. — 8. B lakṣmīmati śirīmati yaśomatī yaśodha° M lakṣmīmatī śirīmatī yaśomatī yaśodha°. — 9. B suprasthitā supra° M suddhasthitā supra° kṛtāḥ |. — 10. M tāṃ pi ca abhipālentu°.

11. B °bhontu mā ca°. — 12. M °devakanyāyo°. — 13. M °virūḍha° [illegible] |. — 14. M kumbhāṇḍādhipatiḥ rājā° B °[illegible] ca |. — 15. M sa pi vā abhipālentu bhūmīye bhavanena ca | kṣe° B °bhontu mā°.

16. M °rthāya ni°. — 17. BM °kṣiṇasmiṃ° M °[illegible] cetiya |. — 18. M °jvalati tejena nitya sa° BM °[illegible] |. — 19. BM °pālentu bhū°.

21. B °cetiye su° M °tiya ca su° B °kṣitā ya°. — 22. B ye kenaci° M ye kenci yenaci artha° BM °ścimā diśaṃ |.

श्रवणा यो नियमेन्तु ये तां दिशमधिष्ठिता ॥
अनुराधा च ज्येष्ठा च मूलं च दृढवीर्यवान् ।
उभे आषाढे अभिजित् श्रवणा भवति सप्तमी ॥
ते पि वो अभिपालेन्तु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोतु मा च वो पापमागमी ।
नक्षत्रा च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
पश्चिमस्मिं दिशोभागे अष्टौ देवकुमारियो ।
अलंबुसा मिश्र[360ᵇ]केशी अरिट्ठा पुष्पमायका ॥
. . . . कृष्णा शुक्ला च द्रौपदी ।
ता पि वो अभिपालेन्तु आरोग्येन शिवेन च ॥
क्षेमा च वो दिशा भोतु मा च वो पापमागमी ।
नक्षत्रा च निवर्तेथ देवकन्याहि रक्षिता ॥
नागानामधिपती राजा विरूपाक्षो ति नामतः ।
स वो नागाधिपो राजा पक्षेण सह रक्षतु ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोतु मा च वो पापमागमी ।
नक्षत्रा च निवर्तेथ सर्वनागेहि रक्षिता ॥
पश्चिमस्मिं दिशोभागे अस्तो नामेन पर्वतो ।
आयतो चन्द्रसूर्याणां अस्तो अर्थं ददातु वो ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ॥
क्षेमा च वो दिशा भोतु मा च वो पापमागमी ।
नक्षत्रा च निवर्तेथ सर्वं अस्तेन रक्षिता ॥
येन केनचिदर्थेन गच्छथ उत्तरां दिशां ।

1. B °dhiṣṭhitā | M °ṣṭhitāḥ | . — 3. M °āṣāḍhe abhijiccaçravaṇe bha° B °çravaṇe bha° M °ptami || . — 5. M °diço bho°.

7. B paçcimasmiṃ diçobhāge aṣṭaṃ de° M paçcimasmiṃ ° aṣṭa de ° riyaṃ | B °riyo | . — 8. BM alaṃvarṣā mi° M °ciṣṭo supuṣkhāvarṣā | . — 9. BM ekānaṃ (B °naṃ) vātavarṇikā kṛ° M °çuklamadopati | B °çuklaṃ ca dopati | . — 10. B °rogyena çi° M °rogyaṃ ca ç°.

12. M °kṣatrāṇi ya sa ° devakanyāyā° B °kṣitā | . — 13. M °virūpākṣo°. — 14. M sarvanāgā° B sarvarājādhipo nāgā vara°. — 15. M °vo abhipā° BM °lentu bhū°.

16. M °pāmi | . — 17. M °rthāya ni° B °sarvanāgā°. — 18. M paçcimasmiṃ° B °diçābhā° M °asthanāme°. — 19. M °candrasūryāṇāṃ asto a° B °yāṇāṃ asto arthaṃ dadā bhava | M °dadatu me | . — 20. M °abhipā° BM °lentu bhū°.

22. M °rthāya ni° °kṣitāḥ | . — 23. BM ye kenaci° uttarāṃ diçāṃ (M °çaṃ) | .

नक्षत्रा यो भियायेन्तु ये तां दिशमधिष्ठिता ॥
धनिष्ठा शतभिषा चैव उभौ प्रोष्ठपदा पि च ।
रेवत्याश्विनी चैव भरणी भवति सप्तमी ॥
ता पि वो अनुपालेन्तु भूमीये भवनेन च ।
क्षेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
उत्तरस्मिं दिशोभागे अष्टौ देवकुमारियो ।
इला देवी सुरा देवी पृथिवी पद्मावती ॥
आशा श्रद्धा हिरी च श्री. . . . . . समागता ।
ता पि वो अभिपालेन्तु भूमीये भवनेन च ॥
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ देवकन्याहि रक्षिता ॥
तासामधिपती राजा कुबेर इति नामतः ।
सर्वयक्षाधिपो राजा राक्षसीहि सह रक्षतु ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ यक्षराक्षसरक्षिता ॥
उत्तरस्मिं दिशोभागे कैलासो नाम पर्वतः ।
आवासो यक्षसंघानां राक्षसानां निवेशनं ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
क्षेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ यक्षराक्षसरक्षिताः ॥
अष्टाविंशति नक्षत्रा सप्तसप्त चतुर्दिशं ।

1. B °dhiṣṭhitā | — 2. M dhanaṣṭha ca° B dhaniṣṭhā ca° BM °proṣṭhapa° B °pi ca | — 3. BM °thāçvajā caiva bha° B °caiva saptamī° M °ptamī | — 4. M °va adhipā°. — 5. BM °bhonti mā° M °gamī | .

6. M °rthā ca ni° kṣitāḥ | . — 7. M uttarasmiṃ° BM °[illegible]° [illegible] | — 8. B hiriṃ devī ca° M hirī devī ca° [illegible] | . — 9. M [illegible] [illegible] [illegible] [illegible] samāgata | B °hirī çrī ti pi°. — 10. M tā ca vo a° bhūmīye°.

11. M °gamī | . — 12. M °rthā ca ni° devakanyā°. — 14. M °sthi samrakṣitā | .

15. BM °pālentu bhū°.

16. M °diçā bho°. — 17. M °rthā ca ni° kṣitāḥ | . — 18. M uttarasmiṃ° B °diçobhā° BM °kailāsa nā°. — 20. M °pālentu bhū°.

22. B labdhārthā ca nivartetha ni° M °kṣitā | . — 23. B aṣṭāviṃçati° M °ttā ca sapta ca°

सह चन्द्रमसूर्येहि नित्यकालं चमूम[36 r°]चं ॥
आविंशइ्चनक्षत्रा अष्ट अष्ट चतुर्दिशं ।
चत्वारश्च महाराजा लोकपाला यशस्विनः ।
प्रज्वलमानवर्णेन रक्षन्ति ते चतुर्दिशं ॥
अष्ट श्रमणा ब्राह्मणा अष्ट जनपदेषु क्षत्रिया ।
अष्ट सइन्द्रका देवा सदा रक्षां करोन्तु वः ॥

तेषां दानि भगवता त्रीणि शरणगमनानि दिन्नानि । गच्छथ बुद्धशरणं गच्छथ धर्मशरणं गच्छथ अनागतं च भगवतो श्रावकसंघशरणं ॥ ते दानि बुद्धशरणं गता धर्मशरणं गता संघशरणं गता ॥ ते दानि आहन्सु: । वयं भगवं वाणिजका देशदेशानि च राज्यानि च चरन्ता । साधु मे भगवां किंचिदेव धातुं ये वयं पूजयेम ॥ भगवता दानि तेषां शीर्षातो पाणिना केशानि ओलारित्वा दिन्नानि इमं केशस्तूपं कारयेथ नखानि च ओलारित्वा दिन्नानि इमं नखस्तूपं कारापेथ शिला च आगमिष्यन्ति तां च शिलां प्रतिष्ठापेथ ॥ तेहि दानि यत्र केशस्थाली नाम अधिष्ठानो तहिं केशस्तूपं कारापितं । वालुक्षो नाम नगरं तहिं नखस्तूपं कारापितं । शिलुक्षं नामाधिष्ठानं तत्रापि शिला प्रतिष्ठापिता या भगवता स्वकीये पाणिना क्षिप्ता ॥

भगवता दानि सप्तसप्ताहेहि एकूनपंचाशद्दिवसानि निराहारेण अपुपमधु-

1. M °masuryya ° bhoti anumakaṃ | — 2. M °devakaññyā vā adda a°. — 3. M °pāla ya°. — 4. M °jvalamānā ° nti ca caturdiçaṃ | B °nti catuçaṃ | . — 5. BM purimā(B °makāṃ) diçāṃ dhṛtarāṣṭro paçcimāṃ(M °çcime ca) virūpākṣo(M °kṣaḥ) dakṣiṇāṃ ca virūḍhako kuvero u(M °ro ca)ttarāṃ(B °rā) diçaṃ | adda çramaṇ(M °çravaṇa) adda brā° M °dasu ca | kṣatriya a° B °sha kṣatriyā |

6. B °dā rakṣā karantu° M °nta ca | . — 7ª. M °dināni | B °nnāni ga°. — 7ᵇ. B gacchatha | buddhaṃ çaraṇaṃ gacchatha dharmaçaraṇaṃ gacchatha | anā° M °dharmmaçaraṇaṃ gacchatha saṃghaçaraṇaṃ anā° BM °bhagavatā çrā°. — 8. BM °buddhaçaraṇaṃ gatā saṃgha°. — 9ª. M °hansuḥ | . — 9ᵇ. B °bhagavaṃ vā° M °bhagavaṃ vāṇijakā deçadeçā° — 10. M °gavāṃ kiñci° B °vāṃ kiñci° BM °J dhātum(andetu(M °he-tu) yaṃ vayaṃ pūje(B °yujayelam | .

11. BM ° pāṇi(M °nijaṃ keçāni ohāritvā dinnāni | imaṃ(M °mā ikāṃ) ke° rayatha| na ° nāni | i° M °kārāpetha çirā ca āgamiṣyanti tāṃ° B °tāṃ ca çilā pra°. — 13. B °dāni keça° M °dāni keçasthāni nā ° dhiṣṭhānāto tahiṃ ° yaṃ kārayetha kārāpitaṃ | B °taṃ çi°. — 15. Omis par B. M ° kārāpitaṃ | . — 16. M çilujaṃ nāmādhiṣṭhānaṃ tatrā° B çilakṣaṃ nāmā ° naṃ | tatrā° M °ṣṭhāpitā sa bha ° yinkhi pā°.

17. M atha khalu bhagavān dā° B bhagavāṃ dā° M °pāhehi ekunapaṃ ° ṣadadivānāṃ vā ° rpaṇaṃ tilaṃ teṇa bha° B °rpaṇam pitaṃ bha° BM °gavato tathā abhichanditā(M °nditā) | .

कालं पाणितकानां मधुतर्पणं पीतं पीतेन भगवतो ते च आमिषाश्चिता ॥ ततो शक्रेण देवानामिन्द्रेण भगवतो हरीतकी उपनामिता । धातूनां सुखं भविष्यति ॥ भगवता दानि सा हरीतकी परिभुक्ता तं च हरीतकीकुलकं भगवता तस्मिं प्रदेशे रोपितं सा च तं दिवसमेव जाताचयाकपत्रशाखा महान्तं हरीतकीवृक्षं पुष्पफलोपेतं संवृत्तं । इमं भगवतो प्रथमं चारीवृक्षं । या च ततो भूताती हरीतकीयो तानि अद्य चैतकीया हरीतकीप्रजाता ति वुच्चन्ति ॥

ततो भगवता उरुविल्वायां षड्वर्षाणि दुष्करं तपं चीर्णं ॥ तदा उरुविल्वायां सेनापतिग्रामातो नन्दरावर्तविकाये ग्रामपांसुकूलं भगवतो दुष्करचारिकां चरन्तस्य प्रसन्नचित्ताय उपनामितं । यदा भगवं परिपूर्णसंकल्पो [36a] भवेसि तदा इमं ग्रामपांसुकूलमनुग्रहार्थाय परिभुंजेसि ॥ भगवतो तूष्णीभावेनाधिवासनां विदित्वा तुष्टा आत्तमना पांसुकूलं वृक्षशाखाये ओलम्बित्वा भगवतः पादौ शिरसा वन्दित्वा त्रिष्कृत्तं प्रदक्षिणीकृत्वा प्रक्रमि ॥ सा दानि अचिरस्येव कालगता भगवतो नन्दिका प्रसन्नचित्ता तं पांसुकूलदानं समनुस्मरन्ती समनन्तरकालगता त्रयस्त्रिंशे देवनिकाये उपपन्ना अन्यतरस्य महर्द्धिकस्य महानुभावस्य देवपुत्रस्य विमाने अप्सरसां शतसहस्रप्रवरा ॥ सा दानि अप्सरा समन्वाहरति । किं मया मनुष्यभूताये कुशलमूलं कृतं कियद्रूपा च दक्षिणा प्रतिष्ठापिता येनाहं त्रयस्त्रिंशे देवनिकाये उपपन्ना ॥ सा दानि समन्वाहरन्ती पश्यति उरुविल्वायां सेनापतिग्रामके नन्दा नाम नन्दरावर्तिका आसि दुःखिता । तं मया मरणकाले बोधिसत्त्वस्य दुष्करं चरन्तस्य प्रसन्नचित्ताये ग्रामपांसुकूलं दिन्नं तेनाहं कुशलमू-

1. M °gavatā hari°. — 2. BM °nāṃ sukhaṃ°. — 3. M °sa sā harītakī pa° [illegible] haritakīdvepikaṃ [illegible] B °kā [illegible] haritakī[illegible] | [illegible] M °[illegible] BM °sam [illegible] M °[illegible] jātā[illegible] pra° M °[illegible] mahantaṃ hari° puṣpaṃ pha° °vṛtta | B °vṛtta | — 5[1]. M °[illegible] | B °[illegible]. — 5[2]. M tato [illegible] B yā ca ye tato [illegible] M °to haritakīyo ° [illegible] harītakī [illegible] buddhyanti | B °[illegible] | buddhyanti |.

7[1]. B °uluvilvā° M °[illegible] | — 7[2]. B °[illegible] uluvilvā° M °[illegible] [illegible] B °[illegible] M °[illegible] B °[illegible] | — 9. B °[illegible] M °[illegible] paripūrṇasaṃkalpo° BM °[illegible] M °[illegible] bhuñjeṣi |. — 10. B bhagavatā [illegible] M bhagavatā [illegible] BM °[illegible] B °[illegible] M °[illegible] pāṃsukulaṃ [illegible] B °[illegible] M °[illegible] trikṣṛtyaṃ prada°.

12. M °bhagavatā [illegible] B °[illegible] M °[illegible] | samanantara° B °[illegible] | tra° M °upapannā [illegible] B °[illegible] M °[illegible] °[illegible] |. — 15. BM sa dāni apsaro samanvāharati[illegible] B °[illegible].

16. M °[illegible] ° [illegible] ca dakṣiṇāye pra° B °[illegible] pra° M °upapannā |. — 17. M sa dāni ° [illegible] B °[illegible] M °[illegible] BM °[illegible] | [illegible] M °[illegible] B °[illegible] M °[illegible]. — 18. M °[illegible] [illegible] B °[illegible] M °[illegible] upapannā° [illegible].

येन मनुष्येषु च्यवित्वा इह त्रयस्त्रिंशे देवनिकाये उपपन्ना । न च मे तं देवधर्मं भगवताद्यापि परिभुक्तं । यदिममेव देवधर्मं भगवाननुग्रहार्थं परिभुंजेया तन् मम महत्फलतरं भवेया ॥ सा दानि अप्सरशतसहस्रपरिवृता महता देवानुभावेन महता देवर्धीये त्रयस्त्रिंशभवनातो च्यवित्वा तं शाणपांसुकूलं गृह्य भगवन्तमुपसंक्रान्ता ॥ इदं मया भगवन् शाणपांसुकूलं मनुष्यभूताये भगवतो कुटिकारं परमया प्रसन्नचित्ताये दिन्नं यदा भगवं परिपूर्णसंकल्पो भवेसि ततो भगवन् ममानुग्रहार्थं परिभुंजेसि तेनाहं कुशलमूलेन मनुष्येषु च्यवित्वा त्रयस्त्रिंशेषु देवनिकायेषु उपपन्ना । साधु मे भगवां इमं शाणपांसुकूलं परिभुंजतु अनुकंपामुपादाय यथा मे महत्फलतरो भवेया ॥ देवा अन्तरीक्षगता भगवन्तमाहंसु ॥ मा भगवानिमं शाणपांसुकूलं परिभुंजतु । वयं भगवतो दिव्यानि चिक्कणदूष्याणि दास्यामः ॥ भगवानेषां देवतानां चिक्कणदूष्यप्रदानानि नाधिवासे[ति] ॥ तं गवाये भगवतो अनुग्रहार्थाये शाणपांसुकूलं प्रतिगृहीतं देवताशतसहस्रेहि च अन्तरीक्षातो चेलविक्षेपाणि च भगवतः कृतानि मन्दारकानि ... च क्षिपेंसु ॥ चक्रवर्तिराज्यं परित्यक्तं किं नो पांसुकूलेषु चित्तं रमति ॥

भगवां दानि शाणपांसुकूलं धोवितुकामो । उदकेन कार्यं ॥ अथ खलु शक्रेण देवानामिन्द्रेण पाणीहि नदी खता अद्यापि च पाणिखाता नाम नदी वहति ॥ शिलापट्टेन कार्यं यत्र तं शाणपांसुकूलं धोविष्यति ॥ चतुर्हि महाराजेहि चत्वारि शिलापट्टा उपनामिता । भगवता एकत्र शिलापट्टे तं शाणपांसुकूलं धोतं ॥

1. M °ratām adyā pi° BM °ktaṃ ya°. — 2. BM °dimevaṃ de° B °vamaṃ | bha° M °jeyā taṃ mama maha° BM °tphalāntaraṃ bhaveyā | . — 3. B sa dā° BM °yāto mahatā devānu° M °vena mahāto ṛ° B °devarddhī° BM °ardhīye bha° M °nāto cyavitvā tataḥ ṛṣa° pāṃsukulaṃ° B °saṃkrāntā° M °gṛhya gataṃ upasaṃkrāntā | . — 5. BM °idaṃ śāṇapāṃsukūlaṃ mayā M °pāṃsukulaṃ mama° M °guruto duḥkaraṃ° BM °raṃ | yadā bhagavāṃ pa(M °rim pariprṇa° saṃ | tato° B °gavā ma° M °vān bha° B °ribhujesi | te° BM °hena mānu°.

8. BM sādhu maṃ bha° M °gavān maṃ ṣā° B °pāṃsupaṃ° M °pāṃsukū° BM °bhuṃjatu°. — 9. B °rīkṣe gatā | bha°. — 10¹. B °gavaṃ maṃ° M °gavān evaṃ śāṇapāṃsukulaṃ pratigṛhītaṃ devatāśatasahasrehi pari° BM °gṛhṇatu | . — 10². BM °cikkaṇaṃ dūṣyā°.

11. M °gavān teṣāṃ dāni de° BM °nāṃ kalpaṃ dūṣya°. — 12. B °śāṇaṃ pāṃ° M °śukulaṃ ° hitaṃ de ° ntrā cāsta ° ta celavikṣepāni ca bhaveyā | kṛ° B °te celavikṣepāṇi ca bhaveyā kṛ° BM °ntaḥ | . — 14. BM °vartitvā ° kiṃ ca pāṃsukule° M °ttaṃ ratiṃ°. — 15¹. M °gavān dāni śāṇapāṃsukulaṃ°. — 15². M pāṇīṃ na°. — 15³. BM °pi(B °pāṇi nadī khatā adyāpi ca pāṇikhātā nāma° M °vahati ṇi°.

17¹. M °taṃ śāṇapāṃsukulaṃ° BM °hi ca°. — 17². B °lāpaṭṭaṃ u° M °lāpaṭṭe u° B °mitā bha°. — 18. M °śāṇapāṃsukulaṃ°.

द्वितीये शिलापट्टे तं पांशुकूलं धोवितं । तृतीयं शिलापट्टं भगवता ककुभाधि-वासिकायां त्रिभुवनासनिगम आकाशितामो तव नदीये पुरतो उक्षिप्तं । तेहि तं शिलापट्टं तत्रैव चेतिये प्रतिष्ठापितं । अद्यापि गन्धारराष्ट्रे अधिष्ठानं शिला-मार्गेन ध्यायति । चतुर्थे शिलापट्टे भगवता निषीदित्वा तं शाणपांशुकूलं सी-वितं । अद्यपि तत्र शिलापट्टं भगवतो अनुसीवननामापदे । सर्वे चत्वारि शि-लापट्टा भगवता परिभुक्ता तानि च जम्बुद्वीपे सदेवमानुषस्य लोकस्य चेतियभूता ।

भगवां दानि तं शाणपांशुकूलं धोवित्वा सीवित्वा च पाणिखातनदीकायतो ओक्रमी । स्नायित्वा भगवां पाणिखाततो नदीतो उत्तरिष्यतीति अकिलन्तका-या बुद्धा भगवन्तो अकिलन्तचित्ता तहिं तीरे ककुभो नाम वृक्षो अंशाखप्रशाखो प्रासादिको दर्शनीयो वेनाको च वृक्षो तेनाम्ना च वृक्षस्य देवता ककुभो नाम देव-पुत्रो प्रतिवसति । सो देवपुत्रो भगवता ततो नदीतो उत्तरन्तेन आभाषितो । आहर ककुभ हस्तं । तद्विमलकुण्डलधरेण ककुभेन देवपुत्रेण भगवतो बाहा प्रसारिता । भगवां ककुभस्य देवपुत्रस्य बाहां गृह्य पाणिखाततो नदीतो उत्तीर्णो समं च भगवता ततो ककुभस्य देवपुत्रस्य बाहातो एवं स्वकं अपनीतं तत्र च वृक्षशाखायां भगवतो पंचांगुलस्य करतलस्य पदं दृश्यति [366a] । एवं दानि अद्य बोधिं आहारको च सुंदरो ककुभो नदीका च पाणिखाता शिला च देवैर्वि निक्षिप्ता ॥।

ततो भगवां अजपालन्यग्रोधं गतो । भगवानजपालस्य न्यग्रोधमूले विहरन्तो

1¹. M °ya pi ca° [illegible] B [illegible] | . — 1². B °iya çilāpaṭṭe bhagavato trapusa° M °yaṃ pi çilāpaṭṭe bhagavato trapusabhallika° B [illegible] M [illegible] upakṣiptaṃ || . — 3. B [illegible] BM °cetiyaṃ pra°. — 4. M [illegible] pāṃçukulaṃ [illegible] | B °vitaṃ ya°. — 5¹. BM [illegible] BM °lāpaṭṭena bha° BM [illegible] | M [illegible]. — 5². M °rve çilāpaṭṭā catvāra bha° B °tatra çilāpaṭṭe bhagavato pari°.

7. M °taṃ [illegible] çivitvā ca [illegible] B [illegible] ca ° eva nad°. — 8. M [illegible] B [illegible] | bhagavāṃ [illegible] nadī° M [illegible] B [illegible] BM [illegible] | akilantakāyā° M °bhagavanto akilantacitta [illegible] ca vṛkṣasya [illegible] B [illegible] BM [illegible] B [illegible].

11. M [illegible]. — 12¹. M [illegible] B [illegible]. — 12². B [illegible] M [illegible] | B [illegible]. — 13. M bhagavān kaku° [illegible] nadī ° [illegible] BM [illegible] B [illegible] M [illegible] B [illegible]. — 15. B [illegible] | [illegible]. — 16. B [illegible] M [illegible] BM [illegible] | nadī° M [illegible].

18¹. M [illegible] BM [illegible]. — 18². B [illegible] BM [illegible] [illegible]

लोकं लोकासेति ॥ गंभीरो अयं मम धर्मः अभिसंबुद्धो निपुणो सुसूक्ष्मो दुरनु-बोधो अतर्कावचरो पण्डितवेदनीयो सर्वलोकविप्रत्यनीको । आलयारामो खलु पुनरयं आलयरतो आलयसमुदितो आलयारामायां च प्रजायां आलयरतायां आलयसमुदितायां दुर्दृशमिमं स्थानं यदिदं हेतु इदंप्रत्ययः प्रतीत्यसमुत्पादः सर्वो-पधिप्रतिनिःसर्गो पूर्वसंस्कारसमथधर्मोपच्छेदः तृष्णाक्षयो विरागो निरोधो निर्वाणं अहं च न परेषां देशयेयं परे चु मे न विजानेयुः सो मे स्या विघातः ॥ यं नूनाहं एको अरण्यपर्वते तूष्णीभूतो विहरेयं । इमा च गाथायो भगवतो ताये वेलाये प्रतिभायेन्सुः ॥

प्रतिश्रोतगामिनं मार्गं गम्भीरं दुर्दृशं [मम] ।
न रागरक्ता द्रक्ष्यन्ति अलं दानि प्रकाशितुं ॥
कृच्छ्रेण मे अधिगतो अलं दानि प्रकाशितुं ।
अनुश्रोतं हि युज्यन्ति कामेषु ग्रसिता नराः ॥

भगवां उरुविल्वायां विहरे नैरञ्जनायास्तीरे अजपालन्यग्रोधमूले अचिराभि-संबुद्धो ॥ अथ खलु भगवतो एकस्य रहोगतस्य प्रतिसंलीनस्य अयमेवरूपश्चेतसः परिवितर्को उदपादि ॥ अधिगतो यद्दयं मया धर्मो गम्भीरो निपुणो सूक्ष्मो दुरनुबोधो अतर्कितो अतर्कावचरो पण्डितवेदनीयो सर्वलोकविप्रत्यनीको अहं च परेषां देशयेयं परे चु च न आजानेन्सु सो मे स्या परमं विघातं । यं नूनाहं

1. M gambhīra ayaṃ dharma samabhisaṃbuddha parimasukha° B °dho atakka° M °rkāvacarā paṇḍi° yo sarve loke pra° B °loke pratyaniyo a°. — 2. BM ālayarāmā M °yo rajyaṃ khalu punar ayaṃ ālayato ālaya(M °ālamarāto ā°)samuditā ālayārāmāyaṃ ca pra-jāyaṃ ālaya(B °yāṃ ārayara)tāyāṃ ālayasamuditāyāṃ du° M °sthānaṃ yam idaṃ hetuṃ samaṃ pratya° °tpādo sarva pratinibhiḥ pratiniḥ pūrva° B °dhi pratiniḥ pūrva° BM °cchedā tṛ° B °gatarayā° M °haṃ ca taṃ pareṣāṃ° BM °yaṃ paredu me na ° vayeśuḥ so me (M °ma) syā vighātaḥ(M °ghāto) |.

7¹. M °ayaparvata tū° BM °reya i°. — 7². BM imāṃ ca gāthā(M °thāṃ) ca bha° B °gavato tāye ve° BM °bhāsitavyaḥ |. — 9. M °rgaṃ nastiraṃ du° B °durdṛśaṃ na° M °yaṃ ca rā°. — 10. BM °laṃ kṛ°.

12. M °sroteshi yujyati ka°. — 13. M atha bhagavān ura° BM °yāṃ tīre ajā° M °jaṃbyā tīre ajapālasya prodhamule ° buddha |. — 14. BM °pratisaṃlāyanasya ° sa ssuraṃ(M °rūpa vitarka°. — 15. M °dhigataṃ yad a° BM °mbhīra nipuṇa sūkṣma du-ranu(B °rani)bodha atarkita(M °avitarka) atakāvacara paṇḍi° M °lokavipratyanīya a° BM °haṃ ca pare ° yaṃ pareśu(M °sha naca naṃ ajānesu(M °nuḥ) | so° M °syā pa-ramaṃ vacanaṃ vighātaṃ B °ghātaṃ |.

17. M yaṃ nunā°.

एको अरण्यायतने तूष्णी विहरेयं ॥ अथ खलु महाब्रह्मा भगवत इदमेवरूपं चेतसो परिवितर्कमाज्ञाय येन शक्रो देवानामिन्द्रो तेनोपसंक्रमित्वा शक्रं देवानामिन्द्रमेतदवोचत् ॥ एतकारिष कौशिक भगवता अल्पोत्सुकताये चित्तं नमेति न धर्मचक्रप्रवर्तने । किं पुनर्वयं मारिष कौशिक येन भगवांस्तेनोपसंक्रमित्वा भगवन्तं याचेम धर्मचक्रप्र[363a]वर्तनाय ॥ साधु मारिषेति शक्रो देवानामिन्द्रो महाब्रह्मणो प्रत्यश्रौषीत् ॥ अथ खलु महाब्रह्मा शक्रो देवानामिन्द्रो सुयामो देवपुत्रो सुनिर्मितो च देवपुत्रो वशवर्ती च देवपुत्रो चत्वारश्च महाराजानो इत्येते दश यथाधिपतयो दश यक्षमहत्तरका अनेकयक्षशतपरिवारा अभिक्रान्ताये रात्रीये केवलकल्पं न्यग्रोधमूलं वर्णेनावभासयित्वा येन भगवांस्तेनोपसंक्रान्ता भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासुः ॥ एकान्ते स्थितो महाब्रह्मा शक्रं देवानामिन्द्रमेतदवोचत् ॥ याच मारिष कौशिक भगवन्तं धर्मचक्रप्रवर्तनाय ॥

अथ खलु शक्रो देवानामिन्द्रो एकांसमुत्तरासंगं कृत्वा येन भगवांस्तेनोपसंक्रमित्वा भगवन्तं गाथाये अध्यभाषे ॥

उत्तिष्ठ विजितसंग्राम पूर्णभारो त्वं अनृण विचर लोके ।
चित्तं हि ते विशुद्धं यथ चन्द्रो पंचदशरात्रे ॥

अथ खलु भगवां तूष्णी अभूषि नाधिवासेति शक्रस्य देवानामिन्द्रस्य धर्मचक्रप्रवर्तने ॥ अथ खलु महाब्रह्मा शक्रं देवानामिन्द्रमेतदवोचत् ॥ न खलु मारिष कौशिक भगवन्तो अर्हन्तः सम्यक्संबुद्धा एवं याचीयन्ति धर्मचक्रप्रवर्तनाये न च पुनस्तथागता अर्हन्तः सम्यक्संबुद्धा एवं याचिता धर्मचक्रं प्रवर्तयन्ति ॥ एवमुक्ते शक्रो देवानामिन्द्रो महाब्रह्माणमेतदवोचत् ॥ त्वं मारिष महाब्रह्म तेषां पुरिमकानां

1. M °āsanā bhagavato [illegible] — 3. B [illegible] — 4. B [illegible] M °[illegible].

6. M [illegible] — 10. BM [illegible].

11. BM °cakraṃ pra°. — 12. B [illegible] — 14. M [illegible] — 15. BM [illegible].

16. M [illegible] — 17. BM [illegible] — 19. B [illegible] — 20. BM [illegible] M °cakraṃ pra° M [illegible].

सम्यक्संबुद्धानां दर्शावी तेन हि मार्ष महाब्रह्मा याच भगवन्तं स्वयमेव धर्मचक्रप्रवर्तनाये ॥ अथ खलु महाब्रह्मा एकांसमुत्तरासंगं कृत्वा येन भगवां तेनाञ्जलिं प्रणामयित्वा भगवन्तं गाथाये अध्यभाषे ॥

उत्तिष्ठ विजितसंग्राम पूर्णभरो त्वं अनृणो विचर लोके ।
देशेहि सुगत धर्मं आज्ञातारो भविष्यन्ति ॥

अथ भगवां तूष्णी अभूषि ॥ अथ खलु महाब्रह्मा शक्रो देवानामिन्द्रो सुयामो च देवपुत्रो संतुषितो च देवपुत्रो निर्मितो च देवपुत्रो वशवर्ती च देवपुत्रो चत्वारो महाराजा अनेकयक्षशता अनेकयक्षशतपरिवारा भगवतो अनधिवासनां विदित्वा धर्मचक्रप्रवर्तनाय दुःखदौर्मनस्यजाता भगवतः पादौ शिरसा वन्दित्वा भगवन्तं प्रदक्षि[363b]णीकृत्वा तत्रैवान्तरहायेन्सु ॥

एवमेतं श्रूयति ॥

भगवां उरुविल्वायां विहरति नद्या नैरंजनाया तीरे अजपालन्यग्रोधमूले अचिराभिसंबुद्धो ॥ अथ खलु महाब्रह्मा अतिकान्तवर्णो अभिक्रान्ताये रात्र्यां केवलकल्पं अजपालन्यग्रोधमूलं वर्णेनावभासयित्वा येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा भगवन्तं प्रदक्षिणीकृत्वा एकान्तस्थितो महाब्रह्मा भगवन्तं गाथाये अध्यभाषे ॥

उत्तिष्ठ विजितसंग्राम पूर्णभरो त्वं अनृणो विचर लोके ।
देशेहि सुगत धर्मं आज्ञातारो भविष्यन्ति ॥

अथ खलु भगवान्महाब्रह्मं गाथाये प्रत्यभाषे ॥

प्रतिस्रोतगामिको मार्गो गम्भीरो दुर्दृशो [मम] ।
रागरक्ता न द्रक्ष्यन्ति अलं मह्यो प्रकाशितुं ॥

2. M °ddhānaṃ u° B °kāṃśaṃ u° M °saṃgaṃ kṛtvā yena bhagavāṃs tenāñjaliṃ kṛtvā praṇā° ... adhyabh°. — 4. B °jinā° BM °pūrṇa; M °anuṇo vihara ... M °anu-ṇo) vica° M °loka da° B °ke de°. — 5. M deśehi°.

6¹. M °gavān tūṣṇī°. — 6². M °ndro suyāmā ca devaputro saṃtuṣitā ca devaputro nirmito ca devaputrā vaça° mahārājāno anekayakṣaçatā anekayakṣaçataparivāro bhagavato adhivā° B °rivāra bhaga° M °jātā bhagavato pādau ° bhagavantaṃ pra° M °trairvāntarahā-yanti] B °hāyanti].

11. BM °çrūyati bha°. — 12. M °gavān uru ° ti] nadyāṃ nai ° yā tīre ° bhava mūla° — 13. B °kevalaṃ kalpaṃ° M °kevalaṃ aja ° mūlaṃ varṇenāvabhāsayitvā yena bhagavān tenupa ° mitvā bhagavatā pā ° ekānte asthāsi ekāntasthi°.

17. B °rpuṇabharo tu anṛṇa vica° M °pūrṇabhāraṃ anuṇa vica° BM °ke de°. — 18. M °dharma ājñātā bha°. — 19. B °bhāṣitāna gā° M °brahmā gā°. — 20. BM °r-dṛço samaṃga°.

21. M °rakto na dra° B °kāś na ukalpa°

अथ खलु महाब्रह्मा भगवन्तमजपालस्य न्यग्रोधमूले प्रतिभेयं विदित्वा धर्मचक्रप्रवर्तनाये दुःखदौर्मनस्यजातो भगवतः पादौ शिरसा वन्दित्वा भगवन्तं प्रदक्षिणीकृत्वा तत्रैवान्तरहाये ॥

एतमेतं वुच्चति ॥

भगवां उरुविल्वायां विहरति नद्या नैरञ्जनायास्तीरे अजपालस्य न्यग्रोधमूले अचिराभिसंबुद्धो ॥ तेन खलु पुनः समयेन मागधकानां ब्राह्मणगृहपतिकानां इमानि एवंरूपाणि पापकानि अकुशलानि दृष्टिगतान्युत्पन्नानि ॥ वातो न वायेया सरितो न स्यन्दिन्सुः गर्भिणीयो न प्रजायेन्सुः पक्षिणो न वीतिपतन्ति अग्निं ज्वलेया चन्द्रसूर्याणां उद्भमना न प्रज्ञायेन्सुः अंधकारघट्टितो लोकसंनिवेशो भवेय ॥ अथ खलु महाब्रह्मा मागधकानां ब्राह्मणगृहपतिकानां इमान्येवंरूपाणि पापकान्यकुशलानि दृष्टिगतानि उत्पन्नानि विदित्वा अतिकान्तवर्णो अतिकान्तायां रात्र्यां केवलकल्पं अजपालस्य न्यग्रोधमूलं वर्णेनावभासयित्वा येन भगवां तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्तस्थितो इमां गाथां अध्यभाषत् ॥

प्रादुरवोसि समलेहि चिन्तितो
धर्मो अशुद्धो मगधेषु पूर्वं ।
अपावृतं ते अमृतस्य द्वारं
शृण्वन्तु धर्मं विमलानुबुद्धं ॥

अथ खलु भगवां महाब्रह्मणो याचनां विदित्वा सत्त्वं च प्रज्ञायां बोधीये आ-

1. M °hmā bhagavato aja° kāheyaṃ vedi° syajāto bhaga° vṛtantarhāyeḥ | B °antarhā-ye ||. — 4. M etthaṃ v° BM °cyati bha°. — 5. M °gavān ura° B °ti | nadyā° M °ti nadyāṃ nai° B °yāttire° BM °dhe to°.

6. BM °aṃbu vato°. — 7. BM °vāyeyā | (M °yeyaṃ) sarito na syanditeṃsu(M °syaṃti-su) garbhiṇīyo° yatena pakṣiṇi° M °vītipata° BM °adramasūryāṇāṃ u(M °suryyāṇāṃ u)dgamanaṃ na prajñā(B °jñāpa)yetsuḥ andhakāravṛtaṃ lo°. — 10. M °ny evaṃrūpā° M °viditvā atikrāntaṃ tu mahāvarṇo° BM °kevalaṃ kalpaṃ° M °pālasya nyagrodhamūle varṇenāvabhā° B °mule varṇenāvabhā° M °yena bhagavān tena°.

15. B °durabho sa° M °bo samayehi cintito arasa° BM °ddho masa(M °magadhesu pūrvaṃ a°.

17. BM °vṛtaṃ amṛ° M °śṛṇvantu dharmaṃ vi° B °mantu dha° BM °malanubuddhaṃ° M °nubuddhaṃ ||. — 19. M °bhagavato mahābrahmaṇo° B °ye yācanaṃ vidi° M °ditvā satvaṃ° BM °tyāyaṃ bo° B °ntu adrākṣīt | satvā u° M °nto adrākṣīt satva u° BM °hāṃ(M °no) prajñāṃ adrākṣīt sa(M °i | sajvā dṛṣṭvā(M °samuddhṛtā da ° rrajadhīyāṃ adrākṣīt

तेन सर्वावन्तं लोक[364b]मनुत्तरेण बुद्धचक्षुणाभिविलोकयन्तो अद्राक्षीत्सत्वा उच्चावचां हीनप्रणीतां अद्राक्षीत्सत्वा दुराकारा दुर्विनेया दुर्विशोधेया अद्राक्षीत्सत्वा स्वाकारां सुविनेयां सुविशोधेयां अद्राक्षीत्सत्वां उद्घटितज्ञा विपञ्चितज्ञानेया पदपरमां अद्राक्षीत्सत्वां तीक्ष्णेन्द्रियां मृद्विन्द्रियां । सत्वानां त्रयो राशीयः सम्यक्त्वनियतं राशिं मिथ्यात्वनियतं राशिं अनियतं राशिं । सय्यथापि नाम चक्षुष्मां पुरुषो पद्मिनीतीरे स्थित्वा अल्पकिरणेन पश्येय उत्पलानि पदुमानि वा पुण्डरीका वा अन्यानि अन्तोदकानि अन्यानि समोदकानि अन्यानि उदकातो अभ्युद्गतानि एवमेव भगवां अनुत्तरेण बुद्धचक्षुषा सर्वावन्तं लोकमभिविलोकयन्तो अद्राक्षीत् ॥ अथ खलु भगवतो एतदभूषि ॥ देशेयं वाहं धर्मं न वा देशेयं मिथ्यात्वनियतो राशि अभव्यो एतं धर्मं आजानितुं । देशेयं वाहं न वा देशेयं सम्यक्त्वनियतो राशि आजानिष्यति एतं यं देशेयं । अनियतो राशि सचाहं धर्मं देशेयं आजानाति नो चे देशेयं न आजानिष्यति । अथ खलु भगवां अनियतं राशिमारभ्य मागधानां च ब्राह्मणगृहपतिकानां दृष्टिकृतानि पापान्यकुशलानि दृष्टीगतानि उत्पन्नानि विदित्वा महाब्रह्मणो चाभियाचनां विदित्वा असंख्येयकल्पसमुदानीतमुत्पन्नं आत्मनः प्रणिधानं विदित्वा सत्वेषु च महाकरुणां ओकाने-त्वा इमे च मे महेशाख्या देवाधिपतयो लोकेश्वरा उपसंक्रान्ता आर्यधर्मचक्रप्रवर्तनं

durākārāṁ suvine(M °vineyāṁ suviçodheyāṁ(M °dheyā) adrākshit satvāṁ ughāṭita-jñā(M °t | satvā ugghāṭitajñā) vipañcitajñāna(M °citajñāneyā) padaparamāṁ | adrā° M °kshṇendriyāṁ mṛdvīndriyāṁ piddhīndriyāṁ B °ddhindriyāṁ sa°.

4. M °yo rāçiyo sammyakparipataṁ rāçi mithyātvaniyataṁ rāçiṁ āniyataṁ rāçiṁ | B °myaktanibuddhaniyataṁ rāçi mithātvaniyataṁ rāçiṁ | . — 5. B °trā alvakiçarope paçyeta utpalāni padu° M °lpakiçalena paçyanie utpalāni vā padmāni vā pu° BM °rikā vā(B °vā |) anyāni antodakāni anyā(B °kāni anyāni) ma° M °gavān eva ° ntaṁ lokam abhilo° B °ntaṁ lokaṁ abhilokito°.

9¹. B °gavāṁ eta° M °gavataita° B °abhū de°. — 9². BM deçaya vāhaṁ dharmaṁ (B °dhammaṁ) na vā de° B °thyātvaniyataṁ rāçi | abha° M °vyo eako dha° BM °rmaṁ deçayituṁ ājñā° B °taṁ de°. — 10. B deçaya vāhaṁ saṁmyaktaniyata rāçi ājñātum eva etāya yaḥ deçayaṁ ani° M deçaye vāhaṁ dharmaṁ na deçaye samya ° rāçiṁ ājñātum eva etaṁ yaḥ vasarvaṁ ni°.

11. M niya° BM °rmaṁ deçayaṁ ājñ(M °jāniṣyati | nā ca deçayaṁ vā jāniṣyati |. — 12. M °dṛṣṭigatāni utpannāni viditva ma° BM °hābrāhmaṇā cābhiyā ° saṁkhyeyakalpa(M °pe) samudā ° tpannaṁ(M °nnaṁ |) yatah praṇi° M °ditvā sarveshu ° ruṇā a ° ime ca mamaleçākhyā de° B °çvare upa° BM °saṁkrāntā(B °nta) āryaṁ dharma(M °ryaṁ dharmaṁ)cakraṁ pravartanaṁ yācanti | atha° M °gavān mahābrāhma° B °hābrāhma° BM °khehi | ārya(M °ryya)dha° B °cakraṁ pra° BM °nāya ti ya°.

याचन्ति अथ खलु भगवां महाब्रह्मणो अवकाशमकार्षीत् आर्यधर्मचक्रप्रवर्तनाय । ताये वेलाये भगवान्महाब्रह्माणं गाथाये अध्यभाषे ॥

अपावृतं मे अमृतस्य द्वारं
ब्रह्मेति भगवन्तं ये श्रोतुकामा
श्रद्धां प्रमुंचन्तु विहेठसंज्ञां ।
विहेठसंज्ञो प्रगुणो अभूषि
धर्मो अशुद्धो मगधेषु पूर्वं ॥

अथ खलु भगवता महाब्रह्मणो अवकाशे कृते अनुत्तरधर्मचक्रप्रवर्तनाय भूम्या देवा घोषमुदीरयेन्सुः । एषं मारिष भगवता अवकाशो कृतो अनुत्तरधर्मचक्रप्रवर्तनाय । तं [364b] भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यन्ति आसुराः कायाः दिव्या काया अभिवर्धिष्यन्ति । भूम्यानां देवानां घोषं श्रुत्वा चतुर्महाराजकायिका देवा त्रयस्त्रिंशा देवा यामा तुषिता निर्माणरती परनिर्मितवशवर्ती देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः । एषं मारिष भगवता महाब्रह्मणो अवकाशो कृतो धर्मचक्रप्रवर्तनाय । तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यन्ति आसुराः काया दिव्याः काया अभिवर्धिष्यन्ति । इति हि तेन क्षणेन तेन समयेन यावद्ब्रह्मलोकं घोष अभ्युद्गतो ॥

एतमेतं श्रूयति ।

1. BM °bālobhanugaṇaṃ° M °thāye pratyabhā°. — 3. B °hanti | bhagavāṃ ye pratimuṃkā° M °guṇā ye pra° śraddhāya maṃ° B °śraddhā maṃmati | viheṭhanaṃ saṃ° M °viheṭhanaṃ saṃ°.

6. B saṃjñānupūrva kaṃ viheṭhakasaṃjñānupūrva abhāṣi dharmaṃ a° M saṃjñānupūrva kam aśakṣaṇaṃ abhāṣi viheṭhakasaṃjñānupūrva abhāṣi dharmaḥ apu° dha dharmaṃ pūrvaṃ |. — 8. B °prato mahābrahma° M °kṛta ava° BM °bhūmyāṃ de° yetsuḥ |. — 9. M °dha mahābrahmaṇo bha° B °dha brahma° M °ā cakrāya ° rtanāya taṃ°. — 10. BM °ti | bahujanahitāya bahujana M °nahitasukhāya lo° B °iti asurāḥ° M °āsurā kāyāḥ divyā kāyāḥ abhi°.

12. BM bhūmyā (M °myāṃ) devānāṃ° M °yikā devās trayastriṃśa yāmā ° parani° B °parnitya pa° BM °dirayetsuḥ ca ° vayetsuḥ |. — 14. BM etaṃ ma ° bāhobhāna° B °dharmaṃ cakra ° ya taṃ°. — 15. B °ṣiṣyati | bahujanahitāya ba° M °to janakāyā° B °yiṣyati a° M °yiṣyati | āsurā kāyāḥ divyā kāyāḥ a°.

17. BM °ghoṣaṃ abhyu° M °dgataṃ e° B °dgata e°. — 19. B etaṃ arthaṃ śruya° M etam arthaṃ śruya°.

अथ खलु भगवां प्रवर्तनस्य समये केवलरूपा सत्वा आर्यधर्मचक्रं प्रवर्तयन्तीति । ये ते सत्वा पूर्वयोगसंपन्ना भवन्ति ते आर्यधर्मचक्रं प्रवर्तेन्ति । अहं खलु पूर्वयोगसंपन्नो तेनारहाम्यहं आर्यधर्मचक्रं प्रवर्तयितुं । ये ते सत्वा अनुत्तराचारसंपन्ना भवन्ति एवंरूपा सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति । अहं खलु पुनः अनुत्तराचारसंपन्नो अरहाम्यहं आर्यधर्मचक्रं प्रवर्तयितुं । ये ते सत्वा निवासानुत्तर्यसंपन्ना भवन्ति एवंरूपा सत्वारार्यधर्मचक्रं प्रवर्तेन्ति । ये ते सत्वा आर्येषिका भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति । ये ते सत्वा च्युतिसंपन्ना भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति । ये ते सत्वा गर्भावक्रान्तिसम्पन्ना भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति । ये ते सत्वा गर्भस्थितिसम्पन्ना भवन्ति ये ते सत्वा जातिसम्पन्ना भवन्ति ये ते सत्वा लक्षणसंपन्ना भवन्ति ये अनुव्यंजनसम्पन्ना भवन्ति ये कुशलसंपन्ना भवन्ति ये धृतिसंपन्नाः स्मृतिसंपन्नाः ये मतु[365a]परिचितधर्मसंपन्नाः ये कुशधर्मसम्पन्नाः ये लोके ज्येष्ठा भवन्ति ये लोके लोकप्रविचयसम्पन्नाः सत्कारसंपन्ना भवन्ति ये स्थानं च स्थानतो अस्थानं चास्थानतो सम्यक्प्रज्ञया प्रजानन्ति ये सर्वत्रगामिनीप्रतिपदां त्रयत्रगामिनीप्रतिपदं यथाभूतं सम्यक्प्रज्ञया प्रजानन्ति ये नानाधातुकं च लोके अनेकधातुकं च लोके यथाभूतं सम्यक्प्रज्ञया प्रजानन्ति ये परसत्वानां परपुद्गलानां इन्द्रियवीर्यविमात्रतां यथा-

1. BM °bhagavāṃ pra(M °vāṃ pra)vartanasya° M °ste samaye kevalarū(M °kevalarūpā° M °pravartanti | aham° (l. 4°). — 2°. B °pūrvaṃ ye ° bhavanti | evaṃrūpā satvā ārya-dharmacakraṃ pravartayantīti || ye ca satvā pūrvayogasaṃpannā bhavanti te ārya-dharma°. — 3°. M °hi pūrva° BM °saṃpanno 'rhāmy aham 3(M °rhāmy ahaṃ 4°. — 3. B °ahaṃ saṃ° M °ro saṃpannā° BM °vanti | a°. — 4. M °punar anuttarā° B °caḥ anuttarā° BM °punaḥ aro° M °caracakrapra°. — 5. B °ttarārya ° bhavanti | e° M °pravartanti | .

6. M °evaṃrūpā satvāḥ āryyadha° B °pravartanti | . — 7. M °rūpā satvāḥ āryya° B °pravartanti | . — 8. M ye te satvāḥ ga ° krāntisa° B °bhavanti | e° M °bhavanti | evaṃrūpāḥ satvāryya° BM °dharma°. — 9. BM °sthitisam(M °saṃ)pannā bhavanti | ye te satvā jātisaṃ(M °saṃ)pannā bhavanti | ye te satvā lakṣaṇasaṃpannā bhavanti | ye (M °ye te satvā) anuvyañjanasaṃ(M °saṃ)pannā bhavanti | ye (M °ye te satvā) ku° M °śalasaṃpannā bhavanti | ye te satvā dhṛti ° smṛtidharmasaṃpannāḥ ye devikṛtadharmasaṃpannāḥ ye° B °jyā bhavanti | ye loke lokapravi° M °vicayasaṃpannāḥ satva° BM °sarasaṃpannā(M °nnāḥ) bhavanti(B °nti |) ye sthānaṃ(M °sthānaṃ) ca sthānato asthānaṃ ca(M °sthānaṃ ca)sthānato samyakprajñāya prajānanti | ye sarvatragāminīpratipadāṃ(M °dāṃ) tatratatragāminī(M °nīṃ) pratipadāṃ yathābhūtaṃ samyakprajñāya prajānanti | ye nānādhātukaṃ(M °kaṃ) ca loke anekadhātukaṃ ca (B °ca loke) ya ° jānanti | ye parasatvānāṃ parapud(M °pudgalā° B °vīryaṃ vimātratāṃ ya° M °vīryaṃ vaimātratāṃ ya ° taṃ samyakprajānāti | te evaṃ dha°.

भूतं सम्यकप्रजानन्ति ते एव धर्मचक्रं प्रवर्तेन्ति । ये नानाधिमुक्तिका च लोके अनेकाधिमुक्तिका च लोके यथाभूतं सम्यकप्रज्ञया प्रजानन्ति ते एव धर्मचक्रं प्रवर्तेन्ति । ये ते सत्वाः सर्वेषां कर्मणां कर्मसमादानानां अतीतानागतानां प्रत्युत्पन्नानां कृतानामुपचितानामविपक्वानां विपाकमप्रत्युपस्थितानां आयतिविपाकवैमात्रतां यथाभूतं सम्यकप्रजानन्ति ते एव धर्मचक्रं प्रवर्तेन्ति । ये ते सर्वेषां ध्यानसमाधिविमोक्षसमापत्तीनां च संक्लेशव्यवदानं यथाभूतं संप्रजानन्ति ये दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेन सत्वां पश्यन्ति च्यवन्तां उपपद्यन्तां सुवर्णां दुर्वर्णां सुगतां दुर्गतां हीनां प्रणीतां यथाकर्मोपगां सत्वां संप्रजानन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति । ये अनेकविधं पूर्वनिवासं समनुस्मरन्ति ये आस्रवाणां क्षयादनास्रवां चेतोविमुक्तिं प्रज्ञाविमुक्तिं च यथाभूतं संप्रजानन्ति ये चापि दीर्घायुष्का भवन्ति आजीवसंपन्ना भवन्ति शीलसंपन्नाः समाधिसंपन्ना विमुक्तिसंपन्ना विमुक्तिज्ञानसंपन्ना भैषज्यसंपन्ना महाकरुणाप्रतिलाभसंपन्ना बोधिसंपन्नाः चेतःपर्यायसंपन्नाः ऋद्धिप्रातिहार्यसंपन्ना आदेशनाप्रातिहार्यसंपन्ना अनुशासनीप्रातिहार्यसंपन्नाः सर्वकुशलधर्मसमन्वागता ये चार्थप्रतिसंविद्प्राप्ता धर्मप्रतिसंविद्प्राप्ता निरुक्तिप्रतिसंविद्प्राप्ताः प्रतिभानप्रतिसंविद्प्राप्ता ये चार्यपंचांगिकसमाधि[365b]संपन्नाः पंचज्ञानिकसमाधिसंपन्ना आर्यमहापंचांगिकसम्यक्समाधिसं-

1. B ye nānādhi° muktā°dhi° BM °taṁ saṁmya° M °k prajānanti te evaṁ dha° B °nanti | te° M °kraṁ mira° B °vartanti ye°. — 3. M ye te satvā sa° B °karmāṇāṁ °dāyanānāṁ atī° M °tānāṁ atī° BM °hitaṁ saṁmya° M °nanti | tam evaṁ dha° B °te evaṁ dharmaca°. — 5. B °dhyānasamādhiṁ vimo° M °dhyānakṣānasamāpattīnāṁ ca saṁkle° B °tīnāṁ ca saṁkleṣaṁ vya° M °dāne yathā° BM °taṁ saṁprajānanti | ye di° M °kena satvā paśyanti cyavamānā u° BM °suvarṇṇā(M °rṇā) durvarṇṇāṁ° M °hīnāṁ praṇītāṁ prapī° gāṁ satvā saṁ° B °jānanti | e° M °rūpā sa° BM °pravarttanti | .

9. BM °smaranti | ye ā° M °pravāṇāṁ kṣa° BM °vāṁ cetovimukti prajñā° B °jānanti | ye cā° ābā bhavanti | āji° BM °jīvasaṁpannāḥ sa° M °mādhisaṁpannāḥ vimuktisaṁpannāḥ vimuktijñānadarśanasaṁpannāḥ mahākaruṇāsaṁpannāḥ ma° saṁpannāḥ ke° cetopa° BM °nnāḥ riddhiprātihāryasaṁpannā(M °nnāḥ) ā° M °ryasaṁpannāḥ anu° B °dharmasamanvāgata° BM °pratisaṁvi(M °saṁpaya)vidaprāptā(M °ptāḥ)° M °daprāptāḥ ni° BM °pratiprativaṁ° bhāna(M °bhāva)pratisaṁvida(B °daṁ)prāptā | M °prāptāḥ ye cāṅgikasa° BM °dhisaṁpannāḥ pañ° M °dhisaṁpannāḥ āryya° BM °āṅgikasya samyakaa(M °kasmāa)nā° M °dhisaṁpannāḥ ye° BM °ye rūpyā(M °ye rūpya)samādhipañcāṅgikasya saṁmyaka° M °dhisaṁpannāḥ kalasamya° BM °abhyo ana(B °anubhāvaty° arthe° M °rpākārayaṁ saṁpannāḥ yaṁ pratibalā pa° B °sapannā | yaṁ pratibalasaṁpannāḥ paraṁ hitaṁ vipā° BM °ucchedo vikartanaṁ° M °kāraṇāpātāḥ° BM °ye nigra(M °yre)pratibalā(M °bālā) pare° M °khānupavāsinā prabhāvaṁ | evaṁrūpā satvā āryya° dha° B °kraṁ pravarttati | .

पन्ना ये चाप्यार्यमहापर्यवदानिकसम्यक्समाधिप्राप्ताः शीलसंपन्नाश्च इन्द्रियसंपन्नाश्च चारित्रसंपन्नाश्च ये चापि पौरिषे भावाये समन्वागता विसदृशेये अनेकवाये चर्याय विज्ञापनीये समन्वागताः प्रज्ञप्ताकरणेन सम्पन्ना ये प्रतिबलाः परेषां वैशारद्ये पि स्थेयं विकर्तुं प्रतिबलाः परेषां अहितैषिणां सह धर्मेण निग्रहीतुं ये प्रतिबला परेषां सुखानुप्रदानं प्रदातुं एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति । ये ते सत्वाः सर्वबुद्धधर्मेहि समन्वागता भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तेन्ति ॥ अहं खलु पुनः सर्वबुद्धधर्मेहि समन्वागतो अरहाम्यहं धर्मचक्रं प्रवर्तयितुं ॥

अथ खलु भगवां इममेवरूपमात्मनो गुणसमादानं विदित्वा एतदभूषि ॥ यं नूनाहमार्यमनुत्तरं धर्मचक्रं प्रवर्तयेयं । को नु खलु मे प्रतिबलो प्रथमं धर्मं देशितं आजानितुं न च मे विहिंसये यमिदं धर्मदेशनाये ॥ अथ खलु भगवतो एतदभूषि ॥ उद्रको रामपुत्रो शुद्धो अल्परजो अपरोक्षजातीयो सो च दूरगतो अतिकालगतो नैवसंज्ञानासंज्ञायतनसहव्रताये धर्मं देशयति । अथ तत्राहं भगतो उद्रको रामपुत्रो महाहानिरुद्रको रामपुत्रो ॥ कतमो पि खल्वन्यो पि सत्वो शुद्धो अल्परजो अपरोक्षजातीयो यो मे प्रतिबलो प्रथमं धर्मं देशितमाजानितुं न च मे विहेठेया यमिदं धर्मश्रवणाय ॥ आराडो कालामो शुद्धो अल्परजो अल्परजस्कजातीयो यो मे प्रतिबलो प्रथमं धर्मं देशितमाजानितुं न च मे विहेठये यमिदं धर्मश्रवणाय । महाहानिराराडस्य अद्य त्र्यहं कालगतो आराडो कालामो ॥ कतमो पुनरन्यो पि सत्वो शुद्धो अल्परजस्कजातीयो यो मे प्रतिबलो प्रथमं धर्मं देशितमाजानितुं न च मे विहेठये यमिदं धर्मश्रवणाय ॥ अथ खलु भगवतो एतदभूषि ॥ पंचका भद्रवर्गीया शुद्धा अल्परजा अल्परजस्कजातीयाश्च

6. B °ddhadharmahi ° bhavanti | e° M °rūpā satvāḥ ārya ° vartimsu | . — 7. M °putaḥ a° B °cakra pra° M °vartitum | B °taṁ a°. — 8°. M °gavān i° BM °imām evarūpaṁ ātma°. — 9. B °maṁ dharma deçi° M °çayeyaṁ | . — 10. B °ahi u°.

11. M uddako rāmapu° B °ka rāmapu° M °tīyo sa ° naivasaṁjñāyatana saha°. — 12. M adya saptāhaṁ kālaṁ gataṁ uddako rāmaputro mahā ajānu uddako rāmaputro B °to udrako rāmaputro mahājjāno udra rāmaputro ka°. — 13. B katamo'pi kha° M katamo pi khalvanyaḥ pi satvā çu° B °nyo pi satvā çu° BM °tīyo me° M °maṁ dharma deçitaḥ ājā° BM °heṭhayā° B °çramaṇāya | . — 15. M ārāḍo kā° BM °mo çuddho ° lparasko° B °tīyo | yo me° M °maṁ dharmam ājā° B °çitam ājā° M °ṭhaye yadim i ° çramaṇāya B °çramaṇāya ma°.

17. B mahājjāno ārāḍa° M mahāhāniṁ ārāḍa° BM °tryaha kāla° B °ārāḍo kālā° BM °mo ka°. — 18. M °punaḥ anyo pi ° lparaskajā° B °maṁ dharma deçi ° ṭhaye yadim i ° çramaṇāya | . — 19. B °ahi paṁ°. — 20. M °dravargiyā çu° BM °ddhā alparajā alparaska(B °jā alparajaska)jāti ° hala pratha° B °taṁ na (f° 366°) na ca ° yataḥ yam i° M °yataḥ | yam i° B °çramaṇāya | .

ते प्रतिबला प्रथमं धर्मं देशितं आजानितुं [366ᵃ] न च मे विहेठयेन्सुः इममिदं धर्मं देशयन्तं । पूर्वमेव दुष्करं चरन्तं अनुबंधेन्सुः । ते च वाराणस्यां विहरन्ति ऋषिपतने मृगदावे ॥ यं नूनाहं वाराणसीं गत्वा वाराणस्यां ऋषिपतने मृगदावे पंचकानां भद्रवर्गियानां प्रथमं धर्मं देशयेयं ॥

अथ खलु संबहुला महेशाख्या शुद्धावासकायिका देवा येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासुः । एकान्तस्थिताश्च भगवन्तमेतदुवाच ॥ यं भगवतो चेतसा चित्तं अभिज्ञातं परिज्ञातं प्रतिबलाश्च पुनर्वयं भगवतो विविधानि विचित्राणि मार्गशोभानि कर्तुं । येन भगवानितो बोधितो वाराणसीं गमिष्यति ऋषिपतनं मृगदावं अनुत्तरं धर्मचक्रं प्रवर्तयितुं ततो वयं भगवतो यावच्च बोधिं यावच्च वाराणसी मार्गं प्रतिजागरिष्यामः समं असमविषमं पाणितलजातं विततवितानं चित्रदूष्यपरिक्षिप्तं ओसक्तपट्टदामकलापं सिक्तसम्मृष्टं धूपितधूपनं मुक्तपुष्पावकीर्णं सुवर्णवालिकासंस्तृतं दिव्यमुक्ताचूर्णसंस्तृतं दिव्यस्फटिकचूर्णसंस्तृतं दिव्यमुसारगल्वचूर्णसंस्तृतं दिव्यलोहितिकाचूर्णसंस्तृतं । तत्र च वयं भगवं मार्गे यावच्च बोधिर्यावच्च वाराणसी दिव्या ताम्रपर्णियो अभिनिर्मिनिष्यामः अच्छा समा सैकता सुखोपनीता चित्राणि दर्शनीयानि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितिकाया । तत्र च वयं भगवं मार्गे यावद्बोधितो दिव्यायो नदीयो

1. BM °bandhetsuḥ (M °taṃ). — 2. B °nti | pū° M °ṛṣipatane° BM °ve yaṃ°. — 3. M °ṛṣipatane api° B °dharma de°. — 5. M °hulā maheśākhyā ca °vāsikā devā yena bhagavāṃs teno° gamaṇo pā° °sthāsuḥ e° B °sthātsuḥ e°.

6. M °sthitā te bha°. — 7. BM yaṃ bhagavato (M °to)cetasāce abhijñāya parijñātaṃ pra° B °citrāṇi mārga° °vyāni kartuṃ ye°. — 8. BM °ayāṃ (M °sīṃ) gamiṣyati | ṛṣipata-(M °na)naṃ ° taṃ | tato (M °taḥ) va° M °vato yāvaca vārāṇasīṃ mārgaṃ ° BM °maḥ | samaṃ asamaṃ viṣamaṃ pāṇitala (M °laṃ) jātaṃ ° tadoṣya ° ocapta (M °ṣakta) paṭṭa ° siktasaṃmṛṣṭa (M °saṃmṛṣṭaṃ) dhūpita (B °taṃ) dhū° M °svarṇavālikāsaṃskṛtaṃ divyamuktāvakīrṇaṃ saṃskṛtaṃ divyasphaṭikacūrṇaṃ saṃskṛtaṃ divyamusāragalva° B °likāsaṃskṛtaṃ divyamuktācūrṇasaṃskṛtaṃ °ṭikacūrṇasaṃskṛtaṃ °musāracūrṇasaṃskṛtaṃ° M °lohitikaṃ° B °hitakacūrṇasaṃskṛtaṃ | .

14. M °bodhī yāvaca vārāṇasīya divyāḥ tāmrapattikāya abhi° B °yaṃ yā divyā ° hiyā abhinirmitasaṃskṛtaṃ divyamuktācūrṇaṃ saṃskṛtaṃ divyasphaṭikacūrṇasaṃskṛtaṃ divyamusāracūrṇasaṃskṛtaṃ divyalohitikacūrṇasaṃskṛtaṃ tatra ca vayaṃ bhagavaṃ abhi° M °rmiṇiṣyāmaḥ ci° B °maḥ | acchā ° vaiḍūryya° M °tikāyāḥ | .

17. M °yaṃ mārga° B °vaṃ yaṃ mārga° M °bodhito di° B °vyāyā nadī° M °rmiṇiṣyāmaḥ | acchāṃ samā° B °maḥ | acchā samā sukha sukho° BM °tīrā oṭarapraṇa (B °ṇaṃ) ... śilā° B °saṃskṛtā° M °tparapadma° BM °karapāla (B °pāṇa) kapāla (M °pāḍa) ... kābha° B °vyaktitāmaga° M °dinnopabhuktāḥ pravarāḥ.

अभिनिर्मिनिष्यामः अच्छा समा सैकता सुखोपनीता सुवर्णवालुकासंस्तृता उत्पलपद्मकुमुदपुण्डरीकनलिनीसौगन्धिकआम्रजम्बुकदम्बपनसनारिकेलपालेवतलकुचद्राक्षिमर्वृद्दिकप्रच्छन्ना । तत्र च वयं भगवन्तमार्गे यावच्च बोधियावच्च वाराणसी दिव्यानि छत्राणि अभिनिर्मिनि[366b]त्वा दिव्यानि ध्वजानि अभिनिर्मिनिष्यामः । दिव्यानि कूटागाराणि अभिनिर्मिनिष्यामः चित्राणि दर्शनीयानि सप्तानां रत्नानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फाटिकस्य मुसारगल्वस्य लोहितिकाया ॥ भगवतो गच्छन्तस्य गमिष्यन्ति तिष्ठन्तस्य तिष्ठन्ति पुरतो च वर्षवलाहका देवपुत्रा दिव्यानि पुष्पाणि प्रावर्षिष्यन्ति मन्दं मन्दं च देवा प्रसारयिष्यन्ति ॥

भगवति बोधितो वाराणसीमृषिपतनं मृगदावं प्रस्थिते अनुत्तरं धर्मचक्रं प्रवर्तयितुं सुवर्णवासेहि देवेहि मार्गो प्रतिजागृतो । महतीं चतुरंगिनीसेनामभिनिर्मिणित्वा महान्तं हस्तिकायं महान्तमश्वकायं रथकायं पत्तिकायं भगवन्तं वाराणसीं गच्छन्तं पुरस्करेन्सुः ॥ यावत्सुवर्णानामधिपतयो सुवर्णराजानो अण्डजा वा जरायुजा वा औपपादुका वा संस्वेदजा वा ते महान्तं चतुरंगिनीसेनां ऋद्धीये अभिनिर्मिणित्वा भगवन्तं गच्छन्तं पुरस्करेन्सुः । याव नागानां नागाधिपतयो नागराजानो अण्डजा वा जरायुजा वा संस्वेदजा वा औपपादुका वा ते महतीं चतुरंगिनीसेनामृद्धीये अभिनिर्मिणित्वा भगवन्तं वाराणसीं गच्छन्तं पुरस्करेन्सुः । चतुर्महाराजिका देवा त्रयस्त्रिंशा यामातुषिता निर्माणरति परनिर्मितवशवर्ति ब्रह्मकायिका देवा महान्तं चतुरंगिनीसेनामृद्धीये अभिनिर्मिणित्वा भगवन्तं काशिं गच्छन्तं पुरस्करेन्सुः ॥ अथ खलु भगवां महतीये परिषाये अनेकशताये अनेकसहस्राये अनेकशतसहस्राये पुरस्कृतो परिवारितो उरुविल्वातो गयां गच्छति गयातो अपरगयां गच्छति ॥ अपरगयायां सुदर्शनो नाम नागराजा । तेन भगवां

3. M °ṇṇa yāvacca bodhi yāvacca vārāṇasīṁ di° B °cchyanti di° M °ṇyāṇi cchatrāṇi abhinirmiṇitvā divyāṇi dhva° nirmiṇiṣyāmaḥ di°. — 5. B °kūṭāṇi° M °nirmiṇiṣyāmo ci° B °nāṁ | ci° M °tikāyāḥ B °tikāyā bha°.

7. M °vabaraṇiko° kiriṣyanti | mandaṁ ma° B °sāpayiṣyanti | . — 9. B bhagavantaṁ bo° M bhagavātaṁ bo° °ṇasīṁ ṛṣipatane mṛ° B °patane mṛ° BM °dāve prasthito anu° tadā | su° B °mārgo parijāgṛto | M °mārge pra°. — 10. B °raṅginī se° M °senāṁ abhi° B °stikāyaṁ mahanta° tikāyaṁ || bha° M °retsuḥ | B °retsuḥ yā°.

12. M °senāṁ suvarṇṇaṁ adhi° B °dukā vā te ma° M °mahantāṁ ca° ddhīye ṛddhīye ° santaṁ kāśiṁ ga° B °skaretsuḥ | . — 15. M passe les phrases 15 et 17. B yā ca nāgānāṁ° B °retsuḥ | .

17. B °hārājakā devā tra° senā ṛddhī° retsuḥ | . — 19. BM °hatīnīye pariṣā(M °ṣā)ye anekaçatā° skrita(M °skṛtāye) parivāritā uruvilvāto gayāṁ gacchanti gayāto a° M °cchanti | B °cchati apa°.

21°. BM rājā te°. — 22°. B °ntrito la° M °ntrito | .

अपरगयायां वासेन भक्तेन च निमन्त्रितो ॥ तहिं भगवां सुदर्शनस्य नागराज्ञो भवने वसित्वा कृताहारो वसालां गच्छति ॥ वसालायां नन्दी नाम ब्राह्मणः कुण्डकपालिको वसति । सो भगवन्तं गच्छन्तं अपसव्यीकरोति च कुहनानि च करोति ॥ भगवां एतस्मिं वस्तुस्मिं एतस्मिं निदाने एतस्मिं प्रकरणे तायं वेला[367]यं इमं उदानमुदानये ॥

यो ब्राह्मणो वाहितपापधर्मो
निहुहुंको निष्कषायो यतात्मा ।
क्षीणास्रवो अन्तिमदेहधारी
धर्मेण सो ब्राह्मणो ब्रह्मवादं वदेय ॥

वसालायामन्यतमो गृहपतिः भगवन्तं वासेन च भक्तेन च निमन्त्रेति । तहिं भगवां वुत्थो कृतभक्तकृत्यो वसालातो चुन्दद्वीलं नाम अधिष्ठानं गच्छति ॥

अद्राक्षीत् उपको आजीवको भगवन्तं दूरतो येवागच्छन्तं दृष्ट्वा च पुनर्येन भगवांस्तेनोपसंक्रमित्वा भगवता सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारयित्वा एकान्ते व्यादेकान्तस्थितः उपको आजीवको भगवन्तमेतदुवाच ॥ परिशुद्धो भगवतो गौतमस्य छविवर्णो परिशुद्धो पर्यवदातो विप्रसन्नं च मुखवर्णं । भव्यदापि नाम तालस्य पक्वस्य संप्रति वृन्तच्युतस्य बन्धनाश्रयो परिशुद्धो भवति पर्यवदातो अपीतनिर्भासो च एवमेव भगवतो गौतमस्य छविवर्णो परिशुद्धो पर्यवदातो विप्रसन्नो च मुखवर्णो अथ भगवता गौतमेनामृतं

1. M °gayāṃ vāsena bhaktena ca nimantrito° BM °cchati ca°. — 2. M vasālāyāṃ° BM °brāhmaṇaḥ (M °ṇo) kuhako [illegible] va°. — 3. B °savyakaroti kuhakaṃ ti ca° M °vyīkaroti | kuhanti ca karoti |. — 4. M °gavāṃ etasmiṃ vastusmiṃ etasmiṃ nidāne°.

6. B °bāhitapāpadharmo nihuhuko nikkasāyo | yadātmā kahi° M °dharmaḥ nihuhukā nikkāsāyo | yata ātmā kahi°. — 8. M °dhārī dhe° B °brāhmaṇa bra° M °brahmavādaṃ°. — 10. M vasālā° B °apake me gṛ° M °patir bhaga° B °gavanta vāse° M °nimantrita B °nimantrito ta°. — 10. BM °gavāṃ va(M °vān va)uttā kṛtabhakta(M °kta)kṛtyo° M °vasālāto cundadvīlaṃ nā° BM °nāmam adhi° [illegible].

12. M °kṣīd upako ājīvako bhagavantaṃ dūrato evā | gaccha° r yena bhagavāṃ tena° gavatā sārdhaṃ° B °daniyāṃ gāthāṃ saṃ° BM °yāṇī sārāyaṇīyāṃ kathāṃ vya° M °sthito upako ji° B °jīvanto bha° M °m etad avocat |. — 15. M °gautamasya chavivarṇṇo pa-ryo° B °chavivarṇo°.

16. BM °pratibandhano cyutasya vṛkṣāt(M °vṛkṣā)yo° B °ti | parya° BM °evam evaṃ (B evaṃ eva) bhagavato gauta(M °ta)masya chavivarṇo(M °varṇā) pari° B °prasanno ca° M °prasanno ca mu° BM °khavarṇaḥ(M °ṇo) ca adhi bha° M °gautamenādhigataṃ adhi° BM °gataṃ amṛtavidi(B °vigi) vā mārgo |.

अधिगतं अमृतगामी च मार्गो ॥ एवमुक्ते भगवानुपकं आजीवकं एतदुवाच ॥ अमृतं मे उपक अधिगतं अमृतगामी च मार्गो ॥ एवमुक्ते उपको भगवन्तमेतदुवाच ॥ कहिं ते भो गौतम ब्रह्मचर्यमुष्यते ॥ एवमुक्ते भगवानुपकं आजीवकं गाथाये अध्यभाषे ॥

सर्वाभिभू सर्वविदो हमस्मि
सर्वेहि धर्मेहि अनोपलिप्तो ।
सर्वंजहो तृष्णाक्षये विमुक्तो
स्वयं अभिज्ञाय किमुद्दिशेयं ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ अनाचार्यो भगवां गौतमो प्रजानासि ॥ अथ खलु भगवानुपकं आजीवकं गाथाये अध्यभाषे ॥

न मे आचार्यो अस्ति कश्चित्सदृशो मे न विद्यते ।
एको स्मि लोके संबुद्धो प्राप्तो संबोधिमुत्तमां ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ अर्हन्ति भगवां गौतमो प्रजानासि ॥ अथ खलु भगवानुपकं आजीवकं गाथाये अध्यभाषे ॥

अहं हि अरहा लोके अहं लोके अनुत्तरः ।
सदेवकस्मिं लोकस्मिं सदृशो मे न विद्यते ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ जिनो ति भगवां गौतमो [367b] प्रजानासि ॥ अथ खलु भगवानुपकं आजीवकं गाथाये अभाषे ॥

जिना हि मादृशा भोन्ति ये प्राप्ता आस्रवक्षयं ।
जिता मे पापका धर्मा तस्मादहं उपक जिनो ॥
पौण्डरीकं यथा वर्णं अम्भे न प्रलिप्यते ।

1. M evaṃ u° B °kaṃ ji°. — 3². M °gauttamo brahmacaryyo uṣyate |. — 3³. M atha khalu bha°. — 5. M °vavido° BM °ham asmiṃ sa° pto sa°.

7. BM °kto haṃ a° B °ddiśeyya | M °yeya |. — 9². M °upako ji°. — 9³. B °cāryo bhavāṃ° M °gauttamo°. — 10. M °gavāṃ upa° B °pakaṃ aji°.

11. B na te ā° BM °sti manasva| M °vidyate e°. — 12. B ekasmiṃ eva lo° M ekasmiṃ ekaloka saṃbuddho loke prāptā saṃbo° B °ddho lokaprāptā saṃbodhir uttamā | M °ttamā. — 13². M arhan iti bhagavāṃ gauttamo°. — 14. M °thāye 'dhya°. — 15. B ahaṃ aho loke ahaṃ loke anu° M ahaṃ araho loke ahaṃ loke anuttaro |.

16. M °lokasmiṃ°. — 17². M °gauttamo°. — 18. M °upakam āji° thāye 'dhya°. — 19. B jine hi tādṛ° M jino hi sādṛśā bho°. — 20. M °d aham upa° B °ka jine |.

21. M paṇḍa ° arepa parilimpyate | B °mpaṃ ca parpyate |.

एवं लोके न लिप्यामि तस्मादहं उपक जिन: ॥
अभिज्ञेयं अभिज्ञातं भवितव्यं च भावितं ।
प्रहातव्यं प्रहीनं मे तस्मादहं उपक जिनो ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ क्वहि भगवां गौतमो गमिष्यसि ॥ अथ खलु भगवां उपकं आजीवकं गाथाये अध्यभाषे ॥

वाराणसीं गमिष्यामि आहनिष्यं अमृतदुन्दुभिं ।
धर्मचक्रं प्रवर्तयिष्यं लोके अप्रतिवर्तियं ॥
यो मे धर्मो अधिगतो विरागोपक्रमो शिवो ।
तमहं प्रवर्तयिष्यामि हिताय सर्वप्राणिनां ॥
ये चाप्यतीता संबुद्धा ये च बुद्धा अनागता ।
ये चैतरहिं संबुद्धा बहूनां शोकनाशका ।
धर्मं देशेन्ति सत्वानां बुद्धानां एषा धर्मता ॥

देवता अन्तरीक्षे गाथां भाषन्ति ॥

यो एकरूपं नरदम्यसारथिं
बुद्धा महर्षिं परिवर्जयेय ।
हस्तेहि पादेहि च सो महागिरिं
प्रणामयेय अतीवमार्गं ॥

कुन्दद्वीपायां कुन्दो नाम यक्षो ॥ तेन भगवां स्वके भवने खाद्येन च भोज्येन च निमन्त्रितो ॥ भगवां कुन्दस्य यक्षस्य भवने एकरात्रोषितो कल्यमेवोत्थाय सारथिपुरे लोहितवस्तुकं गच्छति ॥ लोहितवस्तुके कम्बलको नाम नागराजो । तेन

1. BM °lipyāmi° M °jina ‖. — 2. BM abhijñeya abhijñātaṁ nave bhāvyaṁ ca bhāvitaṁ ‖. — 4ᵃ. M °bhagavān gautamo°. — 5. M °gāthāṁ upakaṁ āji° yo adhya°.
6. M °ābhahaṁ B °āhahaṁ ‖. — 9. M tad ahaṁ°. — 10. M °gatā ‖.
11. B ye ca tahiṁ ca saṁ° M °antarā ca saṁbuddhā ba° B °nāyako ‖ M °nāyakaḥ ‖. — 12. BM °deśenti ha° M °dehināṁ buddhānāṁ eṣa dharmatā ‖ B °nāṁ evaṁ ekaṁ ca dha°. — 13. M °gāthāṁ adhyabhāṣati ‖ B °akṣaṁ devatā ‖. — 14. BM yo mara° pena naradevaṁ(M °radamya)sārathi dṛṣṭi° buddhā pari° yeyaṁ ‖.
16. B hastehi ca pā° M °dehi ca mahā° BM °mahaṁ atiramaṁ(B °mātra) ‖. —
18ᵃ. M kimpuparivṛtyānaṁ vande° B °ummadaṁ° BM °kaho te°. — 18ᵇ. M °gamā naka°
BM °nitila bhaga°. — 19. M °tena kalai° B °ṭha ahaṁ° bhagavāṁ anupatanena te°
M °pura bhagavān anupura bhagavān anupatanena lohitavastukaṁ gacchati B °gacchanti
te°. — 20ᵃ. M °rājño te° B °jo te°. — 20ᵇ. M °gamā mukha° B ° evaṁ bhakta°.

भगवां स्वके भवने वासेन च भक्तेन च निमन्त्रितो ॥ तत्रापि भगवां एकरात्रोषितो कृतभक्तकृत्यो रोहितवातो गन्धपुरं गच्छति ॥ गन्धपुरे गन्धो नाम यक्षो प्रतिवसति । तेन भगवां स्वके च भवने वासेन च भक्तेन च निमन्त्रितो ॥ तत्रापि भगवानेकरात्रोषितो कृतभक्तकृत्यो सारथिपुरं गच्छति ॥ सारथिपुरे भगवां चन्द्रतरेण गृहपतिना वासेन च भक्तेन च निमन्त्रितो ॥ तत्रापि भगवां एकरात्रोषितो कृतभक्तकृत्यो सारथिपुरातो गंगातीरमनुप्राप्तो ॥ नाविको दानि चाह ॥ देहि तरपण्यं ॥ भगवानाह ॥ कुतो मम समलोष्टुकांचनस्य अपगतजातरूपरजतस्य तरपण्यं ॥ नाविको चाह ॥ यदि [368a] मे देहि तरपण्यं तरोहसि अथ न ददासि न तरोहसीति ॥ भगवानाह ॥

को हंसो नर्मदातीरे नाविकं परिपृच्छति ।
स्वकेन बाहुवीर्येण हंसो तरति नर्मदां ॥
इति वदित्वान संबुद्धो हंसराजेव पक्षिणे ।
गंगाया तीरे अस्थासि ओघतीर्णो महामुनि ॥

भगवा दानि गंगामुत्तीर्णो वाराणसीमनुप्राप्तः । संखमेधीय अस्थासि भगवां कालं आगमेति वाराणस्यां पिण्डाय चरितुं ।

न हि विकाले विहरन्ति बुद्धा
काले तु पिण्डाय चरन्ति ग्रामे ।
विकालचारीहि भवन्ति संगा
तस्माद्विकाले न चरन्ति बुद्धा ॥

ऋषिपतने पंचका भद्रवर्गीया विहरन्ति आज्ञातकौण्डिन्यो अश्वकी भद्रको

1. M °tre tiṣṭhito | tatrāpi bhagavāṃ kṛtabhaktakṛtyo rohi ° ndhapuraṃ gacchanti | . — 2. M gandhapure° B °ū te°. — 3¹. M °gavān svake ° sena ca bhakte°. — 3². B °gavān ekarā° M °ekarātroṣito kṛtabhaktakṛtyo sārathipurāto° (l. 6). — 4. B °ktena ca mantrito | . — 5. B °ṣito kṛtabhakto kṛtyo°.

6. B udarcitto° M udagracitto° B °bhūta abhibhūya pri°. — 7. BM °to prāmo° M °dya-apraṇita santikaṁ° B °bahu bhikṣuṁ nirvāṇasya santike | . — 8. M °na bahuçrutena°. — 9. BM atha vā samā° M °lābhena prānta çayyāsa°. — 10. B spṛçeya nai° M spṛçeya nai°.

11. B °pte apra°. — 12. B bhikṣuṁ na tā° M bhikṣaṇaṁ tā° °yāvatā ca bhi° B °yāvatā bhi° BM °bhikṣate paraṁ | . — 13. B °dharmaṁ sa° bhikṣuṁ bho° M °bhavati na°. — 14. M °māṁ pā° brahmacaryaṁ vā | B °brahmacaryaṁ vā | . — 15. M niççreṇī° °yāṁ carve bhi° B °vai bhi ti va°.

16. B yataṁ careya tam tiṣṭheya tam āseya taṁ çayeya | M yattaṁ careya taṁ tiṣṭheyaṁ āseyaṁ çayaṁ | . — 17. B taṁ samiñjayeya kāyo yataṁ kāyaṁ pra° M taṁ samiñjitaṁ kāya taṁ ca kāye pra° B °raye ya°. — 18. B yataṁ cari yatasevo aiyā yatā saṁ° M yato cāṅkamaçīvaṁ saṁ° dhyāyī apramattā | apra° B °dhyāyī | apra° BM °tto a°.

अध्यात्मरतो समाहितो
एको संतुषितो तमाहु भिक्षुं ॥
चक्षुषा संवरो साधु साधु श्रोत्रेण संवरः ।
घ्राणेन संवरो साधु साधु जिह्वाय संवरो ॥
कायेन संवरो साधु मनसा साधु संवरः ।
सर्वत्र संवृतो भिक्षुः सर्वदुःखा प्रमुच्यते ॥

सो दानि भगवता एहीभावेन विनीतो । एहि भिक्षु इमां भावां ति आभाषस्य यत्किंचिद्गृहिलिंगं गृहिगुप्तं गृहिध्वजं गृहिकल्पं सर्वं समन्तर्हितं त्रिचीवरं चास्य प्रादुर्भवेत् सुंभकं च पात्रं प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथं चास्य संस्थिहे तद्यथापि नाम वर्षशतोपसंपन्नस्य भिक्षुस्य ॥ एवं आयुष्मतो सभियकस्य माणवकस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥

तं दानि भ[398b]गवां विसर्जयति ॥ सो दानि भगवन्तं आह ॥ यदि भगवं केनचित्पृच्छियेयं को त्वं ति किं मया भगवं वक्तव्यं ॥ भगवानाह ॥ श्रमणो पि त्वं ब्राह्मणो पि त्वं वेदको पि त्वं तारको पि त्वं पारगो पि त्वं ॥

शक्रो देवानामिन्द्रो माणवकवर्णमात्मानं अधीधि अभिनिर्मिणित्वा प्रासादिको दर्शनीयो श्रोत्रमनेहि वरेहि गीतेहि गीतमधुरघोषनिर्घोषेहि घोषवर्णेन दक्षिणम-ज्जुना भगवतो पात्रचीवरमुद्धिक्कमादाय पृष्ठतो गच्छति ॥ शक्रो आह ॥ को स्वायं माणवको प्रासादिको दर्शनीयो ॥ सो दानि आह ॥

यो वीरो धृतिसंपन्नो ध्यायी अप्रतिपुद्गलो ॥
अर्हन्तो सुगतो लोके तस्याहं परिचारको ॥

1. M adhyātmara° eko sa° BM °bhikṣuḥ ‖. — 3. BM cakṣuṣā saṃvaro° M °grotena saṃvaraḥ | B °ṇa saṃvaraḥ |. — 4. B prāṇa° BM °ṇa saṃvaro sādhu sādhu jihvāya saṃvaro |. — 5. B °yena saṃvaro sādhu ma° BM °dhu saṃvaraḥ (M °ro) sa°.

6. M °tra saṃvaro bhi° ehibhikāye pra°. — 7a. BM °nāṃ bhi°. — 7b. B °bhikṣuḥ | i° M °mānā ti ābhāṣasya yat kiñci° B °ābhāṣasya yat kiñcidliṅgaṃ° M °dgṛhiliṅga gṛhiguptiṃ gṛhidhvajaṃ gṛhikalpaṃ° B °jaṃ gṛhikalpaṃ° BM °rthānaṃtaṃ ‖ (M °rataṃ) santi° M °mubhavaṃ saṃbhakaṃ ca keṣā iryyā° B °keṣā iryā° BM °ṃo ‖ tadya° M °lopasampannasya° BM °kabasya e°. — 10. M °bhikṣo ‖.

12a. BM tahiṃ°. — 12b. M °vantaṃ āha ‖. — 12c. B °bhagavaṃ ko° M °bhagavaṃ kena cin pṛcchiyeyaṃ ko tvaṃ ti kiṃ° gavaṃ vakta°. — 13b. M śramaṇo pi tvaṃ bra°. — 16. B °rṇam ātmānaṃ pi° M °tmanam [illegible]° pabhaṅgehi pāpa° B °jātehi nīla° M °pālugrīvehi aniṃ° B °varṇaghoṣa yaśaḥ° B °hastā | āha°.

18b. BM kasyāyaṃ°. — 19. M °dhṛtisampanno° pudgalaḥ | B °pratipudgalo |. — 20. B arhan suga° M | arhaṃ sugo°.

यो बुद्धमार्गं तारेति धर्मनावाय गौतमो ।
उत्तीर्णो पारगो बुद्धो तस्याहं परिचारको ॥

भगवां पि शक्रं देवानामिन्द्रं विसर्जयति ॥

अथ खलु भगवतो एतदभूषि ॥ किमधिमुक्ता जटिला जटिला खलु जटिलाधिमुक्ता ति भगवां जटिलसहस्रं अभिनिर्मिणित्वा प्रासादिकां प्रसादनीयां महेशाख्यां तेहि संपरिवारितो वैहायसेन ऋद्धीये उरुविल्वाकाश्यपस्य जटिलस्य उपसंक्रान्तो ॥ उरुविल्वाकाश्यपः सपरिवारो सार्धं पंचहि जटिलशतेहि जटिलसहस्रं दृष्ट्वा प्रासादिकं च दर्शनीयं च संवेगमापन्नो । इमं शाक्यकुमारश्रमणं सर्वो उपस्थितो महाजनकायो आगमिष्यति ते आगत्वा अभिप्रसन्ना उरुविल्वाकाश्यपस्य ऋषिस्य सपरिवारस्य लोके समसमो नास्ति अयं च अपि जटिलसहस्रपरिवारो महर्द्धिको महानुभावो वर्षविहायनं प्राप्तो सर्वजनकायो एतस्य ऋषिस्य सहस्रपरिवारस्य महर्द्धिकस्य महानुभावस्याभिप्रसीदिष्यति । अभिप्रसन्ना च सत्काराधिकारं करिष्यन्ति सत्करिष्यन्ति गुरुकरिष्यन्ति मानयिष्यन्ति पूजयिष्यन्ति अपचायिष्यन्ति मम सपरिवारस्य न तथा समन्वाहरिष्यन्ति ॥ अथ खलु भगवां उरुविल्वाकाश्यपस्य ऋषिस्य एवमेवरूपं चेतसो परिवितर्कमाज्ञाय स्वयं जटिलवेशमन्तरहायितं च निर्मितं च जटिलसहस्रं ॥ अथ खलु उरुविल्वाकाश्यपो जटिलो तस्मिं जटिलसहस्रे अन्तर्हिते स्वकेन रूपेण च भगवन्तं दृष्ट्वा तथागतमर्हन्तं सम्यक्संबुद्धं विद्याचर[398b]णसंपन्नं सुगतं लोकविदं अनुत्तरं पुरुषदम्यसारथिं

1. M yo pūjyamānaṃ tīre dha° gautamo | . — 2. M tirṇṇa° BM °haṃ paricārako |. — 4 ff. B kiṃ adhimukti jaṭilā jaṭilā khalu jaṭilā ti muktā ti bha° M kiṃ adhimukti jaṭilo khalu jaṭilo ti muktā ti bhagavān jaṭi° dikaṃ prasādanīyaṃ maheśākhyaṃ | te° B °kaṃ prasādanīyaṃ maheśākhye tehi saṃparicārikaṃto vai° M °vārikaṃto vai° B °ddhīye ubhilvākāśya jaṭi° BM °nto uru°.

7. M °śyapo sapari° pañcahi jaṭilasahasraṃ ha dṛ° ca āpannaṃ B °nna I°. — 8. BM imaṃ śākyakum āgamana sa° M °sarve upasthi° BM °miṣyati | bhadanākaṃ° B °prasanno u° lokam samasa° BM °nāsti | ayaṃ° M °pto sarvajanakā°.

12. M abhiprasaṃnānaṃ ca °pūjayiṣyanti mama sa° samāhariṣyanti || . — 14. M °gavāṃ uru° B °ṛṣisya° M °idam e° sa parikitarkam ājñāpaya svayaṃ jaṭilo ve° ntarhāyitaṃ | B °rmitaṃ jaṭi°.

16. BM °śyapo jaṭila(M °lā) tasa jaṭilasahasrapāṭarhi° M °rūpeṇa saṃmyakaṃ° B °taṃ sugata lokavid anutta° BM °upasthitaṃ° thāgatakehi bahavaṃ caturhi vai° M °damadamathaprāptaṃ nāga viya kāritakāraṇaṃ svabhiṣpana ūṇaṃ° B °indriyaṃ svarhiṣṇa° M °jitendriya hradam acchaṃ anāvila viprasanna ratanayūthaṃ vā abhya° B °yūthaṃ vā abhya° tejarāśiṃ° kaṃ apratikūlaṃ° M °kaṃ apratikūlaṃ darśanīya B °rśanīya dṛ°

शास्तारं देवानां च मनुष्याणां च द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतं अशीतीहि अनुव्यंजनेहि उपशोभितशरीरं अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतं दशहि तथागतबलेहि बलवन्तं चतुर्हि वैशारद्येहि विशारदं प्रासादिकं प्रसादनीयं च शान्तेन्द्रियं शान्तमानसं उत्तमदमशमथप्राप्तं परमदमशमथप्राप्तं नागो विय कारितकारणो अनाविलेहि इन्द्रियेहि अनाविलेन मानसेन चित्तेन धर्मताप्राप्तेन गुप्तो नागो जितेन्द्रियो ह्रदमिवाच्छो अनाविलो विप्रसन्नो रतनयूपं व अभ्युद्गतं सुवर्णबिम्बमिव प्रभासयन्तं तेजोराशिं श्रिरीये दीप्यमानं द्वितीयमिव आदित्यं उदयन्तं असेचनकं अप्रतिकूलं दर्शनाय । दृष्ट्वा च पुनरुरुबिल्वाकाश्यपो सपरिवारो विस्मितो अभूषि । महर्द्धिको श्रमणो गौतमो महानुभावो एवं अहं पुनर्महर्द्धिकतरो ॥

अथ खलु ये जटिलायो आगतागतो भगवन्तमुपसंक्रमेन्सुः भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेव पुरस्करेन्सुः भगवतो दर्शनेन न तृप्येन्सुः ॥ अथ उरुबिल्वाकाश्यपस्य आयिष्य एतदभूषि ॥ अहो पुनर्मे आश्रमातो श्रमणो गौतमो अन्येन प्रक्रमेया ॥ अथ भगवानुरुबिल्वाकाश्यपस्य आयिष्य इममेवरूपं चेतसो परिवितर्कमाज्ञाय तद्यथापि नाम बलवां पुरुषो संमिंजितां वा बाहां प्रसारये प्रसारितां वा बाहां संमिंजये एत्तकेन क्षणवीतिहारेण उरुबिल्वाकाश्यपस्य आयिष्यस्याश्रमातो वैहायसमभ्युद्गम्य उरुबिल्वायां सेनापतिग्रामके प्रक्रमासि यथा नैरंजनायास्तीरे अजपालस्य न्यग्रोधमूले ॥ अथ खलु उरुबिल्वाकाश्यपस्य जटिलवृत्तेः अपगतेन क्षणकालेन एतदभूषि ॥ अहो पुनः श्रमणो गौतमो इहागच्छे इहागतो खादनीयं भोजनीयं परिभुंजेया ॥ अथ खलु भगवां उरुबिल्वाकाश्यपस्य जटिलस्य इमं एवरूपं चेतसः परिवितर्कमाज्ञाय तद्यथापि नाम बलवां पुरुषो संमिंजितां वा बाहां प्रसारये प्रसारितां वा बाहां संमिंजये एत्तकेन क्षणवीतिहारेण अजपालस्य न्यग्रोधमूलातो वैहायसमभ्युद्ग[399b]म्य उरुबिल्वाकाश्यपस्य

8. B °ṣṭā ma°. — 9. M °çramaṇo gautamo mahānubhāvo yaṃ a° B °r maharddhi° M °rddhiko yaṃ ||.

11. B °āgatāgatā tha° BM °ṃsuḥ bhagavataḥ (M °to) pā° M °tvā bhagavantamanuntam n° BM °rensuḥ bha° pyensuḥ ||. — 12. M atha khalu u° akhiyeṣa°. — 13. M °çrame pratikamo mama pra° B °kramayā ||. — 14. M atha khalu bhagavāṃ uru° B °çyapasya ri° M °çyapasya çiṣya i° BM °jñāya ta° balavāṃ pu(M °ṣo puruṣo saṃmiñjitaṃ vā bāhāṃ prasāraye prasāritāṃ bāhāṃ saṃ(M° saṃmiñjaye(M °ye ||) eka° M °vītihāre° B °çyapasya ri° BM °vaihāyasaṃ abhudga° sthāsi(M °si ||) nadyāṃ sai°.

18. B °tīraṃ ajitaḥ | pathaga° M °tīraṃ ajite pathāga° yennāsa°. — 19. M °çramaṇo gautamo ° cela ihāgataḥ khā°. — 20. M °gavān uru° çyapajaṭi° ca evarūpaṃ ° vitarka° puruṣaḥ saṃ° BM °rādhāṃ(M °tāṃ) bāhāṃ° M °saṃmiñja ° vītihāre°.

जटिलसहस्रमे प्रज्वालामि ॥ अथ खलु उरुबिल्वाकाश्यपस्य जटिलस्य सपरिवारस्य एतदभूषि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो परकायानां परपुद्गलानां चित्तेन चित्तं आजानाति महर्द्धिकतरा च वयं ॥ अथ खलु उरुबिल्वाकाश्यपो जटिलो भगवन्तं स्वहस्तेन प्रणीतेन खादनीयभोजनीयेन सन्तर्पयति ॥ अथ खलु भगवां भुक्तावी धौतपात्र अपनीतपाणिरुरुबिल्वाकाश्यपस्य चापिक जटिलस्य तं देयधर्मं इमायानुमोदनायानुमोदये ॥

अग्निहोत्रमुखा यज्ञा सावित्री छन्दसां मुखं ।
राजा मुखं मनुष्याणां नदीनां सागरो मुखं ॥
नक्षत्राणां चन्द्रो मुखं . . . . ।
आदित्यो तपतां ऊर्ध्वं तिर्यगधस्तपस्ततां ।
सदेवकस्य लोकस्य संबुद्धो वदतां वरो ॥

अथ खलु उरुबिल्वाकाश्यपो सपरिवारो वैहायसमन्तरीक्षे स्थितो अग्निं जुह्रति तेषां समग्नि न ज्वलति तेषामेतदभूषि ॥ कस्यायमनुभावो येनाग्निं न ज्वलति । नूनं श्रमणस्य गौतमस्यानुभावेन ॥ सो दानि अग्निः प्रज्वलितो तेषामेतदभूषि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो वयं पुनः महर्द्धिकतरा ॥ तहिं अग्निस्मिं आहुतिं प्रक्षिपति न च पतति तेषामेतदभूषि ॥ कस्यायमनुभावो येनाग्निस्मिं आहुती न पतति । नूनं श्रमणस्य गौतमस्यानुभावेन । यतो खानं एवं भवति श्रमणस्य गौतमस्यानुभावो ति ततः सा आहुतिरग्निहोत्रिकेषु पतति ॥ अग्निं जुह्वान्तरी-

1. B °sahasraṃ°. — 2. M °çramaṇo gautamo° BM °kāyānāṃ parapudgalānāṃ M °pudgalānāṃ cittena cittaṃ (B °na citta) jā° °rddhikatara ca vaṃ B °ca vayaṃ |. — 3. M °gavanta svahastena khādanī° B °khādaniyabho° M °santarppayati parivesayati |. — 4. M °pāṇir uru° °svāmunodanā° B °anumodanāyānumodaye |.

7. B °khā yajño sā° M °khā yajñā sā° BM °sāṃ mukhā |. — 8. M rājā mukhaṃ manuṣyāṇāṃ nadī° °ro mukhā |. — 9. BM °kṣaṇāṃ śaśi°. — 10. B °staṃ ūrddhvaṃ ti° M °staṃ ūrddhvatiryagadhastapataṃ B °tapaṃ |.

11. BM jagataḥ gato sa° M °devasya lo° °saṃbuddho vadatām varaḥ |. — 12. M °lo uruvilvā° B °juhati tesāṃ° M °huti | tesām tasāṃ agniṃ na jvalati tadā°. — 13. B °bhāvenāgni° M °bhāve na °gnir na°. — 14¹. M °çramaṇasya gautama°. — 14². M °agnir prajva°. — 15¹ B maharddhiko sra° M °çramaṇo gautamo ° punar mahā° BM °tarā taṃ°. — 15². B taṃ agnismiṃ° M tam agnismiṃ° BM °kṣipati na° B °na patanti te° M °mākhā eta°.

16. BM °bhāvenā° M °gnismiṃ āhuti na°. — 17¹. M °çramaṇasya gautama° BM °vena yato°. — 17². BM °bhavati | çramaṇ M °çramaṇa° M °gautama° BM °vo ti | tataḥ (M °tato) sā° M °āhuti agnihotreṇa° BM °ti sā°. — 18. M °ṇā anta °ṣ juhato ca° °ntare° BM °taṃ te°

याती ओतरिष्यामो ति न शक्नोमि ओतरितुं ॥ तेषामेतदभूषि ॥ कस्याय-मनुभावो येनान्तरीयातो न शक्नोम आत्मनं ओतरितुं । नूनं श्रमणस्य गौतमस्या-नुभावेन ॥ यतः तानं एतदभूषि श्रमणस्यायं गौतमस्यानुभावो ति अथ ततो अन्तरीयातो आत्मनं ओतरित्वा शिविकेषु सकाशकेषु निषीदिष्यामो ति न च तानि शिविकानि अद्दशेन्सु ॥ तेषामेतदभूषि ॥ कस्यायमनुभावो येन वयं शिविकां न कुर्मेम । नूनं श्रमणस्य गौतमस्यानुभावेन ॥ यतो तानं एवं भवति श्रमणस्य गौतमस्यानुभावो ति अथ तानि शिविकानि अद्दशेन्सु ॥ तेषामेतदम्[399b]षि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतरा ॥ पानीयकरकानि आदाय उदकहारा गमिष्यामो ति न च तानि करकानि अद्दशेन्सु ॥ तेषामेत-दभूषि ॥ कस्यायमनुभावो नूनं श्रमणस्य गौतमस्य । यतो तानं एवं भवति श्रमणस्य गौतमस्यानुभावो ति अथ तानि सकलकानि करकानि अद्दशेन्सु ॥ तेषामेतदभूषि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतरा ॥ करकानि आदाय नैरञ्जनां नदीं उदकहारिं गता न च शक्नोन्ति तानि करकानि भरयितुं ॥ तेषां एतदभूषि ॥ कस्यायमनुभावो नूनं श्रमणस्य गौतमस्य ॥ यतो तानं एवं भवति श्रमणस्यायं गौतमस्यानुभावो ति अथ तानि करकानि उदकेन भरेन्सु ॥ तेषामेतदभूषि ॥ महर्द्धिको यं श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतरा ॥ आहारं करिष्यन्ति न च शक्नोन्ति आहारं कर्तुं ॥ तेषामेतद्-

1[1]. B °shi ka°. — 1[2]. B °[illegible]° M °[illegible]° [illegible]. — 2. M °gautama° BM °[illegible] ya°. — 3. M °[illegible]° B °shi [illegible]° M °shi [illegible] gautamasyānu° BM °[illegible] || [illegible]° M °tato [illegible]° BM °[illegible]° B °[illegible] [illegible]° M °[illegible] | na ca° B °[illegible]° M °[illegible]°. — 5[1]. M [illegible]° BM °shi ka°. — 5[2]. B °[illegible] [illegible]° M °[illegible] |.

6[1]. M °çramaṇasya gautama° BM °[illegible] ya°. — 6[2]. M °[illegible] çramaṇasya gau-tamasyānubhāvena | a° B °[illegible] gautamasyānubhāvenaiva | atha [illegible]° M °[illegible]°. — 7. B °shi ma° M °shi [illegible]° ([illegible]). — 8[1]. B °[illegible] pā°. — 8[2]. B pānīya karakāni [illegible] °[illegible]°. — 10[1] M °[illegible] çramaṇasya gautamasya. — 10[2]. M °[illegible] çramaṇasya gautamasyānubhāvena || atha° B °[illegible] || atha °[illegible] | M °[illegible].

12[1]. M [illegible] BM °shi ma°. — 12[2]. M °çramaṇo gautamo ° [illegible]°. — 13. M [illegible] B °[illegible] | [illegible]° M °[illegible]° BM °[illegible]°. — 14[1]. M [illegible] B °shi ka°. — 15[1]. M [illegible]° B °[illegible]° M °çrama-ṇasya gautama°. — 15[2]. M [illegible] çramaṇa ° gautamasyānubhāvena || atha° B °[illegible] | atha ° [illegible]° M °[illegible].

16[1]. B °shi ma°. — 16[2]. M °çramaṇo gautamo [illegible] || [illegible]° BM °[illegible]°. — 17[1]. M [illegible]° B °[illegible] | na [illegible]° M °[illegible]° B °[illegible]°. — 17[2]. B °shi ka°.

भूषि ॥ कस्यायमनुभावो नूनं श्रमणस्य गौतमस्य ॥ यतो नाम एवं भवति श्रमणस्यायं गौतमस्यानुभावो त्ति ततः शक्नोन्ति आहारं कर्तुं ॥ तेषामेतदभूषि ॥ महर्द्धिको श्रमणो गौतमः महानुभावो वयं पुनर्महर्द्धिकतरा ॥ छलाहारा काष्ठानि पातयिष्यामो ति उत्क्षिपितानि कुठाराणि न शक्नोन्ति निक्षिपितुं ॥ तेषामेतदभूषि ॥ कस्यायमनुभावो नूनं श्रमणस्य गौतमस्य ॥ यतो नाम एवं भवति श्रमणस्य गौतमस्यायमनुभावो ति अथ तानि कुठाराणि उत्क्षिप्तानि निक्षिपेन्सुः तानि च काष्ठानि पातयेन्सुः ॥ तेषां एतदभूषि ॥ महर्द्धिको यं श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतराः ॥

एवं भगवां उरुबिल्वाकाश्यपस्य संमुखा त्रयो भ्रातरं सपरिवारं पंचहि प्रातिहार्यशतेहि विनयेति । पश्चिमं प्रातिहार्यं ॥ भगवां प्रतिसंलीयितुकामो उरुबिल्वाकाश्यपमाह ॥ काश्यप अत्र अग्निशरणस्मिं ते संलयिष्यामीति ॥ उरुबिल्वाकाश्यपो आह ॥ सो गौतम अग्निशरणो अप्रवेश्यो केनचित् मनुष्येण वा अमनुष्येण वा अत्र शरणे दुष्टनागो प्रतिवसति । वयं पि तावदेतं अग्निशरणं दूरे परिवर्जेम तस्य दुष्टनागस्य भयेन ॥ भगवानाह ॥ अनुजानाहि त्वं काश्यप प्रतिसंलयिष्यामि अहमत्रा[100a]ग्निशरणे ॥ उरुबिल्वाकाश्यपो आह ॥ न ते भो गौतम अग्निशरणं अनुजानामि । अत्र दोष एव आख्यायति एतं अग्निशरणं इमानि च बहूनि तृणकुटिकापर्णकुटिकाशतानि यत्र भवां गौतमो नन्दति तत्र प्रतिलीयतु ॥ अथ खलु भगवां उत्थायासनातो उरुबिल्वाकाश्यपस्याग्निशरणं

1¹. BM °syānubhāva(M °vaṃ) nū° M °çramaṇasya gautamasya B °masya ta°. — 1². B tasya ak° M °bhavati | maharddhiko yaṃ çramaṇo gautamasyānubhāvati | tato çaknoti ā° B °bhāvāni | tataḥ çaknoti ā° etaṃ te°. — 2. B °ahi ma°. — 3¹. M °çramaṇo gautamo mahā° B °bhāvaṃ vayaṃ° M °punaḥ maha° BM °tarā kṛ°. — 3². B °hāro | kāṣṭhāni pātayiṣyāmo ti ukṣipitā° M °ukṣiponti ukṣipitā° BM °kuṭhāraṇi(M °ni) na° B °çaknoti nikṣipituṃ te°. — 5¹. M °çramaṇasya gautama°. — 5². M °çramaṇasya gautamasyāyam anubhāvati || a° B °vo ti || atha tāni kuṭhā° M °kuṭhārā° BM °kaṭha(M °kāṣṭa)pataṃ (B °taṃ) | || tāni ca kā° B °pātayetsuḥ | M °pātayensuḥ.

7¹. M tadāsīn eta° BM °abhi ma°. — 7². M °çramaṇo gautamo ° punaḥ maha°. — 9. M °gavān uru ° mukhāt trayo ° hāryyaçata° B °vinayati pa°. — 10². BM °gavāṃ pra° (M °vāṃ pratilīyatu°.

11¹. M kāçyapo atra agni° B °pa atra agni° BM °çaraṇaṃ hi te saṃçayi°. — 11². M °çyapam āha | . — 12. M °gautama sabo agni° B °gautama agni° BM °vadhya te(M °te |)na ke(M °kena)cit manuṣyeṇa vā atra sa(M °tra çaraṇe° M °duṣṭanāgo°. — 13. M °parivarjjema | ta° B °syaṃ | ta ° bhayena || . — 14². M °mi atrāham agniçaraṇe || . — 15¹. M °çyapa ā°. — 15². M °gautama agni° B °gautama agni° BM °mi a°.

16. M °doṣo evam ākhyāyami etaṃ° B °ṣa evam ākhyāyami | etaṃ° M °bahuni tṛṇakuṭikāparṇakuṭikāḥ ca ° gautamo abhinandati tatra me pra°. — 18. M °gavān utthā° B °tthāyasanāto ° çaṃ pratiçiçi°.

प्रविशित्वा निषीदे प्रतिसंलयनाय ॥ भगवान्दानि अग्निशरणे तेजोधातुं समापन्नो । सो दानि भगवतः तेजं असहन्तो यतो भगवतो पात्रं चतुर्हि महाराजेहि दिन्नं तत्र ओकस्तो । भगवता च मैत्र्या स्फुटो दमितो च निर्विषो संवृत्तो न च भूयो क्रोधं आवहति ॥ अग्निशरणो भगवतो तेजेन एकज्वालीभूतो दृश्यति ॥ तेषां जटिलानामेतदभूषि ॥ दुष्टनागेन गौतमो श्रमणो दग्धो अग्निशरणो च सर्वं आदीप्तं ॥ ते दानि उदकमादाय प्रधाविता अग्निशरणं निर्वापयिष्यामो त्ति श्रमणं च गौतमं परिमोचयिष्यामो त्ति ॥ भगवां तं नागं दमेत्वा निर्विषं कृत्वा पात्रेणादाय उरुबिल्वाकाश्यपस्योपनामयति ॥ उरुबिल्वाकाश्यपो भगवतो पात्रगतं तं नागं दृष्ट्वा सपरिवारो विस्मितो । महर्द्धिको श्रमणो गौतमो महानुभावो यत्र हि नाम अस्य भगवत्ननुवेन वा अननुवेन वा न शक्यं प्रवेष्टुं ति सो श्रमणस्य गौतमस्य तेजेन पर्यादिन्नो ॥ अथ खलु उरुबिल्वाकाश्यपप्रमुखा ते त्रयो भ्रातरो सपरिवारा भगवता इमेन पश्चिमेन प्रातिहार्येण सर्वे अभिप्रसादिता ॥

दर्शयित्वा उरगराजं उरुबिल्वकाश्यपअग्निशरणस्मिं ।
पात्रेण नीहरित्वा काश्यपशिरिणो उपनयासि ॥
एषो स्य पश्य काश्यप पर्यादिन्नो स्वतेजसा तेजो ।
यस्य भवनं न शक्यं प्रवेष्टुमिह केनचित्क्रोधे ॥
संहृष्टरोमकूपो उरुबिल्वाकाश्यपो सपरिवारो ।
नरनागेन हि नागो दान्तो उपशमयितो दृष्टो ॥
सो नागो यस्यार्थं महर्षिभवनं आसीद्दुःप्रवेशो ।
सो दान्तो निर्विषश्च कृतो यं पुत्रानुमोदेन ॥

1. B °tejāṃ asa° M °tejām asa° yataḥ bha° turbhi mahā° B °nnaṃ | ta°. — 3. B bhagavān ca mai° M bhagavāṃ ca mai° B °sphuṭe da° M °sphuṭaṃ damitāṃ ca nirviṣaṃ saṃvṛttaṃ na ca bhū° B °hati ca agni°. — 4. B °ekāvṛtā°. — 5ᵃ. M °gautamo śravaṇa dagdho agniśaraṇe ca sa°.

6. B °rvāpayiṣyāmanti śra° M °rvāpayiṣyāmanti | śravaṇaṃ ca gautamo pa° ciṣyāmanti | B °ṣyāmanti ||. — 7. M °trenādā° śyapasya upanā°. — 8. BM °śyapa bhagavato (M °vanto) pā° M °tragataṃ taṃ nāgaṃ° smitaḥ B °smito maha°. — 9. M °rddhiko śravaṇe gauttamo° hi nāma sya bha° B °hi nāma yasya bha° ditaṃ | so° M °diṇṇaṃ so śravaṇasya gauttama°.

11. BM °sya pramukhā te tra° rivāra bha° B °ścimena prātihā° M °bhiprasādikā B °ditā da°. — 13. BM °jaṃ | u° B °vilvākāśyapa a° M °vilvākā agniśaraṇasmiṃ B °smiṃ pā°. — 14. M °treṇa nīha° śiriṇo u° BM °nayasi | . — 15. BM °eṣo sya kā° M °dinnā sya tejasātejo B °nno sya tejasā tejo ya°.

16. M yasya°. — 17. BM °rkṣa ma°. — 18. BM °dānto paśyamāno dṛṣṭvāyo | (M °ṣṭvā). — 19. BM esho so nāgo etasa arthaṃ ° mmiṃ yadya duḥpraveśo. — 20. BM nara-(M nava)nāgena so° M °rviṣakṛ°.

भगवानाह ॥

मया विनीते न सन्ति दोषा अप्रतिघातो काश्यप न विद्यते ।
नभं पतेय पृथिवी चलेय च न बुद्धानां अन्यथो भवेत् ॥
विन[४००b]र्जितो भगवता स संवर्तनाय ति पञ्चमो भणितो ।
मानुष्यकायो भूत्वा प्रतिपत्ते चरणेषु सुगतस्य ॥
शरणं भवाहि नरवर यावं न मे आश्रयो महाप्रज्ञ ।
यस्य मम आसि चित्तं प्रदुष्टमपविद्धं प्रव्रज्यं ॥
बाढं कृतं नरोत्तम अपराधो मम अज्ञायतो यत्रहं ।
तं क्षमतु विनायकवर पुन ते शरणं अहं गच्छे ॥
वंदित्व वन्दनीयं चरणौ च प्रदक्षिणीकरित्वान ।
गुरुगौरवेण महता नमस्य नागो अपक्रान्तो ॥

भगवता उरुबिल्वाकाश्यपो पंचशतपरिवारो नदीकाश्यपो च त्रिशतपरिवारो गयाकाश्यपो च द्विशतपरिवारो सर्वे त्रयो भ्रातरो पंचहि प्रातिहार्यशतेहि अन-वशीभावे विनीता एहिभिक्षुकाये सर्वे प्रव्राजिता उपसंपादिता । एष भिक्षवस्तत्र तथागते ब्रह्मचर्यं ॥ तेषां दानि भगवता एहिभिक्षुकाये आभाष्टानां यत्किंचिद्-तीर्थिकलिङ्गं चापिगुप्ति चापिध्वजं चापिकल्पं सर्वं समन्तरहितं त्रिचीवरा च सानं प्रादुर्भ-वेसुः सुच्छा च पात्रा प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथो सानं संस्थिहे तद्यथा वर्षशतोपसंपन्नानां भिक्षूणां । एवमायुष्मन्तानामुरुबिल्वाकाश्यपनदीकाश्यपगया-काश्यपानां त्रयाणां भ्रातृणां सपरिवाराणां प्रव्रज्या उपसंपदा भिक्षुभावो ॥

1. BM °nītasya na santi doṣā (M °ṣo) [illegible] kāśyapa (M °pasya) vidyate. — 2. B [illegible] M [illegible] BM [illegible] — 4. BM [illegible] — 5. BM [illegible].

6. M [illegible] BM [illegible] — 7. BM [illegible] — 8. BM [illegible] — 9. M [illegible] B [illegible] M [illegible]. — 10. M [illegible] B [illegible] BM [illegible].

11. M [illegible] B [illegible] BM [illegible]. — 12. BM [illegible] M [illegible] BM [illegible] B [illegible] M [illegible]. — 15. B [illegible] M [illegible] BM [illegible] M [illegible] M [illegible] B [illegible] M [illegible] B [illegible].

19. BM [illegible] B [illegible] M [illegible].

तेषां दानि उपसेनो नाम भागिनेयो तथैव नद्या नैरंजनायास्तीरे आश्रमं मापयित्वा पर्णोपेतं पुष्पोपेतं फलोपेतं तत्रासौ प्रतिवसति त्रिशतपरिवारो चतुर्ध्यानलाभी पंचाभिज्ञो महर्धिको महानुभावो । तेहि दानि उरुबिल्वाकाश्यपप्रमुखेहि भिक्षूहि सर्वं ऋषिभाण्डं अजिनोपानहचीवरा च कठिनिका च कमण्डलू च नद्यां नैरंजनायां प्रवाहिता । सो अस्माकं भागिनेयो उपसेनो एतेन ऋषिभाण्डेन सपरिवारो कार्यं करिष्यति । तेहि तं भाण्डं नैरंजनायां वुह्यन्तं दृष्ट्वा तेहि तं भाण्डं सर्वं उत्क्षिप्तं । तस्य दानि उपसेनस्य ऋषिस्य एतदनुभूषि । मा हैव मे मातुलका केनचिद्विहेठिता भविष्यन्ति । सो दानि शीघ्रशीघ्रं त्वरमाणरूपो सपरिवारो उरुबिल्वाकाश्यपनदीकाश्यपगयाकाश्यपानां आश्रमं आगतो भगवां च सपरिवारो हस्तप्रक्षालो । भिक्षुसंघो नद्यां नैरंजनायां पादानि निमज्जेत्वा शीघ्र[401ᵃ]न्ति परिमार्जन्ति ।

अथ खलु उपसेनो आयुष्मन्तं उरुबिल्वाकाश्यपो तेनोपसंक्रमित्वा आयुष्मन्तं उरुबिल्वाकाश्यपं गाथाये अध्यभाषे ॥

मोहं ते जुहितो अपि मोहन्ते सो तपो कृतो ।
यं अहे पश्चिमे काले जीर्णा व उरगो त्वचं ॥

अथ खल्वायुष्मां उरुबिल्वाकाश्यपो उपसेनं ऋषिं गाथाये प्रत्यभाषे ॥

मोहं मे जुहितो अपि मोहं मे सो तपो कृतो ।
यं अहे पश्चिमे काले जीर्णां व उरगो त्वचं ॥

सो पि च भगवता सपरिवारो एहिभिक्षुकाये विनीतो एहिभिक्षुकाये प्रव्राजि-

1. BM °syaiva nadyāṃ nai° ... M °trapotaṃ phalopetaṃ puṣpopetaṃ tatrā° ti | triṃśata°. — 3. M °bhikṣuhi sa° BM °jinopānahacīvarā ca kaṭhinikā° M °dāra ca nadyāṃ° B °hitā so°. — 5. BM °apanam | e° B °ahyati te°.

6. M tehi taṃ sai° svaṃ utkṣiptaṃ | B °utkṣiptaṃ |. — 7¹. M °abhiyaśa°. — 7². M °haivaṃ me mātulakā kena °cidvihiṭhikā bhā°. — 8. BM °sīmaṃ° B °kāśyapa nadīkāśyapa ga° M °sāṃ ya sa° B °sāṃ ca pra° M °hastapāla B °hastapālo bhi°. — 10. BM °ni nirmajjetvā śīghraṃ M °śīghraṃ| pari° M °mārjati ||.

12. M °sena jahitā yena uruvilvākāśyapa tena ° tathye pratyabhāṣe. — 14. M moham te juhito agnih mohan te° B °kṛto yo°. — 15. BM ya ja ° jīrṇṇā va uragotvacaṃ ||.

16. M sa pi ca bhagavatā āyuṣmanta sa ° ṛṣayo upasena sā°. — 17. M te haṃ mohaṃ juhito agnih sa haṃ mo° B °gni mohe me°. — 18. BM °jīrṇṇā ca uragotvacaṃ |. — 19. B °bhiṣu | ehi° M °pravraji° BM °tena°.

गा उपसंपादिता । एष भिक्षवो चरथ तथागते ब्रह्मचर्यं ॥ तेषां भगवता एहिभिक्षुकाये आभाषितां यत्किंचिदृषिलिङ्गं ऋषिगुप्ति ऋषिध्वजं ऋषिकल्पं सर्वं समन्तरहितं त्रिचीवरं पात्रं च प्रादुर्भूतं सुखं च पात्रं प्रकृतिस्वभावसंस्थिता च केशा ईर्या च स्थानं संस्थिहे तद्यथापि नाम वर्षशतोपसंपन्नानां भिक्षूणां । एषो आयुष्मतो उरुबिल्वस्य अर्धतृतीयशतपरिवारस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥ इदं भगवतो प्रथमं श्रावकसंनिपातं अर्धत्रयोदश भिक्षुशतानि ॥

भिक्षू भगवन्तमाहंसुः ॥ कस्य भगवं कर्मस्य विपाकेन आयुष्मन्ता उरुबिल्वाकाश्यपनदीकाश्यपगयाकाश्यपा त्रयो भ्रातरो महर्धिका महानुभावा क्षिप्राधिगमा च ॥ भगवानाह ॥ एतेषामेव भिक्षवः पूर्वप्रणिधानं बुद्धे स्तोकस्य कुशलमूलस्य विपाको यं महर्धिका च महानुभावा च क्षिप्राधिगमा च ॥ भूतपूर्वं भिक्षवो अतीतमध्वाने हस्तिनापुरे राजा महेन्द्रो नामानुपूर्वि कृतपुण्यो महेशाख्यो धार्मिको धर्मराजा सुसंगृहीतपरिवारो दानसंविभागशीलो । तस्य दानि राज्ञो पुष्यो नाम तथागतो अर्हंसम्यक्संबुद्धो सश्रावकसंघो हस्तिनापुरे यापितको वसति ॥ कलिङ्गेषु सिंहपुरं नाम नगरं तत्र त्रयो भ्रातरो एकमातृका राज्यं कारयन्ति । तेषां दानि तत्र राज्ये रत्नं उत्पन्नं ते तं रत्नमादाय ततः सिंहपुरातो हस्तिनापुरमागता । तेहि तं रत्नं राज्ञो महेन्द्रकस्य उपनामितं ॥ सो दानि राजा महेन्द्रको तेन प्राभृतेन तेषां भ्रातृणां प्रीतो संजातो ॥ सो आह ॥ किं वो करिष्यामि ॥ ते दानि आहंसुः [401b] ॥ इच्छामो भगवन्तं पुष्यो अस्माकं नगरे वर्षावासं वसेय अस्माकमनुकम्पाय । अनेन तेन प्राभृतेन महन्तमपुण्यं कर्तुकामा ॥ सो दानि राजा महेन्द्रको आह ॥ पुनो पि भगवां पुष्यो अस्माकं नगरे वसिष्य-

1¹. M °kalamaṃ cara°. — 1². M °bhagavatā bhikṣu ° d ṛṣiliṅga ṛṣiguptiṃ ṛṣigupṭiṃ ṛṣidhvaṃ° B °d ṛṣiliṅgaṃ ṛṣiguptiṃ ṛṣidhvaṃ° BM °vaṃ samantarahi° B °kaṃ ca prakṛ ° ṣā īryā ca sthāna saṃ° M °ṣā īryāpathā ca sthānaṃ saṃ° BM °he || tadya ° kalaca pra° — 5. M °ṛddhatṛtīyaparivārasya pra ° bhāvaḥ | B °bhāva i°. — 5. B °taṃ sarva trayodaśabhi bhi° M °taṃ sarvaṃ trayodaśabhir bhikṣu°.

7¹. M bhikṣur bhaga° B °hatuḥ || . — 7². M °kāśyapakasya uru° B °yuṣmantā n° M °pānāṃ tra° BM °rddhiko mahā°. — 9². B °vaḥ pūrva° M °ko yan te maha ° bhāvā ca kṣi° — 10. M °co ° ve rājā mahendrako nā° BM °dhi || kṛ ° ḍho ta°.

12. M °to rāmaṃ samya° BM °ddho śrāvakasaṃghaṃ ha° B °ro yāpati ko° M °ro yāpa-nika° B °ti ca ka°. — 13. B kaliṅkeṣu ° ekamātṛkā rā° M °tṛko rājyaṃ kārayati || . — 15. M °yye ratnaṃ u ° taṃ ratnaṃ ādā °dāraṃ° BM ° gatā te°.

16¹. M tehi taṃ ratnaṃ rā°. — 16². M °prābhṛtena°. — 17². M kiṃ ka° — 18¹. M de dāni āhaṃsuḥ || B °naḥ i°. — 18². M icchāma bha ° aṃ vaseyaṃ a° B °aṃ vaseyaṃ a° M °nukampāya || . — 19. BM so dāni āha || adyaiva B °alpenāpy anena prāpte-naiva ° M °prāpnuvantena ma° M °ntaṃ prapuṇyaṃ ka° B °ntaṃ puṇyaphalaṃ ka° M °kāmaḥ | . — 20¹. M °bhagavān puṣpa° B °re vasiṣyati | .

ति ॥ यूयमपीमेन पुष्पेण संगृहीता भवथ ॥ तेहि दानि भ्रातृहि भगवां पुष्पो सश्रावकसंघो तहिं स्वके नगरे यापितो । भगवां तत्रैव वर्षं बुद्धो परिनिर्वृतो । तेहि भगवतो पुष्पस्य निर्वृतस्य शरीरपूजा च स्तूपो च कारितो ॥

राज्ञो महेन्द्रस्य महिं प्रशासतो
धर्मेण ज्ञानं च समादायवर्तिनो ।
त्रयो भ्रातरो आसि समानचारिणो
पुत्रा च दारा च तदानुवर्तका ॥
ते एकदा सुसमानचारिणो
धर्मेण वै ऐश्वरियं अकासि ।
प्रभूतभोगा रतनानुबद्धा
ताव बहूनि वर्षाणि तोषये ॥
ते एकराज्यसमानभोजना
बुद्धं अदर्शिन्सु विपश्यानुत्तमं ।
नक्षत्रनामो. . . पारमीं गतो
स्वयंभूतो देवमनुष्यपूजितो ॥
परिनिर्वृते कारुणिकस्मिं शास्तुनि
स्तूपं अकारिन्सु वयं समग्रा ।
सपुत्रदारा सह ज्ञातिबान्धवैः
आर्या च श्रेष्ठा नगरस्मिं आत्मनो ॥
हस्तीहि अश्वेहि रथेहि पत्तिहि
नृत्येन गीतेन च वादितेन च ।

1¹. B yûyaṃm apimâni pu° M °pimâni pu°. — 1². M °bhagavâṃ pushpo çrâ° B °shpo çrâva ° tahi sva° BM °te bha°. — 2. M °gavâṃ tatraiva vâsaṃ° B °tralvâsaṃ° BM °rvṛto te°. — 3. M °bhagato pure varshishyati yûyam apimâni pushpasya parinirvṛ° B °po ca kârito râ°. — 4. BM °hendrakasya ° dharmeṇa jñâye ca upâdâya vartti(M °ta-tti)no tra°.

6. M °putro ca dâ ° rituṃ B °rttakâ te°. — 8. BM °samânakâriṇo dharmeṇa te aiçvaryaṃ(M °ryyaṃ) âkâriyo(M °yo) pra°. — 10. M °bhoga ratnâni bandhanâni tâṃ bahunâ varshâpi toshaye B °nâni bandhanâni | tâ bahunâ varshâṃ pi toshaye te°.

12. B °bhojakânubandhaṃ addeṭsuḥ dvi° M °janânubandhaṃ addaçetsuḥ dvi°. — 14. BM °kshatranâ(B °trâṇâ)mo paramâṃ gato svayaṃkṛto de°.

16. M °nirvṛte° B °rvṛto kâ° BM °stuno stû° B °paṃ aparehu vayaṃ saprajño sapu° M °paṃ apare bhareyaṃ | saputro saprajño pu°. — 18. M putradâro mahatjñâtibândhave âyâ ca çreshṭho nagare â° B °dâro mahajñâtibândhavâ âyâ ca çre ° gare â°. — 20. B a-stî° M hastihi a° B °açvahi ra° BM °tyena ca gî°.

गन्धेन माल्येन विलेपनेन च
पूजां अकरिष्ह वयं महर्षिणो ॥
ते स्तूपपूजाय फलेन संप्रति
कल्पां न एक ह्यागमति दुर्गां ।
तेनैव कर्मेण महामुने . . . .
सर्वे स्म दान्ता तव धीर शासने ॥

समाप्तं आयुष्मन्तानां उरुविल्वाकाश्यपनदीकाश्यपगयाकाश्यपानां जातकं ॥

भगवां उरुविल्वाकाश्यपस्य आश्रमातो महता भिक्षुसंघेन सार्धं अर्धत्रयोदशभिर्भिक्षुशतैर्महर्षिणामाश्रमपदं धर्मारण्यं गतो ॥ तहिं दानि सप्त जटिलशतानि प्रतिवसन्ति सर्वाणि चतुर्ध्यानलाभीनि पंचाभिज्ञानि सविंशशतवर्षिकाणि जातीये सर्वाणि च परिपक्वकुशलमूलानि चरमभविकानि ॥ भगवांस्तेषां अनुग्रहार्थं तहिं आश्रमपदं गतो । तेषां भगवां जटिलानां धर्मपदेषु सहस्रवर्गं भाषति ॥

सहस्रमपि वाचानां अनर्थपदसंहिता ।
एका अर्थवती श्रेया यां श्रुत्वा उपशाम्यति ॥
सहस्रमपि गाथानामनर्थपदसंहिता ।
एका अर्थवती श्रेया यां श्रुत्वा उप[402b]शाम्यति ॥
यो शतानि सहस्राणां संग्रामे मनुजा जये ।
यो चैकं जये आत्मानं स वै संग्रामजित् वरः ॥
यो यजेत सहस्राणां मासे मासे शतं शतं ।
न सो बुद्धे प्रसादस्य कलामर्घति षोडशीं ॥

1. M mályena ca vi° B °pújá a° M °pújá akári bhaveyaṁ° B °ṇo te°. — 3. M te tú-papujá° B °saṁparikalpánamena dvá° M °saṁparikapanena dvá° BM °durga ti°. — 5. B te-nai° M tenaivaṁ ka° mune | sarve samadá° B °mune sarve saṁmadáṁtá ta° BM °sare ||.

7. M iti çrimahávastuavadáne áyu° takaṁ samáptaṁ ||. — 8. M atha bhagaván uru° ghena sá° °çyaṁ gataṁ | B °çyaṁ gato ta°. — 9. BM °santi | sarváṇi° M °caṁçaça-tavarshakáni já° B °ráni ca paripakkaku°.

11. M bhagaváṁ teshám anu°çramapado | B °pade gato te°. — 12. M °gunda jaṭi° B °sa-havargaṁ° M °sravarshaṁ bhá°. — 13. M °rthaparisaṁ° BM °hitánáṁ ||. — 14. B e-kam arthaṁ vargi çre° M ekam arthapadavargi çre° B °tvám upa°. — 15. M °sram api sahasram api gáthyánáṁ artha° BM °hitá e°.

16. B ekárthaṁvaṁ çre° M °kárthavaṁ çre°. — 17. B °ṇáṁ saṁgháme° M °ṇáṁ saṁgháme°. — 18. BM °jaye átmánaṁ sarve saṁ° M °grámajid varaḥ | B °raḥ yo°. — 19. B °jayet saha°

यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो धर्मे प्रसादस्य कलामर्घति षोडशीं ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो संघे प्रसादस्य कलामर्घति षोडशीं ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
सो च संपन्नशीलानां कलां नार्घति षोडशीं ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो स्वाख्यातधर्माणां कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो बुद्धे प्रसादस्य कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो धर्मे प्रसादस्य कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो संघे प्रसादस्य कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो ध्यानप्रसादानां कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो सम्पन्नशीलानां कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो स्वाख्यातधर्माणां कलामर्घति षोडशीं ॥
यो च वर्षशतं जीवे अग्निपरिचरं चरेत् ।
पत्राहारो कुशावासी करोन्तो विविधं तपं ॥
यो चैकं भावितात्मानं मुहूर्तमपि पूजयेत् ।
सा एकपूजना श्रेयो न च वर्षशतं हुतं ॥
यत्किंचिदिष्टं च हुतं च लोके

1. B °jayet saha°. — 2. B °dharmaṁ pra° M °dharmapra°. — 3. B °jayeta sa°. — 4. M passe les lignes 4-7. — 5. B °jayetta sa°.

6. B so ca saṁ ° çīlānā ka°. — 7. B °jayet saha°.

12. B °dharmapraṁ kalā°.

16. B passe les lignes 16-17. M °prasādena ka ° çīlā nā°. — 17. M °bhuñjati bho°. — 18. B °çīlāyāṁ ka°. — 20. M na mo vā ° dhmaprasādena ka°.

21. M yo ca varṣaśa ° ve agniṁ pari°. — 22. M padhāhāro vihavamāni ka° BM °roti vividhaṁ°. — 23. M °bhāvitānaṁnaṁ°. — 24. BM so eka°. — 25. BM yat kiṁcit teshāṁ bahukaṁ ca loke sarvaṁ jayati puṇyaprekshī (M °puṇyaḥ prekshī).

संवत्सरं यजति पुण्यप्रेक्षी ।
सर्वं पि तं न चतुर्भागमेति
अभिवादनं उज्जुगतेषु श्रेयं ॥
यो च वर्षशतं जीवे दुःशीलो असमाहितः ।
एकाहं जीवितं श्रेयं शीलवन्तस्य ध्यायतो ॥
यो च वर्षशतं जीवे कुसीदो हीनवीर्यवान् ।
एकाहं जीवितं श्रेयो वीर्यमारभतो दृढं ॥
यो च वर्षशतं जीवे अपश्यं बुद्धशासनं ।
एकाहं जीवितं श्रेयो पश्यतो बुद्धशासनं ॥
यो च वर्षशतं जीवे अपश्यं धर्ममुत्तमं ।
एकाहं जीवितं श्रेयो पश्यतो धर्ममुत्तमं ॥
यो च वर्षशतं जीवे अपश्यं उदयव्ययं ।
एकाहं जीवितं श्रेयो पश्यतो उदयव्ययं ॥
यो च वर्षशतं जीवे अपश्यं अच्युतं पदं ।
एकाहं जीवितं श्रेयो पश्यतो अच्युतं पदं ॥
यो च वर्षशतं जीवे अपश्यं अमृतं पदं ।
एकाहं जीवितं श्रेयं पश्यतो अमृतं पदं ॥

ते च दानि भगवता वशी[402ᵇ]भावे विनीता सर्वे च ते परिनिर्वृता । तेषां भगवां शरीरपूजां च कृत्वा स्तूपां च धर्मारण्यातो अजपालस्य न्यग्रोधमागतो ॥

भगवां सम्यक्संबुद्धो यदर्थं समुदागतो तदर्थं अभिसंभावयित्वा उरुविल्वायां विहरति नद्या नैरंजनायास्तीरे अजपालस्य न्यग्रोधमूले अचिराभिसंबुद्धो ॥ तेन

2. B sarvavitaṃ° M sarve ci taṃ na catubhāgam e°. — 5. M °jīvita çreyo çī° B °sya vāyato | M °sya vāyataḥ ||.
6. M °çyyavān ekā°. — 7. M °jīvita çre°. — 8. M °çāsane | et passe la ligne 9.
11. B °çreshṭaṃ pa°. — 12. M °udakaryayaṃ || . — 13. BM °vita çre° M °udakarya°. — 14. B °cyutapadaṃ | M °cyutaryayaṃ | . — 15. BM °jīvita çre° cyutapadaṃ | .
16. M °va apaçyam amṛitapadaṃ e°. — 17. M °jīvita çreyo paçya ° mṛitapadaṃ || . — 18. M te dā° B tena dā° M °gavatā vaçibhāsavinitāḥ sarve ca tāṃ pa° B °nītā | sarve° vṛitā te° M °vṛitās teshāṃ°. — 19. M °bhagavatā çarī°.
21. BM bhagavān(B °vā) saṃmya ° harati | (M °ti) nadyaṃ nai°. — 22. M °punae samayena rājño çreshṭhiyasya bimbiçārasya brā° B °jhairyasya u ° gatasya rājyā pratyushakā° BM °kshaṇāni vicā(B °civivista°.

खलु पुनः समयेन राज्ञो श्रेणियस्य बिम्बिसारस्य ब्राह्मणो पुरोहितो राजाचार्यो उपरिप्रासादवरगतो रात्र्या प्रत्यूषकालसमये द्वात्रिंशन्महापुरुषलक्षणानां वाचाविस्तरेण स्वाध्यायं करोति ॥ अश्रोषीत्खलु राजा श्रेणियो बिंबिसारो ब्राह्मणस्य पुरोहितस्य राजाचार्यस्य उपरिप्रासादवरगतस्य रात्र्या प्रत्यूषकालसमये द्वात्रिंशन्महापुरुषलक्षणानां वाचाविस्तरेण स्वाध्यायं करोन्तस्य श्रुत्वा च पुनरस्य भगवतो स्मृति उदपासि ॥ अहो पुनर्मे विजिते बुद्धो भगवां उत्पद्ये तं चाहं भगवन्तं पश्येयं दृष्ट्वा च पुनर्मे प्रवृत्ते प्रसीदेय प्रसन्नचित्तो च नं पर्युपासेयं सो च मां भगवां धर्मं देशेय तस्य चाहं धर्मं श्रुत्वा आजानेयं ॥

अथ खलु राजा श्रेण्यो बिंबिसारो तस्यैव रात्र्यात्ययेन अन्यतरं पुरुषमामंत्रयति ॥ एहि त्वं पुरुष क्षिप्रमेव भद्राणि यानानि योजापेहि युक्तानि च मे प्रतिवेदेहि ॥ साधु महाराज त्ति स पुरुषो राज्ञो श्रेणियस्य बिंबिसारस्य प्रतिश्रुत्वा क्षिप्रमेव भद्राणि यानानि योजयति युक्तानि च ते प्रतिवेदयति । युक्तानि ते महाराज भद्राणि यानानि यस्येदानिं कालं मन्यसि ॥ अथ खलु राजा श्रेण्यो बिम्बिसारो अन्यतरं भद्रं यानमभिरुहित्वा महता राजर्द्धीये महता राजानुभावेन महतो जनकायस्य हक्कारहिक्कारभेरीमृदंगपणवशंखसन्निनादेन राजगृहातो नगरातो निर्यात्वा येनान्यतरा उद्यानभूमी प्रायासि ॥ अथ खलु राजा श्रेण्यो बिम्बिसारो यावतिका यानस्य भूमि तावतकं यानेन यात्वा यानातो प्रत्योरुह्य पद्भ्यायेव तां उद्यानभूमिं अनुचंक्रमन्तो अनुविचरन्तो निषीदे सुवर्णमये पर्यंके प्राचीनाभिमुखो रुद्धागारपरिवृतो अमात्यपारिषद्यपुरस्कृतो ॥ अथ खलु [403ᵃ] रा-

3. M °ṇiyo bimbiçārasya brā° adāvaraṃgatasya rātryā° B °tryā pratyushakā° M °triṃça mahā° BM °kshaṇāni vācā° M °rotasya çru° BM °gavantaṃ smṛi°.

6. M °jiteshu buddho bhagavān utpadya taṃ° B °tpadya taṃ° B °vṛittaṃ prasī° M °vṛittaṃ prasīdeyaṃ prasannacittaçcenaṃ paryyupā° B °tto va naṃ paryu° BM °seyaṃ | so° M °māṃ bhagavan dharmaṃ° BM °çeyaṃ tasya°. — 9. M °çreṇyā bimbiçāro° rudasyam ā°. — 10. M °rushaṃ kshipram evaṃ bhadrāṇi yojāyehi yānāni yu° B °drāṇi yānāni yojāyehi muktā° BM °dehi sā°.

11. BM °hārājeti(M °nti |) sa pu° B °rushā rājño° M °jño bimbiçārasya° — 12. M yuktāni ca mahā° drāṇi yā° BM °nāni | yasya(M °syā)dā° M °kāla ma°. — 13. M °bimbiçāro° daṃ yānam abhi° B °bhāvena mahatā janakā° BM °sya hikkārapikkāra(B °pikkāraṃ) bhe° M °khasaṃninādo° bhūmiṃ prāyāsi | B °prāyaṃ |.

16. BM °mbisā(M °mbiçā)ro yāvati(M °vatti)kaṃ yānasya bhūmiṃ tāvatti(M °tta)kaṃ yāne° M °tvā yātāto pratyārūhya° B °dasā ye ca tāṃ° M °dasā yeva tām udyā° BM °nishīde | su° tyapa(M °pā)rishadyāpu°. — 19. M °jño bimbiçāla° nagaraṃ abhivilokayaṃ tasya tasya rājagṛihe° BM °ratāni ca pushkiriṇīṃ(M °shkariṇīṃ) ca pau° B °pauraṇā cā° M °cāryaṃ ca sapitā yatāṃ kālagatāṃ samanu° B °tpadya yonimanasikāro udyā°.

यो बिम्बिसारस्य राजगृहं नगरमभिविलोकयन्तस्य राजगृहेयकानि च पर्वतानि पुष्करिणीं च पौराणां चार्यकां भूतां पितां समनुस्मरन्तस्य कामेषु जुगुप्सन्तो उत्पद्ये योनिसो मनसिकारो ॥

उद्यानभूमितो निर्यात्वा अङ्गानां राष्ट्रवर्धनो ।
पर्यङ्कस्मिं निषीदेसि अवदातसुवर्णमण्डले ॥
नैकविधोपाभिनादिता सम्यग्ज्ञानप्रबोधना ।
पुष्पिता साला तस्मिं काले संपन्नकुसुमिता वरा ॥
व्यालमृगानुविचीर्णां मीनांगुलनिषेवितां ।
पर्वतां च संवीक्षन्तो पृथुसिंहनिषेवितां ॥
निषीदेत्वा प्राङ्मुखो राजा पौराणानि अनुस्मरन् ।
अश्रुपूर्णेहि नेत्रेहि इमां गाथामभाषिष ॥
तिष्ठे यं पाण्डरो गिरि कैलासपर्वतेव विपुलो ।
अथ मे पितरो पितामहा प्रेता कालगता अवीततृष्णा ॥
वरा रम्या वना विचित्रा पुष्करिण्यो शिवोदकायो ।
यानीमानि गमायिन्सुः कां नु ते दिशतां गता ॥
तथैवेमानि राष्ट्राणि इमा पृथुसर्वाणियो ।
यानीमानि गमायिन्सुः कां नु ते दिशतां गता ॥
तथैवेमानि वस्त्राणि इमा निष्का सकुण्डला ।
यानीमानि गमायिन्सुः कां नु ते दिशतां गताः ॥
इमा पुष्करिणी रम्या नानाद्विजनिकूजिता ।

4. M °bhūmito° BM °ryātvā magadhānāṁ rāshṭra° B °rdhana paryaṅ°. — 5. BM °shi-ditvā ava° ujjalaṁ tri°.

6. B trighoshe bhinadi° M trishyāme abhinandite saṁmya° BM °bodhana pu°. — 7. M pushpitā çāla tasmiṁ° B sālā tasmiṁ° varā vyā° M °sampūrṇā valā vyā°. — 8. M vyā-rampi° BM °navicaribhāga saṅgula(M °bhāgesaṅgu)nishevitā parva°. — 9. B °samanī vi° M °samavī°. — 10. BM nishīdet | prāṅmukho rājā pau° M °rāṇāni anu° B °rāṇāni anu° BM °smaranto a°.

11. M °bhāshatha ||. — 12. B °ṇḍarā giri kailāça parvata | tathai° M °kailāçavat ta° BM °pulo a°. — 13. M atha me pitāmahā° B °me pitarā pitāma° BM °tṛishṇā va°. — 14. M varo ramyā° pushkariṇyaçilo° B °shkiriṇyaçilo° BM °ccayo yā°. — 15. B yāni-mani gamāyetuḥ || kāni te di° M yānimāni nigametuḥ || kāni te di° BM °gatā ta°.

16. M tathaiva imāni° BM °ṇi imāṁ pṛi° M °nti | ye yā°. — 17. BM yāni(B °nī)-māni gamāyeuḥ(B °tuḥ |) kā nu te di° M °gatāḥ B °gatā ta°. — 18. M tathaivam imāni vastrāṇi imā tikāṁ çakuṇḍalāṁ B °nishkāṁ sakuṇḍalāṁ |. — 19. BM yānimāni gatāyetuḥ kāṁ(M °kā) nu°. — 20. BM imāṁ pu° M °shkiriṇīṁ ramyā nānaṁ dvi°.

पुण्डरीकेहि संछन्ना कुमुदसौगन्धिकेहि च ।
ये च ते अत्र स्नायेंसुः कां नु ते दिशतां गताः ॥
तथैवमासना रम्या दिव्या हरितशाड्वला ।
आसन्नोदकसंछन्ना शीतच्छाया मनोरमाः ।
यानि ते अत्र गमायेंसुः कां नु ते दिशतां गताः ॥
तान्येव प्राणिशतानां निविशनानि पर्वता ।
इमे च मे प्रचारिता अद्य जनमपश्यतो ॥
शून्यता च मे आख्यायन्ति दिशा पि मे सुचारिता ।
एवं मर्त्यजीवितं किंच परीत्तं च दुःखसंयुतं ॥
अनन्तरं जीवितस्य मरणं मरणं ध्रुवं ।
जातस्यामरणं नास्ति एतद्धर्मा हि प्राणिनो ॥
गच्छति खेदेन प्राणी प्रतिपन्नो क्वचिज्जनो ।
रात्रिंदिवं च यान्तीह यमदूता शासनाहरा ॥

अथ खलु अन्यतरस्य राजामात्यस्य एतदभूषि ॥ राज्ञो किल श्रेण्यस्य बिंबिसारस्य दौर्मनस्यमुत्पन्नं को नु खल्वस्यात्पर्यायो येनाहं राज्ञो श्रेण्यस्य बिम्बिसारस्य दौर्मनस्यं प्रतिविनोदयेयं ॥ अथ खलु तस्य राजामात्यस्यैतदभूषि ॥ राज्ञो [403b] किल श्रेण्यस्य बिंबिसारस्य राजगृहं नगरं प्रियं च मनापं च ।

1. M °ndhikedhikehi ca |. — 2. BM yena te atra(M °trā) snāyetsuḥ kā nu°. — 3. BM °haritaśādvayo |. — 4. BM °nnodakaṃ° M °ramā |. — 5. M yāni cātra gatāyetsuḥ kiṃ nu° B °māyetsuḥ kiṃ nu°.

6. B nānye varaprāṇiniveçanāni te parvatā | M nānyevaṃ prāṇiniveçatāni varaṇāni te ca parvataḥ |. — 7. B ime te ca pracārikām eva adya janakām apaçyato M °pracāre tāni adya janaṃ apaçyataḥ |. — 8. B çūnyatā ca me brāhmaṇākhyāyati deçāpi naṃ te sucaritaṃ | M çunyatā ca me brāhmaṇāhihāryati diçāpitaṃ tena caritaṃ |. — 9. B °martyāna jīvitaṃ | kiṃ varaṃ parittaṃ° M °martyā janajīvanaṃ kiṃ varaṃ paritta ca° BM °duḥkhena saṃ° B °taṃ a°. — 10. BM °ntaraṇasya jīvitaṃ ma(B °maraṇa°)raṇaṃ dhru°.

11. M °rmāddhi prāṇināṃ | B °ṇinaṃ |. — 12. B gacchati khalena° BM °prāṇino pratipanno ca ko vijāne rā°. — 13. BM °triṃ ca di° yanti(B °ntīha rājadūtā vaya çāsa-(B °çāha)nā°. — 14[b]. M °tyasyaitā°. — 14[c]. M °kila manyasya bimbiçālasya daurmanasya° B °tvasyātyaparyāyo yenahaṃ° M °tvasyāparyāyenāhaṃ° mbiçālasya daurmanasyaṃ° daurmaṃ |.

16. M °syaitad abhavat rajño° — 17. M °bimbiçālasya rājagṛhe nagaraṃ ca pri° BM °manopaṃ ca |.

यन्नूनं अस्माहं पुरतो राजगृहस्य नगरस्य वर्णं भाषेयं ॥ अथ खलु सो राजामात्यो राजं श्रेण्यं बिंबिसारं गाथाये अध्यभाषे ॥

पर्वता इमे सशीला इमे रम्या शिलोच्चया ।
ये इमे राजगृहस्मिं सिक्ता दिविजेन वारिणा ॥
भिन्नकटका च श्रवन्ति . . . .
. . . .

अथ खलु राजा श्रेण्यो बिम्बिसारो तं राजामात्यं अपसादये ॥ अस्ति नाम त्वं मोहपुरुषो यं यदेव वयं विगर्हाम तदेव त्वं प्रशंसितव्यं मन्यसि ॥ अथ खलु राज्ञो श्रेण्यस्य बिम्बिसारस्य भूयस्या मात्रया कामेषु आकुलमना उत्पद्ये चित्तस्य दुःखदौर्मनस्य योनिसो मनसिकारो ॥ अथ खलु ब्राह्मणस्य पुरोहितस्य राजाचार्यस्यैतदभूषि ॥ राज्ञो किल श्रेण्यस्य बिंबिसारस्य दुःखदौर्मनस्यमुत्पन्नं को नु खल्वस्योपायो येनाहं राज्ञो श्रेण्यस्य बिम्बिसारस्य दुःखदौर्मनस्यं प्रतिविनोदयेयं ॥ अथ खलु ब्राह्मणस्य पुरोहितस्य राजाचार्यस्य एतदभूषि ॥ राज्ञो खलु श्रेण्यस्य बिम्बिसारस्य बुद्धो भगवान्प्रियो मनापो च यं नूनाहं तस्य पुरतो बुद्धस्य वर्णं भाषेयं ॥ अथ खलु ब्राह्मणो पुरोहितो राजाचार्यो राजानं श्रेणियं बिम्बिसारं गाथाये अध्यभाषे ॥

लाभो स्वि राष्ट्राधिपते श्रिरीमतो
अंगस्य राज्ञो मगधाधिपस्य ।
यस्योदपासि विजिते तथागतो
विघुष्टशब्दो हिमवां व पर्वतो ।

1ᵃ. B nûnaṁ° M yan nûnaṁ asyâ° B °garasya bhâ° — 1ᵇ. M °nyaṁ bimbiçâlaṁ gâ°. — 3. BM stramôlina ime ramyâ° M °ccaye | . — 4. B ye i râjagrihesmi parvatâ si° M °grihesmiṁ parvatâ siktâ divivije°. — 5. M °nnakâkâ ca çra° BM °nti kuñja(M °jara)râ jâtâ(M °to) girinâgâ ca bho(M °ca parvatâ nabhâ) çobhati uttamaṁ giri(M °ttama çiri)bruyaṁ(M °yaṁ |) abhâsamaṁ dharmadhâriṇo | .

7ᵃ. M °mbiçâlo taṁ° B °apasâdaye || . — 7ᵇ. M °mahaṁ yad eva vayaṁ vigrahâmataṁ | tad eva tvaṁ° B °vigarhâma taṁ tade° vyaṁ anyasi || . — 8. M °mbiçâlasya bhû° mâtrâye kâ° B °dyaccitta° M °daumanasyaṁ°. — 10. M °asyâ râjasya etad a°.

11. BM °kila çrenyasya bimbisâra(M °bimbiçâla)sya duḥkhadaurmanasya u(M °syam u)tpannaṁ(M °nnaṁ |) ko nu khalvasyâtya pa° M °nyasya bimbiçâlasya duḥkhadaurmanasyaṁ°. — 13. M °mbiçâlasya buddho° B °gavâ priyo °nûnâṁ ta°. — 15. M °câryyaḥ râjânaṁ °mbiçâlaṁ gâ° BM °yo pratyabhâ°.

17. BM lâbho stu râshṭrâ °çirimato aṁga(M °aṁgasya râjño° M °paṣyâ ya°. — 19. M yasya udupâ° B °syodupâsi° M °vidyuhita° B °himavâṁ ca parvato M °vâṁ ca parvato |.

शीलेन क्षान्त्या तपसा उपेतो
लोकानुकंपी उषितब्रह्मचर्यो ॥
समागम्य सहस्राणि शतानि नयुतानि च ।
संप्राप्नोति अमृतं शान्तं योगक्षेममनुत्तरं ॥

अथ खलु राजा श्रेणियो बिम्बिसारो ब्राह्मणं पुरोहितं राजाचार्यं गाथाये प्रत्यभाषे ॥

प्रियं मे कीर्तये राज्ञे प्रियं मे कीर्तये प्रिय ।
प्रियस्य बुद्धस्य लोकार्थचरस्य ब्राह्मण ॥
ददामि ते ग्रामवराणि षोडश
युक्तानि आजान्यरथानि च दश ।
दासीशतं च गवां शतं च
प्रियस्य बुद्धस्य यशो प्रकीर्तये ॥

अथ खलु भगवां मगधेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः येन मगधानां राजगृहं नगरं तदनुसारि त[504b]दनुप्राप्तो तत्रैव विहरति अन्तगिरिस्मिं यष्टीवने उद्याने ॥ अश्रोषीद्राजा श्रेणियो बिम्बिसारो ब्राह्मणस्य पुरोहितस्य राजाचार्यस्य । भगवां किल मगधेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं अर्धत्रयोदशभिक्षुशतैर्येन मगधानां राजगृहं नगरं तदनुसारि तदनुप्राप्तस्तत्रैव विहरति अन्तगिरिस्मिं उद्याने यष्टीवने । श्रुत्वा पुन: अन्यतरं राजामात्यमामन्त्रयति । भो भणे अमात्य भगवतो बुद्धस्य प्रत्युद्गमनं गमिष्यामि राजगृहं अलंकारापेहि भद्राणि च यानानि योजापेहि सर्वेहि च राजगृहकेहि ब्राह्मणगृहपतिकेहि सर्वेहि च शिल्पायतनेहि सर्वेहि च श्रेणीहि मया सह भगवतो

1. BM *kshāntiye ta * shitavāṁ brāhmacaryaṁ (M *ryyaṁ) | . — 3. M *yutāni nayutāni ca | B *ca saṁ*. — 4. M *prāpnu ti a * yogakshemam anuttamaṁ | . — 5. M *mbiçāro*.

7. M *jye priyaṁ me priyasya* B kīrttaye rājye priyaṁ me kīrttaye priyasya*. — 8. BM *lokārthaṁ ca * hmaṇa da*. — 9. B *dāti te | grā* M *dāti me grā* B *ni yo upayuktā* M *ājanyarathā*.

11. BM dāsīçataṁ gavāṁ* B *ddhasya pra* M *ddhasya na se pra*. — 13. B *ārdhaṁ arddhatra* M *magadhāṁ rā * prāptas tatrai * ti | antargirismiṁ* B *yashṭi-vane*. — 15. M çrutvā punar agro*.

16. M bhagavān kila * rddhaṁ arddhatra * r yena magadhāṁ rā * nagaraṁ * prāptaḥ tatraivaṁ vi* BM *ti | u * shṭīvane çru*. — 18. M *punar anya * ntrayetī | . — 19. M *ye amātyo bhaga* B * laṁkārepehi* M *bhadrāni ca yānāti yojāyehi sarvehi ca rājagṛhakehi ca brā * tikehi ca sarvehi ca çi * çreshṭhihi mayā saha*.

बुद्धस्य प्रत्युद्गमनं गच्छन्ति ॥ साधु महाराज त्ति स राजामात्यो श्रेण्यस्य बिंबिसारस्य प्रतिश्रुत्वा क्षिप्रमेव भद्राणि यानानि योजापेसि राजगृहे घोषणां कारापेसि चत्वरशृंगाटकचत्वरापणमुखेषु ॥ बुद्धो भगवां राजगृहे अन्तगिरिस्मिं यष्टीवनं उद्यानं समनुप्राप्तो तत्र सर्वेहि भवन्तेहि राज्ञा श्रेण्येन बिम्बिसारेण सार्धं भगवतो प्रत्युद्गमनं गन्तव्यं ॥

ते दानि घोषणां श्रुत्वा क्षिप्रमेव राजकुलद्वारे सन्निपतिता कुमारामात्यपारिषद्याः पुरोहितप्रमुखा ब्राह्मणाः श्रेष्ठिप्रमुखो निगमो सार्थवाहप्रमुखो वणिग्ग्रामो सर्वा च राजगृहका अष्टादश श्रेणीयो । तद्यथा चक्रिकतालिकगन्धर्विका नटनर्तकल्लमल्लपाणिस्वरिका शोभिका लंघका कुम्भतूणिका वेलम्बका द्विस्वलभाणका पंचवटुका गायनका नृत्यर्ता ताण्डविका चेलयिका गणिका हास्यकारका भेरिशङ्खमृदंगपाटहिका तूणवपणवीणावल्लकीएकादशायेचवाद्यका अन्ये च बहुवाद्यकरा राजकुलद्वारे सन्निपतेन्सुः सर्वायो च श्रेणो । तद्यथा सौवर्णिकहैरण्यिकप्रावारिका मणिप्रस्तारका गन्धिका कोशाविका तैलिका घृतकुण्डिका गौलिका दूध्यिका कार्पासिका खण्डकारका मोदककारका कण्डुका समितकारका सक्तुकारका फलवाणिजा मूलवाणिजा चूर्णकुट्टा गन्धतैलिका गुडवाणिजा खा[405b]दिचका गुडपाचका मधुकारका शर्करवाणिजा ये च अन्ये पि व्यवहारिका सर्वा च शिल्पायतना । तद्यथा लोहकारका ताम्रकुट्टा सुवर्णकारा तट्टुकारा प्रचोपका

1. B °mahārājanti sa° M °hārājāti sarājāmātyā çreṇyasya bimbiçārasya prati° B °pram evam eva bha° M °bhadrāṇi yā° BM °çriṅgāṭa(B °ta)ka çrava(M °çrava)ṇabrāhmaṇeṣu°. — 3. M °ddho bhagavān rāja° B °ntagirismiṁ° M °ṣṭīvane u° BM °dyāne samu° M °prāptaḥ tatra ° ntehi rājño çre ° mbiçārena sā°.

6. M °dvāre saṁnipa° B °kumārāmātyā pā ° hitapramukhānāṁ çreṣṭhipramukhā ni° M °ṣṭhipramukhā ni ° hapramukhā vaṇijagrā° B °hapramukhā vaṇijapramukhā grā° M °sarvāṁ ca°. — 8. BM °krikaṁvetaddika(M °tardikaṁ) gandha ° çobhikā kelukaṁkaṭāṇikā va(M °kā ca)larakā alkha(M °akha)kā bhā° B °rtā taṇḍa° M °rtā tāṇḍavikā vetayi° BM °ṇikā vastapṛyakaṁ bhe° M °mṛdaṅgapaṭahikā tūṇapaṇavavī° B °vīvallakīekāçīyellavāyakā anye° M °ekāçīyelāvāyanto | anye ° huvādyakaro rā° B °dyakaro rā° M °re saṁnipa° BM °tetsuḥ sa ° çreṇyā |.

12. BM °ruṇika hai° M °ṇyikaprāgāvāri° BM °golikā dhānyikā kārpā(B °rpā) ṇ ° kaṁdukā samitakā(M °takā çaktukā)rakā phala(M °lakārakā) vāṇi(B °vāṇijā mūlapaṇṇa(M °laparā) cūrṇakuṭṭā gandha° B °tailakā aṭṭiyāmikā(?) āraṁbhikaguḍapācakā madhu° M °tailakā aṭṭivāmikā āraṁbhikā guḍapācakā khaṇḍapācakā madhupācakā çarka ° sarvāṁ ca çi°.

17. M °mrakārakā suvarṇakārakā taḍrakārā pracoḍakā ro° B °rṇakārā taḍrakārā praco° M °trapusakārakā çiçapiṭakā jantra° B °trapukārakā çiçapiṭakā jatukārakā mālā° M °lākārā parimakārā kumbhakārakā carmakārakā kaṇḍukāro caratā tantravāyavarocakā rakta° B °ndukārakā carutā tantravāyavocakā rakta° M °ṇipakā stanvāyā citrakāra

रोचका इषुकारका सीसपिण्डकारा चक्रकारका मालाकारा पुरिमकारका कुंभकारका चर्मकारा कन्दुकारका वस्त्रतन्तवायका रक्तरजका सूचका तूलवाया चित्रकारा वर्धकिरूप्यकारका कामपाचिका पेशलका पुस्तककारका नापिता कल्पिका छेदका लेपका स्थपतिसूत्रधारका उत्तकोष्ठकारका कूपखानका मृत्तिकावाहका काष्ठवाहका चक्रमवाणिजा शंखवाणिजा वंशवाणिजा नाविका चौदुम्बिका सुवर्णधोवका मोद्विका एते चान्ये च उच्चावचा जनता हीनोत्कृष्टमध्यमा सर्वे राजकुले संनिपतेन्सु: ॥

अथ खलु स राजामात्यो संनिपतितं जनकायं विदित्वा भद्राणि यानानि योजापयित्वा येन राजा श्रेण्यो बिम्बिसारस्तेनोपसंक्रमित्वा राजानं श्रेणियं बिम्बिसारमेतदवोचत् ॥ युक्तानि महाराज भद्राणि यानानि महाजनकायं च सन्निपतितं । यस्येदानि देव कालं मन्यसि ॥ अथ खलु राजा श्रेण्यो बिम्बिसार: भद्रं यानमभिरुहित्वा मागधकेहि ब्राह्मणगृहपतिकेहि सार्धं द्वादशेहि नयुतेहि संपरिवृतो महता राजऋद्धीये महतो जनकायस्य हक्कारहिक्कारभेरीमृदंगपणवपटहशंखसंनिनादेन राजगृहातो नगरातो निर्यात्वा येन अन्तर्गिरिस्मिं यष्टीवनमुद्यानं तेन प्रयासि ॥

अथ खलु राजा श्रेण्यो बिम्बिसारो यावदेव यानभूमिस्तावदेव यानेन यात्वा यानातो प्रत्योरुह्य पद्भ्यां येव येन भगवांस्तेनोपसंक्रमित्वा भगवत: पादौ शिरसा वन्दित्वा एकान्ते निषीदेत् ॥ अप्पेकत्या भगवता सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारयित्वा एकान्ते निषीदेन्सु: । अप्पेकत्या भगवतो स्वकस्वकानि मातापितृकानि नामगोत्राणि अनुश्रावयित्वा एकमन्ते निषीदेन्सु: । अप्पेकत्या येन भगवांस्तेनांजलिं प्रणा[405a]मयित्वा

ca vakīrṇapakārakā kālapattikā galālakā paṃtavakārakā nāvikā kalpakā chādakā le° B °sūcakā tunnavāya citrakārā rasakārā ° kārapatrikā galālakā pautavakārakā nāpikalpakā chādakā le° BM °sthapatiguṇakārakā utta° ° tikādhakā dāruvāhakā vakrajakā (M °dāruvāhakā vaikara)-vāṇijā guṇāvaṇijā vaṃ° B °vikā āgavikā suvarṇagandhavakā mottikā e° M °vikā āḍuḍibikā suvarṇagandhavikā mottikā ‖ e° B °tā hīno ° sarva rā° BM °tetsuḥ ‖.

8. B °yopayi ° mbigāhas te° M °mbigāla tena ° yaṃ biṃbikā°. — 10. M °bhadrayānāni° B °ṇi jānāni mahāṃ ca jana° M °yaṃ ca saṃnipa°.

11a. M °devaṃ kā° B °kāla ma° M °nyase ‖. — 11b. M °gyo biṃbiçāra bhadraṃ° BM °māgadhakehi brā° B °gṛhapehi sā° M °ṛddhiye mahato° BM °sya hikkārapikkārabhe° ° rapaṭahaśaṃ(B °paraṃpaçaṃ)kanaṃ° M °trā yenānta°.

16. B °mbisāras yāvad eva yānabhū° M °sāro yāvad evaṃ yānabhūmiṃ tāvad evaṃ yāne ° pratyārūhya° B °pratyārahya° M °yena bhagavāntena ° gavata pā° BM °detsuḥ a°. — 18. B apekatyā° M appekatyāṃ bha° BM °modayitvā sārāyaṇīyāṃ (M °yāṃ kathāṃ) vya° BM °detsuḥ ‖. — 20. BM appekatyā° M °bhagavatā svaka ° ekamantaṃ ni° BM °detsuḥ ‖. — 21. M °nāmetvā ° detsuḥ ‖ B °detsuḥ a°.

एकान्ते निषीदेन्सुः । अप्येकत्या मागधका ब्राह्मणगृहपतिका तूष्णीभूता एकान्ते निषीदेन्सुः ॥ तेन खलु पुनः समयेन उरुविल्वाकाश्यपो भगवतो अविदूरे संनिषण्णो अभूषि ॥ अथ खलु तेषां मागधकानां ब्राह्मणगृहपतिकानामेतदभूषि । किं नु खलूरुविल्वाकाश्यपो श्रमणे गौतमे ब्रह्मचर्यं चरति उताहो महाश्रमणो गौतमो उरुविल्वाकाश्यपे ब्रह्मचर्यं चरति ॥ अथ खलु भगवांस्तेषां ब्राह्मणगृहपतिकानामिदमेवरूपं चेतसः परिवितर्कमाज्ञाय आयुष्मन्तं उरुविल्वाकाश्यपं गाथाये अध्यभाषे ॥

किमेव दृष्ट्वा उरुविल्ववासि
प्रहाय अग्निं कृशको वदानो ।
पृच्छामि ते काश्यप एतमर्थं
कथं प्रहीणं तव अग्निहोत्रं ॥

एवमुक्ते आयुष्मानुरुविल्वाकाश्यपो भगवन्तं गाथाये प्रत्यभाषे ॥

अन्नानि पानानि अथो रसानि
कामां स्त्रियो चाभिवदन्ति यज्ञे ।
एतं मलन्ति उपधीषु ज्ञात्वा
तस्मान्न यष्टे न हुते रमामि ॥

अथ खलु भगवानायुष्मन्तमुरुविल्वाकाश्यपं गाथाये प्रत्यभाषे ॥

एतेषु ते न मनो रमासि
अन्नेषु पानेषु तथा रसेषु ।
अपरं नु ते देवमनुष्यलोके
यहिं रतं काश्यप ब्रूहि चित्तं ॥

1. B apyekavatyâ° M apyekatyâṃ mâ° BM °detenḥ ‖. — 2. M °puna sama° to abhidûre° B °dûra saṃ° dai s°. — 3. M °khalu bhagavân tesbâṃ brâ° B °tikânâṃm e° M °tikânâṃ eta°. — 4. M °khalu uru° po çravaṇo gauttame° B °po çramaṇo gautamo brahmacaryaṃ carati utâ° M °hâçravaṇo gauttamo uru° BM °çyapo bra°. — 5. B °n tetehâṃ° M °hmaṇakânâm i° cetaso pa° B °ntaṃ uluvilvâ° BM °thâye pratyabhâshe ‖.

8. BM °ruvilvâsâ° B °hâyam agni kṛi° M °agni kṛi° dânâ ‖. — 10. B pṛicchami° M °çyapo e°.

13. B annapânâni artho sâni kâ° M annapânâni artho so nishkâmâṃ striyo câbhivadanti yajñe B °bhivandaṃti yajñe s°. — 15. M °maranti upadhishu° BM °tvâ tasyâç ca yajñâ na huto abhâsi ‖.

18. B etesho tena mano° M etesho tena mano akesi anyeshu yâno°. — 20. B apare nu taṃ de° M apare nu taṃ de° B °çreshṭaṃ yahitarâ kâ° M °shṭhaṃ yaṃhi taro kâ° BM °tulyacittaṃ ‖.

अथ खल्वायुष्मानुरुविल्वाकाश्यपो भगवन्तं गाथाये प्रत्यभाषे ॥

दृष्ट्वा मुनिं शान्तमनुपधीकं
अकिंचनं सर्वभवेष्वसक्तं ।
अनन्यथाभावमनन्यनेयं
तस्मादहं यष्टे न हुते रमामि ॥

अथ खलु भगवानायुष्मन्तमुरुविल्वाकाश्यपं गाथाये प्रत्यभाषे ॥

मोहन्तो जुहितो अपि मोहन्तो सो तपो कृतो ।
यं जहे पश्चिमे काले जीर्णां व उरगो त्वचं ॥

अथ खल्वायुष्मानुरुविल्वाकाश्यपो भगवन्तं गाथाये प्रत्यभाषे ।

मोहं नो जुहितो अपि मोहं मे सो तपो कृतो ।
यं जहे पश्चिमे काले जीर्णां व उरगो त्वचं ॥
अपीहि यज्ञेषु च विप्रमुक्ति
